श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
काश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेशान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४६

श्रीनेत्रतन्त्रम् ।

श्रीमाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्यविवरणोपेतम् ।

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-

श्रीप्रतापसिंहवर-प्रतिष्ठापिते

प्रत्नविद्याप्रकाश (रिसर्च) **कार्यालये**

तदध्यक्ष-पण्डित-मधुसूदन-कौल-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन संगृह्य,

संशोधनादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

'तत्त्वविवेचक' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतम् ।

(प्रथमो भागः)



संवत् १९८३. **काश्मीर-श्रीनगर** ख्रैस्ताब्दः १९२६

(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः स्वायत्तीकृताः सन्ति)

(All rights reserved.)

Printed by Yeshwant Kashinath Padwal, at the Tatva Vivechaka Press, Parel Road, Byculla, BOMBAY.

Published by Pandit Madhusudan Kaul Shastri, M. A., M. O. L., **for the Research Department, Jammu and Kashmir State, SRINAGAR.**

PREFACE.

This edition of the Netratantra is based on the collation of the following manuscripts.

(a) Belongs to Swami Rishi Kaul Sahib of Kharayar, Srinagar. Written on new Kashmiri paper. Generally correct. Consists of 92 leaves, each side of the leaf containing 20 lines on an average of 25 letters each.

(b) Belongs to Pandit Ananda Rajanaka of Madanyar, Srinagar. More than a century old. Bound in one volume with other manuscripts. Not as correct as manuscript (a). Its opening portion is a restoration.

Publication of this Tantra is expected to give a further opportunity to the readers of the Series for acquaintance with the Tantrika literature of Kashmir.

Here as usual I have to express my thanks to Rajanaka Maheshvara of the Research Department for his valuable help.

Srinagar, Kashmir,
7th June, 1926.

MADHUSUDAN KAUL.

INTRODUCTION.

That class of Sanskrit literature, which chiefly concerns itself with the theological conceptions and the ritualistic practices of the Shaivaites in general, and whose authorship is enshrouded in eternal mystery, goes by the name of the Agama. This is evident from the term itself as it etymologically denotes something that has come down to us.

Agamas are also known as Tantras. The main feature that seems to have occasioned, in later times, the distinction between the Tantras and the Agamas is that in the former the element of Shakti worship comes into greater prominence than in the latter. The Tantras generally begin without any salutary stanza and this circumstance helps much to assign a later date to those Tantras which start with a stanza saluting some deity of the Hindu pantheon, especially Shiva.

The Netratantra which is offered for the study of the public in the following pages has a stanza of salutation at the very commencement. Therefore, the composition as known at present is far posterior to that of the Svacchandatantra. The Netratantra seems to have been written on the analogy of the latter. It is a sort of manual elaborately dealing with the mode of initiation relative to Shiva in the name and form of Amriteshvara or Mrityujinnatha.

The Tantra is so called because the incantation peculiar to the deity glorified in the Tantra occupies as important a place in the domain of incantations as the eyes in the human organism. It is stated in a kind of mystic language on p. 50 of the printed text.

The body of the book has a sort of prelude which discusses the philosophy of the eyes of Shiva in His embodied form. It is put in the form of a

colloquy, as the whole Tantra is, between Bhairava and Bhairavi, the progenitors of the human race. Bhairavi puts a question to her divine consort as to how the eyes of the Lord simultaneously perform contradictory functions of protection and destruction and how the third eye, generally looked upon as watery, emitted fire and brought about reduction to ashes of the love-god.

In response to this intelligent query coming from the sweet lips of His beloved Lord Bhairava opened His mouth and spoke:

"My real nature is innate, pure, all-pervasive and facing all. It is enshrined in the hearts of all beings and constitutes the very life-breath of the whole animal kingdom. It is accessible only through the realisation of the unity in diversity. It is the force of the forces, the power of the powerful and the vigour of the vigorous. It is firm, fixed and eternal. It is as inseparably united with Me as heat is with fire or light with the sun. It expresses itself in the triune form of will, wisdom and work. It is only because of this triple manifestation of my real nature that the votaries adore Me as the Three-eyed. My eyes symbolise the three centres of the physical light commonly known as the sun, the moon and the fire." As the real nature alone centralises all powers and as it only shines eternally through them, the apparent contradiction between the acts of protection and destruction loses its force and, therefore, the same eye can favour or frown."

The Tantra in question contains twenty-two adhikaras (chapters) of which the first fifteen go to make the opening volume. They respectively deal with the following:—

1. Exposition of the unity of the real nature.
2. Mystic statement of the Amriteshvara mantra.
3. Method of offering sacrifices.
4. Initiation into the worship of the Deity.
5. The anointing ceremony.
6. Gross form of the divine meditation.
7. Its subtle form.
8. Its supreme form.
9. Some forms of the Deity.
10. Attendants of the Deity.
11. Worship according to the Uttaramnaya.
12. The same according to the Kulamnaya.
13. Openness of the worship to all human beings.
14. Supremacy of the mantra over other mantras.
15. Its protective efficacy.

The commentary attached to this Tantra is known as Uddyota. It is written by Rajanaka Kshemaraja, the famous disciple of Abhinavaguptacharya.

Srinagar, Kashmir,
29th May, 1926.

MADHUSUDAN KAUL.

अथ

श्रीनेत्रतन्त्रम् ।

श्रीमत्क्षेमराजरचितोद्द्योताख्यव्याख्योपेतम् ।

(प्रथमः पटलः)

द्वारेशा नवरन्ध्रगा हृदयगो वास्तुर्गणेशो मनः
शब्दाद्या गुरवः समीरदशकं त्वाधारशक्त्यात्मकम् ।
चिद्देवोऽथ विमर्शशक्तिसहितः षाड्गुण्यमंगावलि-
र्लोकेशाः करणानि यस्य महिमा तं नेत्रनाथं स्तुमः ॥१॥

यन्मन्त्रावलिनायकं भवति यत्स्वं वीर्यमन्तर्बहि-
र्यत्राणं भविनां विभूतिकृदणौ यद्विश्वरक्षाकरम् ।
ज्योतिस्तत्परमं परामृतमयं विश्वात्म तुर्यं त्रिकं
नेत्रं पञ्चकसप्तकात्म शिवयोर्नौम्येकवीरं मृडम् ॥ २ ॥

योऽन्तर्विश्वं झटिति कलयन्नक्षचक्रेश्वरीभिः
स्वात्मैकात्म्यं गमयति निरानन्दधाराधिरूढैः ।
यः पूर्णत्वाद्बहिरपि तथैवोच्छलत्स्वात्मरूपो
बोधोल्लासो जयति स गुरुः कोऽप्यपूर्वो रहस्यः ॥ ३ ॥

सर्वाभासविकासि चिन्मयमहः स्वच्छस्वतन्त्रस्फुरद्
यद्द्वैतेन्धनदाहि यच्च परमाद्वैतामृतेनोच्छलत् ।
द्वैताद्वैतदृगन्धकारहरणं धामत्रयैकात्मकं
शैवं नेत्रमनुग्रहाय जगतोऽमुत्रैतदुद्द्योतते ॥ ४ ॥

अभिनवबोधादित्यद्युतिविकसितहृत्सरोजान्मे ।
रसयत सरसाः परिमलमसारसंसारवासनाशान्त्यै ॥ ५॥

इहानुजिघृक्षामनाः परसंविद्देवीप्रबोधितोऽवतितारयिषितसर्वागमरहस्यैतच्छासनानुगुण्येन नमस्कार्यनमस्कारं कश्चित्तन्त्रावतारक आह

त्रिधा तिसृष्ववस्थासु
रूपमास्थाय शक्तिमान् ।
उद्भवस्थितिसंहारा-
न्कृत्स्नविश्वस्य शक्तितः॥१॥

विधाता यो नमस्तस्मै
शुद्धामृतमयात्मने ।
शिवाय ब्रह्मविष्ण्वीश-
पराय परमात्मने ॥ २ ॥

तस्मै शिवाय चिदानन्दघनश्रेयोरूपाय परमात्मने नमो देहप्राणादिमितात्मप्रह्वीभा-

वेन तं समाविशामि । कीदृशे ब्रह्मविष्णवीशेभ्यो ब्रह्माद्यनाश्रितान्तेभ्यः पराय प्रकृष्टाय एतत्पालनपूरणकर्त्रे च । ईशशब्दः सामान्येन रुद्रेश्वरसदाशिवानाश्रितान्तानाह । परत्वादेव शुद्धो महामायययाप्यकलुषोऽतश्चामृतमयो जगदानन्दात्मा आत्मा स्वभावो यस्य । ईदृगेव हि परमात्माग्रग्रन्थे वर्णयिष्यते ।

'परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम् ।
चैतन्यमात्मनो रूपं सर्वशास्त्रेषु कथ्यते ॥' (८।२८)

इति । कस्मै तस्मै इत्याह त्रिधेत्यादि । यः शक्तिमान्स्वतन्त्रः शक्तितः स्वातन्त्र्यशक्त्या तिसृषु बहिर्ब्रह्मप्रकृतिमायाण्डरूपासु अन्तर्हृदादिजागराद्यात्मिकासु तेनैवावस्थात्रा आभासितत्वादवस्थासु त्रिधा ब्रह्मविष्णुरुद्ररूपं रूपमास्थाय गृहीत्वा मायान्तस्य कृत्स्नस्योद्भवस्थितिसंहारान्यथायोगं विधाता विदधाति तच्छीलः । तथा तिसृषु लयाधिकारभोगाख्यासु अवस्थासु त्रिधा अनाश्रितसदाशिवेश्वरात्मरूपमाश्रित्य शुद्धा-

ध्वात्मनः कृत्स्नस्य विश्वस्य यथोचितं युगपदुद्भवादीन्विधाता । स्थितिसंहृतिविशेषात्मानौ विलयानुग्रहौ स्थितिसंहाराभ्यामेव स्वीकृतौ इति पञ्चकृत्यकृदेवदेवः । एतद्व्याख्याद्वयानुरूपश्चाग्रिमो ग्रन्थः

'सृष्टिं स्थितिं च संहारं त्रितनुर्विधदाम्यहम् ।'(१।३१)

इति अस्ति । किंच तिसृषु परापरापराभूमिषु त्रिधा क्रियाज्ञानेच्छाख्यारूपमास्थाय य उद्भवादीन्विधाता । यद्वक्ष्यति

'एवं ममेच्छा ज्ञानाख्या क्रियाख्या शक्तिरुच्यते ।'(१।२९)

इति ।

'क्रियाशक्त्या तु सृजति ज्ञानशक्त्या जगत्स्थितिम् ।
संहारं रुद्रशक्त्या च ।' (२१।४३)

इति । अपिच परासु मेयमानमात्रात्मिकासु तिसृष्ववस्थासु नरशक्तिशिवभेदात्त्रिधा रूपमास्थाय कृत्स्नस्य विश्वस्योद्भवादीन्विधाता यः । यद्भविष्यति

'एवमुक्तेन विधिना मन्त्राः सर्वे त्रितत्त्वतः ।
भवन्ति सर्वतः सर्वे ।' (२१।९८)

इत्यादि । अपिच तिसृषूच्चारहवनविश्रान्त्यात्मिकास्ववस्थासु अक्षरभेदात्त्रिधा सान्तं रूपमास्थाय कालाग्न्यादेश्वरमकलान्तस्य कृत्स्नस्य विश्वस्योर्ध्वम्भवनचिदग्न्यन्तःकारप्रकाशानन्दसद्भावरूपानुद्भवादीन्यो विधाता। यदभिधास्यति

'प्रणवः प्राणिनां प्राणः ।' (२२।१४)

इत्यादि 'पूर्णया' इत्यन्तम्। अन्यच्च तिसृष्वन्तर्वामदक्षिणमध्यभूमिषु वहिश्च निशादिनसन्ध्यारूपास्ववस्थासु त्रिधा नेत्रनाडीसंचारविशेषरूपं सोमसूर्यवह्न्यात्म च रूपमास्थाय कृत्स्नस्य विश्वस्य आप्यायप्रकाशदाहादिरूपान् उद्भवादीन् यो विधाता । यदादेक्ष्यति

'सूर्याचन्द्रमसौ वह्निस्त्रिधामपरिकल्पना ।
त्रिनेत्रकल्पना मह्यं तदर्थमिह दृश्यते ॥
दहनाप्यायने तेन प्राकाश्यं विदधाम्यहम् ।'(१।३१)

इति। सूत्रे अवस्थाशब्दो भावसाधनोऽधिकरणसाधनश्च यथायोगं योज्यः । एवं सत्पाठमिम-

मदृष्ट्वा 'यस्त्रिधा तिसृष्ववस्थासु' इति 'विदधाति' इति च पठित्वा यत्तद्व्याकुर्वाणा उपहास्या एव ॥ २ ॥

एवमिष्टदेवतां नमस्कृत्य तन्त्रावतारक आयातिक्रममुपक्रमते वक्तुम्

कैलासशिखरासीनं
देवदेवं महेश्वरम् ।
क्रीडमानं गणैः सार्धं
पार्वत्या सहितं हरम् ॥ ३ ॥

दृष्ट्वा प्रमुदितं देवं
प्राणिनां हितकाम्यया ।
उत्संगादवतीर्याशु
पादौ जग्राह पार्वती ॥ ४ ॥

पप्रच्छ परया भक्त्या
संतोष्य परमेश्वरम् ।

महेश्वराख्यं देवानां ब्रह्मादीनां देवं प्रभुं देवं द्योतनादिसतत्त्वं सकलभेदतिमिरहरत्वात् भोगमोक्षप्रापकत्वाच्च हरम् । उक्तं च

'हरति पशुभ्यः पाशान् पुंसोऽप्यूर्ध्वं नयति यः स हरः'।

इति । पार्वत्या सहितमिति उमापतिं कैलासवासिनं परमशिवमत एव बाह्यगणैः सह क्रीडन्तमपि वस्तुतो गणैः स्वमरीचिचयैः सह विश्वनिर्माणादिक्रीडां ताच्छील्येन विदधंतम्, अतश्च स्वमरीचिचक्रविश्रान्तेः प्रकर्षेण मुदितं परमानन्दघनम्, अत एव च के शिरसि एला स्फुरन्ती शक्तिः तस्यामास आसनं यस्य व्यापिनीसमनात्मनः शिखरस्यात्युच्चस्य धाम्नः तत्रासीनमुन्मनाप्रतत्त्वस्फारमयं दृष्ट्वा निश्चित्य अवसरज्ञा देवी विनयात् मरीचिचयमुत्सङ्गमुज्झित्वा आशु पादग्रहणपूर्वं परस्वरूपाराधनपरया भक्त्या संतोष्य प्राणवदनुजिघृक्षया पृष्टवती ॥ ४ ॥

यत् पप्रच्छ तद् दर्शयति

श्रीदेव्युवाच

भगवन् देवदेवेश
लोकनाथ जगत्पते ॥ ५ ॥
यत्त्वया महदाश्चर्यं
कृतं विस्मयकारकम् ।
सर्वस्य जगतो देव
किन्तु मे परमेश्वर ॥ ६ ॥
दुर्विज्ञेयं दुरासादं
रहस्यं न प्रकाशितम् ।
कार्तिकेयस्य च न मे
न सुरेषु गणेषु वा ॥ ७ ॥
योगेश्वरीणां मातृणा-
मृषीणां योगिनां नहि ।
तदद्य मे जगन्नाथ
प्रसन्नोऽसि यदि प्रभो॥ ८ ॥

प्रार्थयामि प्रपन्नाहं
निःशेषं वक्तुमर्हसि ।

हे भगवन् ज्ञानैश्वर्याद्यतिशयशालिन् आराध्यदेवदेवानां ब्रह्मादीनामीश स्वामिन् लोकानां. नाथ स्वामिन् समभिलषितसिद्धये लोकैः प्रार्थ्यमान जगतो विश्वस्य पते पालक देव क्रीडादिपर परमेश्वर परमशिवमूर्ते,—इति आमन्त्रणानि सकलनिष्कलोभयस्वरूपामर्शनेन भगवतः सार्वात्म्यप्रथनपराणि भक्त्यतिशयद्योतनादात्मसंमुखीकाराय। त्वया यत् महदाश्चर्यं कृतं भाविविशेषपूर्वदर्शायिष्यमाणसंहाराप्यायकृन्नेत्रप्रकाशनरूपं तत् न ममैव अपि तु सर्वस्य विस्मयकृत् तच्च दुःखेन ज्ञायते निश्चीयते आसाद्यते प्राप्यते समाविश्यते च रहस्यं यतोऽतश्च नाद्यापि कस्यापि प्रकाशितम्। योगेश्वर्यो वाह्याः खेचर्याद्याः मातरो ब्राह्म्याद्याः, ऋषयस्तीव्रतपसः, योगिनः षडंगादियोगेनेश्व-

राराधकाः । तदित्याश्चर्यम् । मे इति त्वद्भक्ति-जुषः । प्रसन्न इति मायाकालुष्यशान्त्यान्तर्नैर्मल्यं गतः । जगन्नाथेति वाक्यान्तरस्थत्वात् न पुनरुक्तम् । यतो जगन्नाथोऽसि अतोऽहं प्रपन्ना त्वदाराधनैकपरा सती त्वां प्रार्थये एतत् निःशेषं मे प्रपन्नाया वक्तुमर्हसि ॥ ८ ॥

अत्र तंत्रावतारकः सङ्गतिं करोति

एवं देव्या वचः श्रुत्वा
प्रहासवदनोऽब्रवीत् ॥ ९ ॥

प्रकृष्टो हासः परनादद्दशासमावेशोऽट्टहासो वदनेऽभिधाने यस्य

'अदृष्टविग्रहाच्छान्ताच्छिवात्परमकारणात् ।
ध्वनिरूपं विनिष्क्रान्तं शास्त्रम् ।'

इत्याम्नायेषूक्तत्वात् । अथच प्रहाससात्त्विक-भावोदयात् प्रफुल्लं वक्त्रं यस्य ॥ ९ ॥

किमब्रवीदित्याह

श्रीभगवानुवाच

किं किं वदस्व सुश्रोणि
रहस्यं ते हृदि स्थितम् ।

सर्वं वक्ष्याम्यसंदेहं
तोषितोऽहं त्वयानघे ॥१०॥

यतोऽवसरज्ञतया परानुजिघृक्षाप्रवणतया च अहं त्वया तोषितः, अतः सर्वं रहस्यं निःसन्देहं ते वक्ष्यामि किं किं ते हृदये स्थितं वदस्व इत्युक्त्या विशेषप्रश्ने देवीं प्रोत्साहयति। अथ च यद्रहस्यं तत्ते हृदि स्वान्तरवस्थितं केवल-मनुन्मीलितम्। वदासि इति पाठे स्पष्टोऽर्थः।१०।

एवं देवेन सामान्येन वक्तुं यत् प्रतिज्ञातं तद्दृढीकर्तुं

श्रीदेव्युवाच

भगवन्देवदेवेश
चित्राश्चर्यप्रवर्तक ।
आश्चर्यमीदृशं रम्यं
न श्रुतं तच्छृणोम्यहम् ॥११॥
विभो प्रसन्नवदन
परमानन्दकारक ।

---

१ वरदेति पाठः

अमात्सर्येण भगव-
न्कथनीयं त्वया मम ॥ १२ ॥

ईदृशमिति हृत्स्थितं स्फुटीकरिष्यमाणं न श्रुतमिति नाद्यापि निर्णीततत्त्वं तत् शृणोमि अधिजिगमिषामि ॥ १२ ॥

एतत् स्फुटयति

यत्तदापोऽमयं देव
चक्षुः सर्वत्र दृश्यते ।
तस्मादग्निः कथं रौद्र
उत्पन्नः कालदाहकः ॥ १३ ॥
येन वै दृष्टमात्रस्तु
मित्रजो भस्मसात्कृतः ।
किं तद्रौद्रं कृतं देव
वह्निकालदिधक्षया ॥ १४ ॥
प्रज्वालितं जगत्सर्वं
ब्रह्मादिस्थावरान्तकम् ।

कामस्तथैव निर्दग्धो
लीलया परमेश्वर ॥ १५ ॥

क्रोधनेत्रानलं नाथ
दृश्यते यन्न कस्यचित् ।
कृतं यद्देवदेवेन
महाविस्मयकारकम् ॥ १६ ॥

देव नेत्रान्तरे वह्नि-
स्त्वदृते कस्य दृश्यते ।
किं वा वह्निमयं चक्षु-
स्तत्कथं न विभाव्यते ॥ १७॥

येन वै चक्षुषा कृत्स्नं
प्रसरंश्च जगत्पते ।
सर्वामृतमयेनैव
जगदाप्यायसे क्षणात् ॥१८॥

मामानन्दयसे देव
प्रसन्नेनैव चक्षुषा ।
अमृताकारवच्छुभ्रं
जगदाप्यायकारकम् ॥ १९ ॥

तस्मात्कालानलप्रख्यः
कुतो वह्निः प्रजायते ।
एतत्सर्वं समासेन
भगवन्वक्तुमर्हसि ॥ २० ॥

यच्चक्षुरिति गोलकरूपं दृश्यते सर्वैरुपलभ्यते तदाप इति सितरूपबाहुल्यात्

'मम नेत्रोदकं देवि.....।
दशधा निःसृता गंगा ।' (स्व० १०।१७९)

इति श्रीमत्स्वच्छन्दे देवेनाभिहितत्वाच्च अब्रूपम्। यद्यपि तार्किकैस्तेजोरूपमनुमीयते चक्षुः तथापि यद् दृश्यते तदुक्तहेतोरब्रूपमेव, अत एवामयं न विद्यते मयो हिंसा यतस्तस्मात्

कालदाही कथमिति विरुद्धोऽग्निर्जातः। किं तद् रौद्रं कृतमिति कालकामादिदाहाय जगत्प्रदीपकं त्वया एतत् स्वातन्त्र्यात् किंवा उत्थापितं यद् यस्मात् क्रोधावसरे न कस्यापीक्ष्यते तन्नूनं देवदेवेन सर्वेन्द्रियशक्तिचक्रभासकेन भूष्णुना एतदीदृक् कृतम्। तच्च त्वामृते अन्यत्रादृश्यमानत्वात् महदाश्चर्यकृत्। किंवा इति कालदाहादिकार्यानुगुण्यात् अन्यैस्तथाभ्युपगमाच्च यदि वाह्नं चक्षुः तत् कथमन्यप्रकाशहेतुर्दीपादिवत् न दृश्यते मा वा तथा दार्शि कथं तु अनेन वाह्नेन त्वं प्रसरन् जगदाप्यायसे मामानन्दयसि च अमृताकारः। तदिति तदेतस्मात् कारणात् तर्हि अमृतोदयहेतोरेतत् कथं, कथं च अमृतमयादस्मात् कालकामादिदाही कालाग्निकल्पो जातः, — इत्येतद्विरुद्धमाभासमानं समर्थयस्व परमेश्वरेति॥ २०॥

देव्या पृष्टः

श्रीभगवानुवाच

अतिकौतूहलाविष्टा
पृच्छस्येतच्छृणु प्रिये ।

शृणु इत्युक्त्या देवीमभिमुखीकृत्य विशेष-निश्चयं कर्तुं प्रतिजानीते

यन्मे नेत्रान्तरे वह्नि-
र्यद्वामृतमनुत्तमम् ॥ २१ ॥
तत्सर्वं कथयिष्यामि
योगयुक्त्या शृणु प्रिये ।

मन्नेत्रान्तर्वह्न्यमृतद्वयं यदनुत्तमं रहस्यमिति प्रागुक्तम्, अतश्च पाशानां कालादेश्च दाहकं परधामावेशात्म जगदाप्यायकृत् यद् योगयुक्त्या पराद्वयस्फारानुप्रवेशेन कथयिष्यामि त्वं च तथैव शृणु अन्तर्विमृश । तदेतदादिवाक्यम् । अत्र परवह्न्यमृतात्मनेत्ररहस्य-

मभिधेयम्। तस्य अनुत्तमामिति विशेषेणेन भोगमोक्षाख्यं प्रयोजनं प्रत्युपायत्वं सूचितम्। परादिरदिव्यान्तः षोढा संबन्धः प्रसिद्ध एव ॥ २१ ॥

नेत्रतत्त्वाभिधायित्वात् नेत्रमिति अस्य नाम प्रतिज्ञातं स्फुटयति

यत्स्वरूपं निजं शुद्धं
व्यापकं सर्वतोमुखम् ॥२२॥
सर्वभूतान्तरावस्थं
सर्वप्राणिषु जीवनम्।
योगगम्यं दुरासादं
दुष्प्रापमकृतात्मभिः ॥ २३ ॥
स्वं स्ववीर्यं स्वसंवेद्यं
ममैव परमं पदम्।
तद्वीर्यं सर्ववीर्याणां
तद्वै बलवतां बलम् ॥ २४ ॥

तदोजश्चोजसां सर्वं
शाश्वतं ह्यचलं ध्रुवम् ।
सा ममेच्छा परा शक्तिः
शक्तियुक्ता स्वभावजा ॥२५॥

वह्नेरूष्मेव विज्ञेया
रश्मिरूपा रवेरिव ।
सर्वस्य जगतो वापि
स्वा शक्तिः कारणात्मिका २६

सवज्ञादगुणास्तत्र
व्यक्ताव्यक्ताश्च संस्थिताः ।
सैवेच्छा ज्ञानरूपाच
क्रियादिगुणविस्तृता ॥२७॥

ज्ञानादिषड्गुणा ये ते
तत्रस्थाः प्रभवन्ति हि ।

सां वै महाक्रियारूपा
संस्थितैका क्रिया मता॥ २८॥
अणिमादिगुणानष्टौ
करोति विकरोति सा ।
एवं ममेच्छा ज्ञानाख्या
क्रियाख्या शक्तिरुच्यते॥ २९॥
सूर्याचन्द्रमसौ वह्नि-
स्त्रिधामपरिकल्पना ।
त्रिनेत्रकल्पना मह्यं
तदर्थमिह दृश्यते ॥ ३० ॥
दहनाप्यायने तेन
प्राक्काश्यं विदधाम्यहम् ।

यत् निजमात्मीयं विशेषानुपादानात् प्रमेय-प्रमाणप्रमातृरूपस्य विश्वस्य स्वं स्वरूपमात्मीयो यश्चिदात्माशेषव्यवस्थाहेतुः स्वभावत एव शुद्धं व्यापकं स्वभित्तौ विश्वोद्भासकमपि

न विश्वेनाच्छादितं दर्पणवत् सर्वतो मुखानि प्रसरन्त्यः शक्तयो यस्य सर्वाणि च नीलसुखादिज्ञानानि

'शैवी मुखमिहोच्यते ।' (वि० भै० श्लो० २०)

इति स्थित्या मुखानि प्राप्त्युपाया यस्य सर्वेण च रूपेण प्रधानं, सर्वेषां स्थावरादिब्रह्मान्तानां भूतानामन्तरवस्थमहन्तारूपतया स्फुरत्, सर्वेषु प्राणिषु अभिव्यक्तप्राणादिरूपेषु जीवनम् 'शाक् संवित् प्राणे परिणता' इति स्थित्या गृहीतप्राणादिभूमिकम्, अतश्च योगेन प्राणादिप्रामातृताप्रशमनेन गम्यम्, दुःखेनासादनीयम्

'नचैतदप्रसन्नेन शंकरेणोपलभ्यते ।'

इति नीत्या शक्तिपातवतैवोपदेशगम्यं, दुःखेन च प्राप्यते,

'कथंचिदुपलब्धेऽपि वासना न प्रजायते ।'

इत्यादिस्थित्या कैश्चिदेवापश्चिमजन्मभिरभियुक्तैः नतु अनिश्चितमतिभिः प्राप्यम्,

स्वस्यात्मनश्चित्प्रकाशस्य स्वं वीर्यं विश्वनिर्मातृ विमर्शशक्त्यात्म बलम्। यच्छ्रीकालीकुलम्

'तस्य देवादिदेवस्य परबोधस्वरूपिणः।
विमर्शः परमा शक्तिः सर्वज्ञा ज्ञानशालिनी ॥'

इति। स्वसंवेद्यं स्वप्रकाशं ममैवेति ममोमापतेः परममेव पदम्। एवकारो भिन्नक्रमः। विचित्राणां मन्त्रमुद्रादिसर्ववीर्याणामपि वीर्यम्। बलवतां पवनादीनां तदेव बलम्। सर्वौजसां तदेवौजः। यदुक्तम्

'शक्याशक्यपरामर्शमनपेक्ष्य प्रवर्तनम्।
तेज इत्युदितं सद्भिः संवेदननभस्वतः ॥'

इति। तच्च सर्वं विश्वात्मकं शाश्वतमविवर्तमचलमपरिणामि ध्रुवं नित्यम्। सेति यदेवंभूतं वीर्यं मम सम्बन्धिनी परा शक्तिः इच्छा इच्छारूपतां प्राप्ता। कीदृगिच्छा स्वभावजा सहजा शक्तियुक्ता गर्भीकृताशेषविश्वशक्त्यभेदविमर्शेति यावत्। उक्तं च श्रीपूर्वे

'या सा शक्तिर्जगद्धातुः कथिता समवायिनी।
इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते ॥'

(मा० वि० ३।९)

इत्यादि । स्वभावजेति स्फुटयति वह्नेः रूष्मेव रवेः रश्मिरूपेव च इति शक्तियुक्तेति च व्यनक्ति । सर्वस्येत्यनेन सर्वस्यापि जगतः कारणात्मिका निर्मात्री स्वा आत्मीया चिदानन्दस्वरूपसम्बन्धिनी शक्तिः नतु व्यतिरिक्ता । सर्वज्ञेति सर्वज्ञत्वादयो ये गुणास्तेऽपि तत्र प्रथमेच्छायां व्यक्ताव्यक्ता इत्यासूत्रितरूपाः स्थिताः । सैव इच्छेति इच्छाशक्तिरेव

'एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ॥' (मा०वि० ३।७)

इति श्रीपूर्वोक्तनीत्या ज्ञानशक्तित्वमापाद्य

'एवंभूतामिदं वस्तु भवत्विति यदा पुनः ।
जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रियोच्यते ॥' (मा०वि० ३।८)

इति स्थित्या क्रियाशक्तिः संपन्ना । कीदृशी गुणैर्विस्तृता निःशेषैः कार्यैर्धर्मरूपैर्वैतत्यं प्राप्ता । ज्ञानादीति ये पूर्वमिच्छायामासूत्रितकल्पा उक्ताः सर्वज्ञत्वादयस्ते तत्र क्रियाशक्तौ स्थिता ईश्वरभट्टारकपदे स्फुटीभूताः प्रभवन्ति विजृ-

म्भन्ते। 'ह्रीति यत एवमतो युक्तमुक्तं प्राक् व्यक्ताव्यक्ता इति। सैव महाक्रियेति ईश्वरभट्टारकात्मा क्रियाशक्तिरूपा सैव क्रिया विश्वनिर्माणे प्रभोः कारणरूपा एका अद्वितीया मता। सैव च अणिमादीन् करोति जनयति विकरोति स्थापयति संहरति चेत्यर्थः। एवमुक्तनीत्या मम शक्तिः स्वातन्त्र्यरूपा इच्छादित्रयात्मोच्यते। सूर्येति इच्छादिशक्तित्रय एव मध्यदक्षिणवाममार्गेषु वह्निसूर्यसोमकल्पना अन्तर्बहिरपि चेच्छादिशक्तिस्फाररूपा एव सूर्यादयः। यदुक्तं श्रीस्वच्छन्दे

'ज्ञानशक्तिः प्रभोरेषा तपत्यादित्यविग्रहा।
तपते चन्द्ररूपेण क्रियाशक्तिः॥' (स्व० १०।४९८)

इत्यादि। त्रिनेत्रेति मह्यं मंदाकृतिव्यक्तये त्रिनेत्रकल्पना नेत्रत्रयोन्मीलनेह दृश्यते। सापि तदर्थमिति निर्णीतधामत्रयाधिष्ठातृशक्तित्रयाभिव्यक्तये। यदुक्तं भारतेऽपि

'तिस्रो देव्यो यदा चैनं नित्यमेवाभ्युपासते ।
त्र्यम्बकस्तु तदा ज्ञेयः.....॥'

इति । दहनेति यत एवं परममेव धामोक्त-युक्त्या नेत्ररूपं तेन कालकामदाहजगदाप्या-यप्रकाशनादि यत् करोमि तद् युक्तमेव सर्व-शक्तेश्चिद्धाम्नः किमसाध्यमस्ति इति यावत् ।

अत एव च

सृष्टिं स्थितिं संहृतिं च
त्रितनुर्विदधाम्यहम् ॥ ३१ ॥

तिस्रो ब्रह्मविष्णुरुद्रास्तनवो यस्य सोऽह-मेक एव चिन्मयः क्रमेण सृष्ट्यादि करोमि । अथ च गृहीतानाश्रितसदाशिवेश्वरमूर्तिः स्वा-धाराध्वविषये सृष्ट्यादिरूपं चकारात् विलया-नुग्रहौ चेति पंचकृत्यादि अहमेवैकः करोमि नतु मद्व्यतिरिक्तास्ते केचित् । एवमीदृशं स्प-

१ करोति० इति क० पु० पाठः

ष्टमक्षरार्थं परित्यज्य ये ब्रह्माद्यधिष्ठानेन भगवतः सृष्ट्यादिकृत्त्वमाहुस्ते भ्रान्ता एव ॥ ३१ ॥

किंच

तद्वीर्यापूरितं सर्वं
मम तेजोपबृंहितम् ।
इच्छाज्ञानक्रियारूपं
नेत्रामृतमनुत्तमम् ॥ ३२ ॥

तेन प्रोक्तस्वातन्त्र्यशक्त्यात्मना रितं यन्मदीयं चित्प्रकाशात्मोपबृंहितं व्यापकमाप्यायादिकारि च तेजः इच्छादिशक्तित्रयसामरस्यात्म तत् निरूपयिष्यमाणनयनत्राणादिधर्मतया नेत्रमविनाशिपरमानन्दमयत्वाच्च अमृतम् अविद्यमानमन्यदुत्तमं यस्मात् तादृक् अनुत्तममुच्यते ।

किंच

तद्वीर्यं परमं धाम
यत्परामृतरूपिणम् ।

यत्तत्तत्परमानन्दं
यदेतत्परमं पदम् ॥ ३३ ॥
तदेतन्निष्कलं ज्ञानं
विशुद्धं नेत्रमुत्तमम् ।

तत् प्रागुक्तस्वातन्त्र्यशक्त्यात्म वीर्यं सूर्यादिप्रकाशकृत्त्वात् परमं धाम चिद्रूपत्वेनाविनाशित्वात् परामृतात्म च । यत्तत्तदिति ब्रह्म परमानन्दरूपं, यदेतादिति सदा स्वप्रकाशं बाह्याभ्यन्तराशेषविश्वप्रतिष्ठास्थानत्वात् परमं प्रकृष्टं पदं धाम । तदेतदिति तच्छब्देनोक्तपरामर्शरूपिणा स्फुटमिव यत् सर्वत्र परामृष्टमभूत् तदधुना स्फुटीकृतमिति,—एतच्छब्देन सह तच्छब्दः प्रत्यभिज्ञानमात्मतत्त्वविषयं दर्शयति । निष्कलं सकलकलाभ्यो निष्क्रान्तं, निष्क्रान्ताश्च कला यतस्तादृक् विशुद्धं परमाद्वयात्म यज्ज्ञानं चित् तत्

नेत्रमुच्यते, नतु प्रश्नग्रन्थशंकिताब्रूपगोलक रूपं नित्यानुमेयतैजसाक्षिरूपं वा ॥ ३३ ॥

यत एवमेतत्

मृत्युजित्तेन चाख्यातं
सर्वेषां मोक्षदायकम् ॥ ३४ ॥
तत्सिद्धिदं परं देवं
सर्वदुःखविमोक्षदम् ।

च एवार्थे । तेनेति निष्कलचिदात्मना रूपेण मृत्युजिदेतदुक्तं भाविमृत्युञ्जयप्रकारासूत्रणं चैतत् । सर्वेषां मोक्षदायकमित्यनेन नित्यकर्मदीक्षाभिषेकाधिकारा उपक्षिप्ताः । वक्ष्यति च

'विप्रादिप्राणिनः सर्वे सर्वदोषभयार्दिताः ।
येन वै स्मृतिमात्रेण मुच्यन्ते ॥' (२।१६)

इति । सर्वेषामित्यनेन च वक्ष्यमाणपराद्वयव्याप्त्या सर्वस्रोतःप्रसिद्धतत्तद्देवतोपासिनां विष्ण्वादिसुगतान्ताराधिनां तुल्यैव मोक्षभू-

मिरित्यासूत्रितम् । तत्सिद्धिदमिति भाविसिद्ध्यधिकारोपक्षेपः । परं देवमिति द्योतनादिसतत्त्वस्वरूपसमावेशः कटाक्षितः । यद्वक्ष्यति

' निमेषोन्मेषमात्रेण यदि चैवोपलभ्यते ।
ततः प्रभृति मुक्तोऽसौ न पुनर्जन्म चाप्नुयात् ॥'(८।९

इति । अत एव परसत्तानुप्रविष्टानां देहादिप्रमातृतां विना भाविदुःखास्पर्शात् सर्वदुःखविमोक्षदम् ॥ ३४ ॥

सर्वव्याधिहरं देवं
सर्वामयहरं शिवम् ॥ ३५ ॥

दारिद्र्यशमनं नित्यं
मृत्युजित्सर्वतोमुखम् ।

सर्वान् विविधान् आधीन् आमयांश्च ज्वरादिरोगान् षष्ठपञ्चदशाधिकारवक्ष्यमाणमन्त्रयन्त्रादिविचित्राकारैर्हरति, अतश्च शिवं श्रेयोरूपम् । दारिद्र्यशमनमिति अष्टादशाधिकारवक्ष्यमाणश्रीमहालक्ष्मीयागादिविधिरुपक्षिप्तः । नित्यं

मृत्युजिदित्यनेनाष्टमाधिकार उक्तः परो मृत्युञ्जयप्रकारः कटाक्षितः। सर्वतोमुखं च कृत्वा मृत्युजिदित्यनेन सप्तमाधिकारगतसूक्ष्मध्यानहेतुको मृत्युजित्प्रकारः तथा ध्यानहोमादिजा अपि तत्प्रकाराः सूचिताः। यद्वक्ष्यति

'यदा व्याधिभिराक्रान्तस्त्वपमृत्युगतोऽपि वा।
तदा श्वेतोपचारेण पूज्यं क्षीरघृतेन वा॥
तिलैः क्षीरसमिद्भिर्वा होमाच्छान्तिं समश्नुते।' (६।३८)

इत्यादि॥ ३५॥

अपिच

अमोघममलं शान्तं
सर्वदं सर्वमोचनम्॥ ३६॥
सूर्यकोटिसहस्राणा
वह्न्ययुतसहस्रशः।
यत्तेजसा समं तस्य
कलां नार्घति षोडशीम्॥ ३७॥

सर्वतेजोमयं यस्मा-
त्त्वप्रधृष्यं सुरासुरैः ।
तेन नेत्राग्निना सर्वं
निर्दहामि क्षणाद्ध्रुवम् ॥३८॥
तेनैवाप्यायनं भूयः
प्राकाश्यं विदधामि च ।

परमानन्दात्मकपार्यन्तिकफलात्मकत्वात् अमोघम् । सदा सर्वावस्थं द्योतमानत्वात् अमलम् । भेदोपशमात् शान्तं चिन्मात्ररूपं तथापि सर्वदं विश्वनिर्मातृसर्गादिकर्तृत्वेऽपि अनुग्रहैकपरत्वात् सर्वमोचनं सर्वमायुर्बलादि ददाति । यद्वक्ष्यति

"आयुर्बलं यशः प्रीतिर्धृतिर्मेधा वपुः श्रियः ।
सर्वं प्रवर्तते तस्य भूभृतां राज्यमुत्तमम् ॥" (६।४७)

इत्यादि । निःसंख्यसूर्यवह्न्यादीनां तेजसा समं यत् किंचित् कल्पनया कल्प्यते तदपि कल्पितत्वादेव तस्येति प्रकृतस्य महाधाम्नः षोड-

शीमपि कलां नार्घति सूक्ष्मतमेनापि अंशेन न सदृशमकल्पितपरप्रमात्रेक्करूपत्वात् । अप्रधृष्यमनभिभवनीयम्, सर्वं निर्दहामीति महाप्रलयादौ का तु कथा कालकामयोः, ध्रुवं निश्चितं तेनैव च भूयः पुनराप्यायनं प्राकाश्यं चेति कल्पान्तान्ते सर्वविषयं करोमि का तु कथा क्षीणधातुजन्त्वाप्यायमारुतादद्यादृताकाशनस्य । अनेन चैकविंशाधिकारभाविसृष्ट्याद्युपक्षिप्तम् ॥ ३८ ॥

किंच

तस्मात्परतरं नान्य-
त्किंचिद्वीर्यं प्रदृश्यते[1] ॥३९॥
तदेवास्त्रमयं रौद्र-
मणुसंन्तारणं परम् ।

एतदेव परमं वीर्यम् । यद्वक्ष्यति

' मन्त्रकोट्यो ह्यनन्ताश्च व्यक्ताव्यक्ता व्यवस्थिताः ।
सर्वास्ताः सिद्धिदास्तेन आद्यन्तनुटिरोधिताः' (१४।९)

१ प्रकाश्यते इति क० पु० पाठः ।

इति । अनेन चतुर्दशद्वाविंशाधिकारस्थं सर्वमन्त्रोत्तमत्वमुद्दिष्टम्, अत एव रौद्रं भेदच्छेदि अस्त्रमयं ज्ञानासिरूपं सदणूनां जीवानां परमेतत्सन्तारणम् ॥ ३९ ॥

तथा

क्षयदं सर्वशत्रूणां
शस्त्रं ह्येतत्प्रकीर्तितम्॥४०॥
सर्वेषामेव भूताना-
मायुर्धत्ते तदायुधम् ।

सर्वशत्रुक्षयहेतुत्वात् शस्त्रं शसेर्हिंसार्थत्वात्। यद्वक्ष्यति

'परराष्ट्रविभीतानां नृपाणां विजयावहम् ।' (१७।६)

इति । सर्वेषामिति स्थावरादीनां चतुर्दशानां भूतानामायुः प्राणान् धत्ते स्वच्छस्वतन्त्रचिदेकरूपत्वात् तच्चायुधं विशेषानुक्तेः सर्वं महावीर्यरूपत्वात् ॥ ४० ॥

तदाह

तदेकं बहुधा वीर्यं
भेदानन्त्यविसर्पितम् ॥ ४१ ॥

भेदानन्त्येन नानावैचित्र्येण प्रसृतम् ॥ ४१ ॥

एतदेव स्फुटयति

महापाशुपतं मह्यं
विष्णोस्तच्च सुदर्शनः ।
ब्रह्मणो ब्रह्मदण्डस्तु
सर्वेषां स्वं स्वमायुधम् ॥४२॥

मह्यमिति मदर्थं, स्पष्टं शिष्टम् ॥ ४२ ॥

यच्चैतत्

अनेकाकाररूपेण
आयुधं तदनेकधा ।
सुराणां स्वं स्वरूपेण
मया वीर्यं समर्पितम् ॥ ४३ ॥

सर्वेषां देवानामनेकाकाररूपेण स्वरूपेण सह अनेकायुधं यत् तन्मया स्वं वीर्यं समर्पितं तथा तथा वैचित्र्येणाभासितमिति यावत् ॥ ४३ ॥

नन्वेकः शिवोऽविकारी तच्छक्तिश्चापि अतो न तौ शक्तौ बहुधा स्थातुं, यद्वा चैतन्यविनाकृतौ विकारित्वादिति भेदवादिभिर्युक्तिरुपक्षिप्ता, तत् कथमेतदुच्यते

योगशक्त्या तु योगेशे
तेन व्याप्तमिदं जगत् ।

'योगोऽस्य शक्तयः स्वाक्या विस्फूर्जन्ति समन्ततः ॥'
इत्याम्नायोक्तनीत्या योगस्य वामादिशक्तीनां या शक्तिः सामर्थ्यं तया जगत् विश्वं तेन व्याप्तं प्रत्यंशमोतं प्रोतं तदैकात्म्येनेति यावत् । तदुक्तं शिवसूत्रेषु

'स्वशक्तिप्रचयोऽस्य विश्वम् ।' (शि० ३।३०)

इति ॥

किंच

भीतानां सा परा रक्षा
त्रस्तानामभयं परम् ॥४४॥
शत्रुभिश्चार्दितानां तु
मोक्षदं परमं ध्रुवम् ।

भीतानामिति एकोनविंशाधिकारवक्ष्यमाणतत्तच्छायादोषभूतग्रहयक्षशाकिन्यादिमुद्रितानां परा रक्षा तदधिकारवक्ष्यमाणं परमुन्मुद्रणम् । त्रस्तानां च परमभयम् । यद्वक्ष्यति

'त्राणं करोति सर्वेषां तारणं त्रस्तचेतसाम्' (२२।१२)

इति । त्रासो हृद्धृदनं तीव्रं भयम्, शत्रुभिश्चार्दितानां च परमभयम् । यद्वक्ष्यति

'संग्रामकाले ध्यातव्या खड्गपत्रलतास्थिता ।
जयं प्रयच्छतेऽवश्यं रिपुदर्पापहा भवेत् ॥' (१८।८३)

इत्येतन्मन्त्रराजं महालक्ष्मीमुद्दिश्य । ध्रुवं निश्चितं, परमं मोक्षदमित्येतदस्य मुख्यं स्वरूपम् ॥

उपसंहरति

किं वातिविस्तरोक्तेन
पौनःपुन्येन सुन्दरि ॥४५॥
यद्यत्तीव्रतरं रौद्रं
श्रीमदूर्जितमेव वा ।
प्रसादं वरदं श्रेयः
प्राकाश्यं तत्तदेव हि ॥४६॥
तज्ज्ञेयमप्रमेयं च
ज्ञानं मन्त्रमहाबलम् ।
त्रातारं सर्वभूतानां
गुप्तं गोप्यं सदा त्वया॥४७॥
तवाद्य कथितं देवि
किं भूयः परिपृच्छसि ।

तीव्रतरं झटिति अशक्यमपि घटयेत्, रौद्रं संहर्तृ, श्रीमत् महाविभूति, ऊर्जितमसामान्यबलम्, प्रसादमतिनिर्मलम्, वरदं यथाभीष्टप्रदम्, श्रेयः प्रशान्ताशेषक्लेशस्वात्मविश्रान्ति-

सारं, प्रकाश एव प्राकाश्यं सूर्यसोमवह्न्यादि-ज्योतीरूपम्, यद्यदिति षडध्वमध्ये यत्किंचि-दस्ति तत्सर्वं तदेवेति प्रोक्तप्रकाशानन्दघनस्व-रूपमित्यनेन सर्वोत्कर्षाशेषविश्वमयत्वं भगवतो नेत्रनाथस्योक्तम्। हीति यत एवं तस्मात् किं वातिविस्तरोक्तेनेति संगतिः। अनेन च वैश्वा-त्म्यप्रकाशनेन षोडशाधिकारदर्शयिष्यमाणस-र्वाचारसतत्त्वमुपक्षिप्तम्। तदेव च तत्त्वं विश्वो-त्तमत्वाज्ज्ञातव्यं सार्वात्म्याच्च ज्ञातुं शक्यमहं च। अथ चाप्रमेयं ज्ञानमनवच्छिन्नसंविद्रूपं न तु कस्यापि प्रमाणस्य गोचरः। तदुक्तं त्रिक-हृदये

'स्वपदा स्वशिरश्छायां यथा लङ्घितुमीहते।
पादोद्देशे शिरो न स्यात्तथेयं वैन्दवी कला॥'


इति। प्रत्यभिज्ञायामपि

'विश्ववैचित्र्यचित्रस्य .....' (२।३।१५)

इति। मन्त्राणां कोटिसंख्याकानां महद्बलं परमं वीर्यम्। एतच्च चतुर्दशैकविंशद्द्वाविंशाधिकारेषु

भविष्यदुपक्षिप्तम् । एतच्च सर्वभूतानां त्राणेन नानानुग्रहप्रपञ्चेन तारं दीप्तं, त्राणं त्रा तया तारं यत एवं तेनैतद्गुप्तं परं रहस्यम् । अतश्च गोप्यं रक्षणीयं शक्तिपातवतामेव प्रकाश्यं त्वया नान्येषाम् । तव चैतद्योग्याया अतितीव्रशक्तिपातेन परतत्त्वजिज्ञासावसरे कथितम् । 'किं भूयः परिपृच्छसि' इति भाविप्रमेयावकाशदानाय पाटलिकसंगत्यर्थमिति शिवम् ॥

अशेषविश्ववैश्वात्म्यसामरस्येन सुन्दरम् ।
चिदानन्दघनं श्रीमन्नेत्रमैशमुपास्महे ॥



इति श्रीनेत्रतन्त्रे
श्रीमहामाहेश्वराचार्यवर्य-श्रीक्षेमराजविरचितोद्द्योताख्य-
टीकोपेते प्रथमः पटलः ॥ १ ॥

श्रीमत्प्रतापभूभर्तुराज्ञया प्रीतये सताम् ।
मधुसूदनकौलेन संपाद्याऽयं प्रकाशितः ॥

श्रीमत्साम्बशिवार्पणं भूयात् ।

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते



द्वितीयः पटलः



अष्टमूर्तिं विश्वमूर्तिं यदमूर्तिं प्रगीयते ।
मन्त्रमूर्तिं नुमो नेत्रं तच्चिन्मूर्तिं महेशितुः ॥

'किं भूयः परिपृच्छसि' इत्युक्तया दत्तावकाशा अवगततत्त्वानुवादपुरःसरं जगदनुजिघृक्षया मन्त्रस्वरूपमवतितारयिषुः

श्रीदेव्युवाच

यद्येवं परमं शान्त-
मप्रमेयगुणालयम् ।
सर्वानुग्राहकं वीर्यं
तव देव मुखाच्छ्रुतम् ॥ १ ॥

भगवन्देवदेवेश
लोकानुग्रहकारक ।
त्रियोनिजमिदं सर्वं
तिर्यङ्मानुषदेवगम् ॥ २ ॥
आधिव्याधिभयोद्विग्नं
विषभूतभयार्दितम् ।
अपमृत्युशताकीर्णं
ज्वरकासक्षयान्वितम् ॥ ३ ॥
भूर्भुवर्मानुषे लोके
विप्रादिप्राणिनस्तथा ।
दुःखदोषशताकीर्णाः
कृतस्तेषां सुखं विभो ॥ ४ ॥
युगानुरूपमानन
तेषामायुः स्वमानतः ।

जिघांसन्ति बलोपेता-
स्त्वत्तेजोबलवृंहिताः ॥ ५ ॥
अनेकशतशो भेदै-
र्व्याधिभिश्च सुपीडिताः।
तेषामनुग्रहार्थाय
कृपया प्राणिनां हितम् ॥६॥
वदोपायं जगन्नाथ
मुच्यन्ते येन सर्वतः।

आमन्त्रणानि प्राग्वत्। पूर्वाधिकारे यत्परमं वीर्यं निर्णीतं शान्तत्वादिविशिष्टं तव मुखाच्छ्रुतं यद्येवमुक्तदृशा सर्वानुग्राहकं, तत् भगवन् विश्वानुग्राहक व्याध्याद्याकीर्णो यश्चतुर्दशविधो भूतसर्गः ये च भूर्भुवर्मानुषे लोके विप्राद्यास्ते निःसंख्यैर्दुःखैः रागद्वेषादिदोषैश्चाकीर्णास्तेषां च युगानुसारपरिमितमप्यायुः,त्वदीयतेजोबलाभ्यां स्फीता अर्थात् शाकिनीभूतयक्षग्रहाद्या व्या-

धिभिः सह हन्तुमिच्छन्ति, ततस्तेषां सर्वेषां प्राणिनां कृपयानुग्रहं कर्तुं हितमुपायमादिश, येनैते सुष्ठु पीडिताः सर्वे मुच्यन्ते निवृत्तसर्वोपद्रवा अपवृज्यन्ते ॥६॥

ततश्च

येन येन प्रकारेण
ज्ञानयोगेन मन्त्रतः ॥७॥
यद्यत्पश्यसि देवेश
तदुपायं वद स्व मे

हे देवेश स्व आत्मन् ज्ञानयोगमन्त्रानाश्रित्य येन येन स्थूलेन सूक्ष्मेण परेण वोपायेन तत्प्रश्नितं श्रेयो यत् पश्यसि तस्योपायं वद ॥

अत्र तन्त्रावतारकः सङ्गतिं करोति

एवं देव्या वचः श्रुत्वा
प्रहस्योवाच शंकरः ॥ ८ ॥

प्रहस्येति योगयुक्त्या कथयिष्यामि,—इत्यादिष्टत्वात् परस्फुरत्तासमावेशाद्विहस्य, अथ च प्राङ्निरूपितनीत्या नादामर्शावेशादट्टहासं कृत्वा, किं तत् यदेतस्य भगवतोऽसाध्यमिति स्मितं विधाय ॥ ८ ॥

श्रीभगवानुवाच

अतिकारुण्यमाविष्टा
देवि त्वं पृच्छसीह माम् ।
न केनचिदहं पृष्टो
नाख्यातं कस्यचिन्मया ॥९॥

यदिहातिकृपया त्वयाहं पृष्टस्तथा न केनचिदहं पृष्टः, अतश्च 'नापृष्टः कस्यचिद्ब्रूयात्' इति नीत्या मयापि न कस्यचिदाख्यातम् ॥९॥

अतश्च

सत्सु मन्त्रेषु सर्वेषु
नेत्रभूतं प्रकीर्तितम् ।

ममाशये न केनापि
लक्षितं तु सुदुर्लभम् ॥१०॥

तवाद्य कथयिष्यामि
त्रिप्रकारं परं ध्रुवम् ।
मन्त्रयोगज्ञानगम्यं
मोक्षदं सिद्धिदं वम् ॥११॥

यत्त्वया नेत्रस्वरूपं पृष्टं सत्सु प्रधानतया विद्यमानेषु सार्धत्रिकोटिरूपेषु मन्त्रेषु मध्ये विषयेषु च नेत्रभूतं यथा नेत्रमितरेन्द्रियमध्ये प्रधानभूतं, सत्सु विद्यमानेषु भावेषु प्रकाशकं च प्रकीर्तितं तथैवैतत् । यद्वक्ष्यति

'सर्वसाधारणो देवः सर्वसिद्धिफलप्रदः ।
सर्वेषामेव मन्त्राणां जीवभूतो यतः स्मृतः' (१३।४३)

इति । तच्च सर्वशास्त्रोपदेशावसरे ममाशयस्थं केनापि न ज्ञातं सर्वसर्वात्मनः पराद्वयस्य सर्वशास्त्रेषु गूढोक्त्यासूत्रितस्य भेदाधिवासितैर्दु-

रवंधारत्वातं सुष्ठु दुर्लभम् । एतन्मन्त्रयोग-ज्ञानगम्यत्वात् स्थूलसूक्ष्मपरोपायप्राप्यं त्रि-प्रकारं ध्रुवं नित्यं भोगमोक्षफलं तव योग्याया ध्रुवं निश्चितमद्य कथयिष्यामि,—इति सोपायस-प्रयोजनवस्तुतत्त्वप्रतिपादनं पुनरपि विशेषतः प्रतिजानीते अत्यन्तोपादेयत्वादस्यार्थस्य ॥११॥

तत्र

आदौ मन्त्रमयं वक्ष्ये
सिद्धित्रयसमन्वितम् ।
साङ्गं स्वमुद्रया युक्तं
सर्वत्राणकरं परम् ॥ १२ ॥

यदुपक्रान्तं परं रूपं तद्बोधस्य विमर्शसार-त्वान्मन्त्रः प्रकृतं रूपं यस्य तादृक्, भाविभौमा-न्तरिक्षदिव्यत्वभिन्नसिद्धित्रययुक्, हृदयाद्यङ्ग-षट्कसहितं, भाविपद्मामृतमुद्रया युक्तं, सर्वत्राण-कृत् विश्वानुग्रहकृत्, वक्ष्यामि,-इति मन्त्रविषयैषा एतदधिकारप्रतिज्ञा ॥१२॥

किंच

भूतयक्षग्रहोन्माद-
शाकिनीयोगिनीगणैः ।
भगिनीरुद्रमात्रादि-
डावीडामरिकादिभिः॥ १३ ॥

रूपिकाभिरपस्मारैः
पिशाचैश्चाप्यनेकशः ।
ब्रह्मरक्षोग्रहाद्यैश्च
कोटिशो यदि मुद्रिताः ॥१४॥

अपमृत्युभिराक्रान्ताः
कालपाशैर्जिघांसिताः ।
राजानो राजतनया
राजपत्न्यो ह्यनेकशः ॥१५॥

विप्रादिप्राणिनः सर्वे
सर्वदोषभयार्दिताः ।

येनं वै स्मृतिमात्रेण
मुच्यन्ते तद्ब्रवीमि ते ॥१६॥

भूतादिभिर्यदि मुद्रिताः समापन्नापमृत्यवश्च कालपाशैर्हन्तुमिष्टाः प्राप्तमृत्यवो राजाद्याः प्रजापालकाः तत्पाल्या विप्राद्याः सर्वेभ्यो दोषेभ्यो व्याध्यादिभ्यो यद्भयं तेनार्दिताः यत्स्मृतेरेव मुच्यन्ते तन्मन्त्रस्वरूपं ते वच्मि,—इति संगतिः । भूताः शून्यकूपैकवृक्षचत्वरादिस्थानस्थाः । यक्षा बलिनः सत्त्वविशेषाः । ग्रहा बालग्रहरतिग्रहाद्याः । असंबद्धप्रलाप्यनिमित्तक्रोधकामादिचित्रचित्तवृत्तिदर्शी उन्मादः । रूपपरिवृत्त्यर्थं पशुशोणिताद्याकर्षिणी शाकिनी । पीठजा देव्यो योगिन्यः । ब्राह्म्याद्यंशकोत्था भगिन्यः । ब्राह्म्याद्यास्तु रुद्रमातरः । डाव्यो डामरिकाश्च श्रीसर्ववीरे

"परचित्तगतं ज्ञानं रूपस्य परिवर्तनम् ।
करोत्यमृतलुब्धा च ज्ञेया सा रुद्रडाकिनी ॥

इत्युपक्रम्य

डाव्यश्चैवंविधा ज्ञेया गुप्ताचारार्चने रताः ।
स्वादयन्ति नतु घ्नन्ति च्छिद्रान्वेषणतत्पराः ॥
डामर्यस्त्वपरा ज्ञेया मन्त्रतद्व्रतचेतसः ।
परामृतं समश्नन्ति मानुषं वाहयन्ति च ॥
पर्यटन्त्यखिलां पृथ्वीं रूपं कुर्वन्त्यनेकधा ।'

इति लक्षिताः । हिंसिका रूपिकाः । आकस्मिकपतननैःसङ्गफेणमोकादिकृदपस्मारः । श्मशानादिवासिन उल्कामुखाः पिशाचाः । ब्रह्मरक्षांसि राक्षसविशेषाः । ग्रहा अनिष्टराशिगता भौमाद्याः । वितत्य चैतत्स्वरूपमग्रे दर्शयिष्यामः ॥१६॥

अथ मन्त्रोद्धारे इतिकर्तव्यतामाह

भूप्रदेशे समे शुद्धे
चन्दनागुरुचर्चिते ।
कर्पूरामोदगन्धाढ्ये
कुङ्कुमामोदसेविते ॥ १७ ॥

आचार्यस्तु प्रसन्नात्मा
चन्दनागुरुचर्चितः ।
उष्णीषाद्यैराभरणै-
र्भूषितैः सुमहामतिः ॥ १८ ॥
पद्ममष्टदलं कृत्वा
मातृकां तत्र चालिखेत् ।

शुद्धे अमिश्रवर्णे। चन्दनेति चन्दनादिना आधारशक्तितया पूजिते इत्यर्थः। प्रसन्नः शिवसमावेशप्राप्तनैर्मल्य आत्मा यस्य। चन्दनेति कृतनित्यानुष्ठानः । सुष्ठु महामतिर्मातृकासतत्त्वज्ञः, अज्ञाता माता मातृका अशेषमन्त्रादिजननी ॥ १८ ॥

कथमित्याह

त्रितनुं मध्यतो न्यस्य
वर्गान्प्रागादितो लिखेत्॥ १९॥

त्रितनुमोंकारं, मध्यतः कर्णिकायां, वर्गान् कचटतपयशाद्यान् क्रमेण प्राच्याद्यैशान्यन्तम् ॥

इत्थं लिखित्वा पाठक्रमेणैव

पूजयेत्परया भक्त्या
पुष्पधूपादिविस्तरैः ।
मन्त्राणां मातरं देवि
प्रोद्धरेन्मन्त्रदेवताम् ॥२०॥

प्रोद्धरेदिति पूजानन्तरमित्यर्थः ॥ २० ॥

उद्धारमाह

विश्वाद्यं विश्वरूपान्तं
विंश्वहामृतकन्दलम् ।
ज्योतिर्ध्वनिः पराशक्तिः
शिव एकत्र संस्थितः ॥२१॥

विश्वाद्यं प्राथमिकवर्णं, विश्वरूपाया माया-

यां ईकारस्यान्तमन्तगमुवर्णम्, विश्वहा कालस्तद्वाची मकारः। अथच विश्वस्याद्यः स्रष्टा ब्रह्मा तद्वाचित्वादवर्णम्, तथा विश्वरूपस्य विष्णोरन्तो निश्चयो यस्य तदुवर्णम्, विश्वसंहर्ता रुद्रस्तद्वाचित्वान्मकारोऽपि तथेति वाच्यानुसार्यपि उद्धारः। अमृतमशेषविश्ववेद्याभेदवेदनात्मा बिन्दुः, कन्दलमर्धचन्द्रः, ज्योतिर्निरोधिका स्पष्टरेखात्मा, ध्वनिः सर्ववाचकाभेदविमर्शात्मा नादो हकलारूपः, पराशक्तिर्बिन्दुद्वयमध्यगा स्पष्टरेखा। अत्र नादेन नादान्तः स्वीकृतः, पराशक्त्यापि अधरवर्त्यपरादिशक्तिरूपाः शक्तिव्यापिनीसमनाशक्तयोऽन्तःकृताः। शिव उक्तविश्वाभेदविमर्शात्मा परनादरूपतया सर्वोपरि दर्शनीयः,—इति धूलिभेदक्रमः।

'ब्रह्मोपेन्द्रहराण्डवाच्यउमवागैक्यप्रथा नादभू-
म्यारोहाय गलत्स्ववेद्यशशभृल्लेखानिरोधान्तगा।
नादज्ञातृतलोर्ध्वयोर्विगलिते वेद्ये स्फुटान्तर्ध्वनि-
स्पर्शव्याप्तिपदा तदात्तमनना तत्त्वोन्मना तां स्तुमः॥'

इति हृद्भेदक्रमः । एकत्र संस्थित इत्युक्तितः पदार्थजातस्यैकप्रणवात्मता दर्शिता ॥२१॥

अस्य माहात्म्यमाह

अनेन ग्रथितं सर्वं
सूत्रे मणिगणा इव ।
अस्मान्मन्त्राः समुत्पन्नाः
सप्तकोट्योऽधिकारिणः॥२२॥

ग्रथितमुम्भितं व्याप्तमिति यावत् । सप्तकोट्यो मन्त्रा इति प्रथमसर्गे तावतामेवाधिकारोऽभूत् । अनन्तरं तु

‘ ..... जातमात्रे जगत्यथ ।
मन्त्राणां कोटयस्तिस्रः सार्धाः शिवनियोजिताः ।
अनुगृह्याणुसंघातं याताः पदमनामयम् ॥ ’(१।४१)

इति श्रीपूर्वेऽभिधानादर्धचतस्रः कोटयोऽधिकृताः ॥२२॥

द्वितीयबीजमुद्धरति

चित्रभानुपदान्तं तु
शशाङ्कशकलोदरम् ।
तदङ्कुशोर्ध्वविन्यस्तं
तिर्यग्गान्तोर्ध्वयोजितम्॥२३॥

चित्रभानुपदं पाद्ममाग्नेयपत्रं तदन्तस्थं कवर्गसंबन्धि ङवर्णं, तच्च शशाङ्कशकलमर्धचन्द्र उदरे मध्ये यस्य तादृक्, एवमुद्धारानुसारमग्नीषोमात्म ञवर्णं जातम् । तदङ्कुशस्योकारस्य ऊर्ध्वेति उपरि विन्यस्तं कार्यम् । तथा तिर्यग्गो वायुस्तत्पत्रे योऽन्तः पवर्गापेक्षया मकारस्तेन ऊर्ध्वयोजितं बिन्दुरूपयोजना यस्य । अत्र च बिन्दुरर्धचन्द्रादिप्रमेयांसूत्रणपरः ॥२३॥

अस्य माहात्म्यमाह

एतत्तत्परमं धाम
एतत्तत्परमामृतम् ।

चिदानन्दघनमित्यर्थः ॥

तृतीयमुद्धरति

यत्तत्परममुद्दिष्ट-
ममृतं लोकविश्रुतम् ॥२४॥
पीयूषकलया युक्तं
पूर्णचन्द्रप्रभोपमम् ।

यत्तदिति स्वसंवेद्यं सम्यक्स्वरूपस्फुरत्तया समावेशसुखसद्भावावमर्शित्वात् परममुद्दिष्टम्, अमृतं लोकविश्रुतमित्यमृतबीजतया लोके प्रसिद्धं सकारात्मकं, पीयूषकला अमाख्या षोडशी परा विमर्शशक्तिस्तया युक्तं विश्वसत्तायाः परामृतमयत्वापादनात् पूर्णचन्द्रप्रभातुल्यम् ॥

यत्तत्परममुद्दिष्टमित्युक्तया तृतीयबीजमाहात्म्यस्योक्तत्वात् समस्तमन्त्रनाथस्य माहात्म्यमाह

एतत्तत्परमं धाम
एतत्तत्परमं पदम् ॥२५॥

एतत्तत्परमं वीर्य-
मेतत्तत्परमामृतम्।
तेजसां परमं तेजो
ज्योतिषां ज्योतिरुत्तमम्॥२६॥
सर्वस्य जगतो देव-
मीश्वरं कारणं परम्।
स्रष्टा धर्ता च संहर्ता
नास्त्यस्य सदृशो बली॥२७॥
मन्त्राणामालयो ह्येष
सर्वसिद्धिगुणास्पदम्।

तदेतच्छब्दौ स्वरूपप्रत्यभिज्ञापनाय। परम-मनुत्तरं धाम चित्प्रकाशः, पदं विश्रान्तिभूमिः, वीर्यं सामर्थ्यम्, अमृतमानन्दः, तेजसां कालाग्न्यादिदीप्तीनां, ज्योतिषां सूर्येन्दुध्रुवादीनां, सर्वस्येति षडध्वरूपस्य जगतो देवं द्योतमानम् उपादानाद्यनपेक्षि परं कारणं स्वचिद्भित्तौ स्वा-

नतिरिक्तस्यातिरिक्तस्येव विश्वस्य भासकम्, अतश्च बली शक्तः अस्य सदृशो न कश्चित् सर्गादिपञ्चकृत्यकृदस्ति अस्यैव स्वच्छस्वतन्त्रचिदेकघनत्वात्, सदाशिवादीनां तु एतदाभासितानामेतदैश्वर्यविप्रुट्प्रोक्षणेनैतदिच्छयैव सृष्ट्यादिकारित्वात् । वक्ष्यति चैतत्

'शक्त्या तु भगवान्सर्वं करोति हि विभुत्वतः ।
निमित्तकारणं देवो यथा सूर्यमणेः क्रिया ॥
उपादानं तु सा शक्तिः संक्षुब्धा समवायतः ।'(२१।५१)

इति । एतच्च तत्रैव व्याख्यास्यामः । मन्त्राणामालय इति सर्वेषां चिदानन्दात्मवीर्यसारत्वात्, सर्वासां साधकाभीष्टसिद्धीतां गुणानां च सर्वज्ञत्वादीनामास्पदमाश्रयः ॥

अथ

अधुनाङ्गानि वक्ष्यामि
संनद्धो यैस्तु सिद्ध्यति॥२८॥

अङ्गानि हृदयादीनि, संनद्ध इति नित्यनैमित्तिकादौ कृतपरिग्रहः, सिद्ध्यति भुक्तिं मुक्तिं च लभते साधकादिः, आचार्यस्तु वितरति पुत्रकादेरित्यर्थात्। अनेन च भाविनित्यादिकर्मोपक्षिपता पाटलिकी संगतिर्दर्शिता ॥२९॥

तत्र

कृतान्तमध्यमं वर्णं
स्वरराण्पञ्चमानुगम्।
प्रभञ्जनान्तशिरसं
हृदयं सर्वसिद्धिदम् ॥२९॥

कृतान्तस्य याम्यदलस्थस्य चवर्गस्य मध्यमं वर्णं ज, स्वरराट् इन्द्रः तत्पत्रस्थस्यावर्गस्य पञ्चम उकारोऽनुगोऽधोगतो यस्य, प्रभञ्जनान्तो मकारो विन्दुरूपः शिरसि यस्येति मात्रं द्वितीयं बीजमेवैतत् हृदयं निर्णीतं, महामाहात्म्ययोगात् सर्वाः सिद्धीर्ददाति ॥ २९ ॥

शिरोमन्त्रमाह

सोमान्तमनलाद्येन
युक्तं प्रणवयोजितम्।

एतच्छिरः

सोमदिग्दलगयवर्गान्तं ववर्णम्, अनलस्याग्नेयवर्णस्य रेफस्याद्येन वर्णेन यकारेण युक्तं, प्रणवेन मिश्रीकृतम् । एवं व-य-ओमेतत्त्रयैकीकारात् शिरः शिरोमन्त्रोऽयम् ॥

अथ

अनिलान्तेन
युक्ता माया शिखा स्मृता॥३०॥

माया ई, अनिलान्तेन प्राग्वद्बिन्दुना, शिखा स्मृतेत्यविच्छिन्नेन पारम्पर्येण ॥ ३० ॥

कवचमाह

ईशान्तमीश्वरोर्ध्वं च
द्वादशार्धोर्ध्वयोजितम् ।
शिवशक्त्याथ नादेन
युक्तं तद्वर्म चोत्तमम् ॥३१॥

ईशदिग्दलगशवर्गान्तं हवर्णं क्षस्य कूटाक्षरत्वेन पृथक्कात्, यदि वा ईश ईशानवक्त्रवाची क्षोऽन्ते यस्येति, तदेव ईश्वर ईश्वरभट्टारकवा-

ची बिन्दुरूर्ध्वे शिरसि यस्य। द्वादशानामर्धस्य षष्ठबीजस्योकारस्योर्ध्वे योजितम्, शिवशक्तयेत्यनेनोर्ध्वगसर्वमात्रप्रमेयमुक्तम्, वर्म कवचम् ३१

नेत्रमाह

सभैरवाद्यं प्रणवं
सदागतिशिरःस्थितम्।
नेत्रमन्त्रो महोग्रश्च
सर्वकिल्विषनाशनः ॥ ३२ ॥

भैरवो झाङ्कारभैरववाचको झकारस्तस्याद्यं ज, सह भैरवस्याद्येन वर्तते यत्प्रणवरूपं तद्वायुवर्णस्य यकारस्य शिरसि उपरि स्थितमिति त्रितयैकीकारात्मकं, महोग्र इति शाक्तमरुद्वेजितभैरववह्निप्लुष्टाशेषभेदत्वात् तत एव सर्वपापदाही। चकारः परविश्रान्तिप्रदत्वं समुच्चिनोति ॥ ३२ ॥

अस्त्रमाह

अजीवकटसंयुक्त-
मस्त्रमेतत्प्रकीर्तितम्।

न विद्यते जीवो यस्मात् सोऽयमजीवकः फकारः संहारवर्णः स चासौ अजीवकेनाप्राणेनानच्केन टकारेण सम्यक् संहारसारेण युक्तः। अजीवकशब्दो द्विरावर्त्यः ॥

उपसंहरति

अङ्गषटं समाख्यातं
मन्त्रराजस्य सिद्धिदम् ॥३३॥

'सम्यग्वीर्यसारमाख्यातं, सिद्धिदमित्याराधकानामर्थात्, अनेनाधिकारान्तरसंगतिः सूचितेति शिवम् ॥ ३३ ॥

सर्वज्ञतादिगुणषट्कमयाङ्गसङ्गि-
संपूर्णसुन्दरचिदेकघनप्रकाशम् ।
निःशेषपञ्चविधकृत्यकृदीशनेत्र-
मन्त्रं नुमो निखिलमन्त्रमहेशमेकम् ॥ १ ॥

इति श्रीक्षेमराजविरचिते श्रीनेत्रोद्योते मन्त्रोद्धारो द्वितीयोऽधिकारः ॥ २ ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते

तृतीयोऽधिकारः ।

प्रवर्तते यदुद्द्योते नित्यकर्म महात्मनाम् ।
अशेषक्लेशनुन्नेत्रं नुमस्तन्नैललोहितम् ॥ १ ॥

सिद्धिदमित्युक्तेरितिकर्तव्यतापूरणेन प्रमाणीकाराय नित्यकर्म प्रकाशयितुं श्रीभगवानुवाच

अधुना यजनं वक्ष्ये
येन सिद्ध्यति मन्त्रराट् ।

अधुनेत्याराध्यमन्त्रस्वरूपे प्रकाशिते। यजनमन्तर्बहिर्यागम् । सिद्ध्यति भुक्तिमुक्तिप्रदो भवति ॥

तत्रास्नातस्य यागेऽनधिकारात्

आदौ स्नानं प्रकुर्वीत
सर्वकिल्विषनाशनम् ॥ १ ॥

कथमित्याह

अस्त्रमन्त्रेण देवेशि
मृदमुद्धृत्य मन्त्रवित् ।
शौचं यथोचितं कृत्वा
पश्चात्स्नानं समारभेत् ॥ २ ॥

स्मृतिशास्त्रोक्तनीत्या शारीरं शौचं कृत्वास्त्र-मन्त्रेण मृदमुद्धृत्य स्नानमारभेतेति संगतिः ॥ २

तत्रादौ संहारक्रमेण

पादौ जङ्घे कटिं चोरू
पूर्वं मृद्भिस्त्रिभिस्त्रिभिः ।

प्रक्षाल्येति शेषः, त्रिभिरिति लिङ्गव्यत्ययात् । एवमन्यदपि मन्तव्यम् ॥

किमव्यवधानेनेत्याह

त्रिरन्तरितयोगेन

त्रीन्वारानन्तरितो योगः करक्षालनसंबन्धस्तेन पादौ प्रक्षाल्य हस्तौ प्रक्षालयेत् । ततो जङ्घे ततो हस्तौ, तत ऊरू ततो हस्तौ, ततः कटिरित्येषोऽत्रार्थः ॥

एवं कृत्वा

सप्तभिः शुद्ध्यते पुनः ॥ ३ ॥

करक्षालनाय गृहीताभिर्मृद्भिरित्यर्थात् ॥३॥

अथ

सप्ताभिमन्त्रितां कृत्वा
मृदमस्त्रेण मन्त्रवित् ।
प्रताप्यार्कमुखां पश्चा-
च्छरीरमनुलेपयेत् ॥ ४ ॥

मन्त्रविदिति उक्तपापदाह्यस्त्रवीर्यवित्, अर्कमुखां दर्शितादित्यां तददृष्टौ प्राणार्क-स्पृष्टां, निजविवक्षितं चैतदनुलेपनम् ॥ ४ ॥

विघ्नोपशमनार्थं तु

अम्भसा

आक्षाल्य देहमाचमेत् ।

पुर्यष्टकशुद्ध्यर्थं प्रणवेन त्रिराचमनं द्विः सृक्कि-मार्जनं द्वारस्पर्शश्चेति ॥

आचमनार्थं मलस्नानमुक्त्वा विधिस्नानमाह

वामहस्ततले भागान्
मृत्स्नायास्त्रींस्तु कारयेत् ॥५॥

प्रशस्ता मृत् मृत्स्ना, त्रीन्भागानिति श्रीस्वच्छन्दादिष्टनीत्या अग्रसव्यापसव्यगतान् ॥५॥

तत्र

अस्त्रजप्तं क्षिपेद्दिक्षु

अग्रस्थितं भागम् ॥

मूलं तीर्थे प्रकल्पयेत् ।

मूलमन्त्रजप्तवामभागेन शिवतीर्थं कल्पयेदित्यर्थः ॥

अङ्गैः शरीरमालभ्य

क्षाल्य चान्तर्जलं जपेत् ॥६॥

अङ्गैरिति अङ्गषट्कजप्तदक्षिणभागमृदा इत्यर्थः । जलस्यान्तः अन्तर्जलम् ॥ ६ ॥

किं जपेत्कियच्चेत्याह

मूलं शक्त्या

यथाशक्ति मूलमन्त्रं जपेत् ॥

अथ

समुत्तीर्य

सन्ध्यां वन्देत च क्रमात् ।

श्रीस्वच्छन्दादिष्टनीत्या कलशमुद्रया शिरोऽभिषिच्य जलादुत्तीर्य वामकरगताम्बुविप्रुषां दक्षिणकरशाखाभिरस्त्रमन्त्रेणाधःक्षेपः, मूलहृदादिभिस्तु उपरीत्यादि सन्ध्यावन्दनम् ॥

किं च

शिखां बद्ध्वा शिखां स्मृत्वा
मन्त्राणां तर्पणं ततः ॥ ७ ॥

शिखामन्त्रं स्मृत्वा, शिखाग्रन्थिं बद्ध्वा. अथ च शिखां मध्यशक्तिं बद्ध्वा तत्र स्थित्वा तद्वीर्यसाराणां मन्त्राणां तर्पणं कुर्यात् ॥ ७ ॥

अथ

देवान्पितॄनृषींश्चैव
मनुजान्भूतसंयुतान् ।
संतर्प्य तीर्थं संगृह्य
यागोक्तो विधिना विशेत् ॥ ८ ॥

सर्वमन्त्रान् संतर्प्य, शिवतीर्थं मन्त्रग्रहणेन भावनया स्वात्मलीनं कृत्वा, यागगृहं भाविविधिना विशेत् ॥ ८ ॥

तं विधिमाह

आशामातृर्गणं लक्ष्मीं
नन्दिगङ्गे च पूजयेत् ।
महाकालं तु यमुनां
देहलीं पूजयेत्ततः ॥ ९ ॥

बहिर्दिङ्मातृः, द्वारोर्ध्वे गणपतिलक्ष्म्यौ, पार्श्वद्वये नन्दिगङ्गे महाकालयमुने, वामे देहलीं, प्रणवचतुर्थीनमःशब्दयोगेन पूजयेत् । अस्य नयस्य सर्वसहत्वात् सिद्धान्तदृशा नन्दिगङ्गे दक्षिणे पूज्ये, महाकालयमुने वामे। वामस्रोतस्येवं मेषास्यच्छागास्यौ तु अधिकौ दक्षिणवामयोः। भैरवस्रोतसि संहारप्रधानत्वात् दक्षिणे महाकालयमुने वामे नन्दिगङ्गे । षडर्धे तु दिण्डिमहोदरौ अधिकौ ॥ १ ॥

अथ सप्तवारास्त्रजप्तं दीप्तं कुसुमं नाराचास्त्रप्रयोगेनान्तः क्षिप्त्वा

विघ्नप्रोच्चाटनं कृत्वा
दिग्बन्धं कवचास्त्रतः ।

पातालादिगतान् विघ्नान् पाष्ण्यर्याघातोच्चारतालादिशब्दैरस्त्रेणोच्चाट्य, कवचेनोच्चाटितविघ्नाननुप्रवेशाय दिशो बध्नीयात् ॥

ततोऽपि

स्वासनाथं प्रकल्प्याथ
शक्तिमाधारिकां शुभाम्॥ १०॥
उपविश्य ततः कुर्या-
त्प्राणायाममनुक्रमात् ।

स्वस्य चिदात्मन आसनार्थं विश्वाध्वनः समन्ताद्धारणादाधाररूपां शुभां पारमेशीं क्रियाशक्तिं 'ओं आधारशक्तये नमः' इति कल्पयित्वा, उपविश्येति तदाश्रयमात्मानं कृत्वा प्रायत्निकरेचनपूरणकुम्भनक्रमेण आत्मनो द्वादशान्तस्थशाक्तबलस्पर्शाय देहस्य दाहार्थं वैचित्र्यमुत्पादयितुं प्राणायामं कुर्यात् ॥ १० ॥

अथादौ करशुद्धिन्यासं कृत्वा
धारणामारभेतात्र
युगपच्छोषणादिभिः ॥११॥

षाट्कौशिकं तु मलिनं
निर्दग्धं तत्र भावयेत् ।

पीतचतुरस्रात्मवज्र-ल—लाञ्छितभूधारणां-दार्ढ्यं च सितार्धचन्द्रात्मपद्म-व-लाञ्छिताप्यधारणां पुष्टिं च देहे विचिन्त्य, षड्बिन्दु-य-लाञ्छित-कृष्णावृत्त्यात्मवायव्यधारणया सह शोषमस्य ध्यायेत् इत्याद्यस्यार्थः । एवं कृते सति त्वङ्-मांसास्रृङ्मज्जास्थिशुक्ररूपत्वात् मलिनं देहं पादाङ्गुष्ठोत्थकालाग्निना लोहितत्रिकोणात्मश-क्ति-र-लाञ्छिताग्नेयधारणाचिन्तनतोऽहंभावप्र-शमाय दग्धं भावयेत् ॥ ११ ॥

अथ

विज्ञानं केवलं तत्र
शून्यं सर्वगतं स्मरेत् ॥ १२ ॥

तत्र देहे चिन्तिते ज्ञेयशून्यत्वाद् व्यापि चिन्मात्रं स्मरेत् ॥ १२ ॥

एवं ध्यानात्

नाहमस्मि न चान्योऽस्ति
ध्येयं चात्र न विद्यते ।
आनन्दपदसंलीनं
मनः समरसीगतम् ॥१३॥

नाहमिति मितः प्रमाता, अन्य इति नीलादिर्बाह्योऽर्थः, ध्येयमित्यान्तरोल्लेखात्म न किंचिदत्रावसरेऽस्ति, – इति कृत्वा अणुताप्रशान्तौ शाक्तस्फारावेशादानन्दपदसंलीनं सन्मनः, समरसीगतं चिन्मात्ररूपं जातम् ॥ १३ ॥

एवमात्ममूर्तिन्यासादनन्तरं सकलनिष्कलैकात्ममन्त्रमूर्तिन्यासमुचितासनन्यासपूर्वमाह

पश्चादाधारशक्तिस्थं
स्वासनं परिभावयेत्
धात्रीं पयोऽर्णवं पद्मं
चन्द्रबिम्बावभासितम् ॥१४॥
पश्चात्कालकलापोत्थ-
पीयूषेण तु सेचयेत् ।

मूर्तिभूतं त्रितत्त्वं च
मूलेनैव प्रकल्पयेत् ॥१५॥

पश्चादिति देहशुद्ध्यनन्तरम् । धात्र्यमृतार्णवपद्मानि क्रमेण पृथ्व्यप्तेजस्तत्त्वव्याप्त्या, तच्च आकाशश्लिष्टमिति आधारशक्त्यन्तः

'पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
पञ्चैतानि तु तत्त्वानि यैर्व्याप्तमखिलं जगत् ॥'

इति स्थित्या स्वीकृताशेषाध्वप्रपञ्चं तत्त्वपञ्चकमेतत्प्रणवेन स्वस्यात्मन आसनं न्यसेत् । तत्रोपरि निवृत्त्याद्यष्टत्रिंशत्कलाकल्पितभाविध्यानोचितदेहमात्मादितत्त्वत्रयसारसकलमूर्तिं देवं मूलमन्त्रेण परमानन्दात्मकामृतरूपविमलव्याप्तिसतत्त्वेन सिञ्चेत् प्रकृष्टतया कल्पयेत् ॥१५॥

ततोऽङ्गानि कराभ्यां च
शरीरे कल्पयेत्पुनः ।

पुनरिति निष्कलात्मनि सर्वज्ञत्वादिधर्मरूपाणि षडङ्गानि विकसज्ज्ञानक्रियात्मकशक्ति-

द्वयामर्शनेन नैष्कलात्म्योन्मज्जनाय कल्पयेदिति विशेषोऽत्राभिप्रेतः ।

मात्रं चैवाभिमानं तु
चिन्तयेद्ध्यानयोगतः ॥१६॥

व्याख्यातव्याख्यास्यमानवीर्यसारमात्रविमर्शमाविशेदैकाग्र्येण ॥ १६ ॥

अथ सन्निधानायाह

मुद्रां चैवामृतां बद्ध्वा
पद्ममुद्रामथापि वा ।
ध्यायेदात्मनि देवेशं
चन्द्रकोटिसमप्रभम् ॥१७॥
स्वच्छमुक्ताफलप्रख्यं
स्फटिकाद्रिसमप्रभम् ।
कुन्देन्दुगोक्षीरनिभं
हिमाद्रिसदृशं विभुम् ॥१८॥

शुभ्रहारेन्दुकन्दादि-
सितभूषणभूषितम् ।
सितचन्दनलिप्ताङ्गं
कर्पूरक्षोदधूसरम् ॥१९॥
स्फुरच्चन्द्रामृतस्फार-
बहुलोर्मिपरिप्लुतम् ।
सोममण्डलमध्यस्थ-
मेकवक्त्रं त्रिलोचनम् ॥२०॥
सितपद्मोपविष्टं तु
बद्धपद्मासनस्थितम् ।
चतुर्भुजं विशालाक्षं
वरदाभयपाणिकम् ॥२१॥
पूर्णचन्द्रनिभं शुभ्र-
ममृतेनैव पूरितम् ।
कलशं धारयन्तं हि
जगदाप्यायकारकम् ॥२२॥

परिपूर्णं तथा चन्द्रं
वामहस्तेऽस्य चिन्तयेत् ।

उद्यताङ्गुष्ठसव्योपरिसंश्लिष्टतिर्यक्कनिष्ठाङ्गुलिवामसंनिवेशादमृतामृतकलशमुद्रां परामृतपूर्णतातिशयात्, उक्तमन्यत्र

'सृतवामकरस्योर्ध्वं दक्षिणं श्लथमुष्टिवत् ।
कृत्वोर्ध्वाङ्गुष्टकं हस्तमाहुर्मुद्रां च कालशीम् ॥

संश्लिष्टाङ्गुष्ठमुकुलीकृतस्फारितकरद्वयां पद्ममुद्रां वा अशेषविश्वस्फारणस्वस्वरूपाभिप्रायाबद्ध्वा आत्मनि स्वस्वरूपे देवेशं ध्यायेदित्यनुपाधिंचिज्ज्योतिरेव स्वच्छस्वच्छन्दमहिम्ना स्वभित्त्याभासिताशेषविश्वाह्लादि मुदितमाकृतिशुभ्राच्छकल्पमात्मनों रूपं चिन्तयेत् । स्फुरच्चन्द्रेति चन्द्रोऽत्र करस्थः । एकवक्त्रं निःसामान्यस्वतन्त्रशक्तियोगात् । तन्माहात्म्यभासितेच्छादिशक्तित्रययोगात् त्रिनेत्रम् । सितपद्मं शक्तिकमलं तस्याक्रमणं पद्मासनबन्धात् । शा-

न्त्यतीताभिन्नस्य देवस्य शान्तादिशक्तिस्फार-
णातिशयात् चतुर्भुजत्वम्, विश्वप्रकाशकत्वाकू-
ताद्विशालाक्षत्वम् । सिद्धिदानसर्वभयोन्मूल-
नज्ञानक्रियात्मकस्वस्वरूपोन्मेषकत्वाभिव्यक्तये
वरदाभयामृतकलशपूर्णेन्दुकरता ॥ २२ ॥

एवमाकृतितो ध्यात्वा

सर्वश्वेतोपचारेण
पूजितं तमनुस्मरेत् ॥२३॥

उपचर्यतेऽनेनेत्युपचारः कुसुमनैवेद्यादि॥२३॥

तदित्थम्

बहुनात्र किमुक्तेन

अयं हि देवः परमानन्दनिर्भरत्वात्

साक्षादमृतसागरः ।

युक्तं चैतत् ॥

यतः

अस्मादेवं समुत्पन्न-
ममृतं विश्वजीवनम् ॥२४॥

उत्पन्नं समुल्लसितममृतं परं शाक्तं वीर्यम् २४

अनुग्राह्यानुग्रहायायं देवः केन नाम न रूपेण स्फुरति,—इत्याशयेनाह

अथ चिन्तामणिप्रख्यं
भावभेदेन संस्मरेत् ।

भावस्य रागादिकलुषस्याशयस्य भेदेन दलनेन ॥

तं च

सौम्यं रौद्रं तथा भीमं
विकृतं भावभेदतः ॥ २५ ॥
सदाशिवं तुम्बुरुं च
भैरवं वीरनायकम् ।

वीरनायकं कुलेश्वरं, भावस्य साधकाशयस्य भेदाद्वैचित्र्यात् आभासितानुग्राहिचित्राकृतिमित्यर्थः, यदाहुः

'येन येन हि रूपेण साधकः संस्मरेत्सदा ।
तस्य तन्मयतां याति चिन्तामणिरिवेश्वरः ॥'

कृपालुत्वात् ॥ २५ ॥

एवं ध्वात्वा यजेद्देवं
मानसैः कुसुमैः शुभैः ॥२६॥
हृत्पद्मे सर्वसिद्ध्यर्थं

मानसैस्तत्तत्सिद्ध्युचितैः ॥ २६ ॥

एवं साधकविषयमुक्त्वा सामान्येनाह

पश्चाद्बोध्य प्रपूजयेत् ।

मानसार्चानन्तरं मन्त्रचक्रार्चितार्घपात्रविप्रुट्-प्रक्षालितकुसुमादिभिः प्रकृष्टं पूजनं भवतीति कृत्वादौ मानसं कार्यम् ॥ २६ ॥

किं च

मानसैः कुसुमैर्यार्चा
सात्त्विकी सा स्थिरा मता ॥२७॥
अनिर्माल्या परा शुद्धा
मोक्षदा सिद्धिदा शुभा ।

अत्र सर्वस्य प्रातीतिकेन चिदात्मत्वेन ब्रह्मार्पणदृष्टेरनिमेषात् ॥ २७ ॥

तस्मात्सर्वप्रयत्नेन
मानसं यजनं ध्रुवम् ॥२८॥
आदावेव प्रकर्तव्यं

ततो गुरुपङ्क्तिं पूजयित्वा, ततो लब्धानुज्ञः शिवताव्यक्तये सर्वैरेव

पश्चाद्द्रव्यैस्तु विस्तरैः ।
स्वगृहे देवतागारे
संगमे गिरिमूर्धनि ॥२९॥
सुप्रशस्ते तु भूभागे
पद्मषण्डे सुशोभने ।

यजनं प्रकर्तव्यमिति संगतिः, भूभागे इति सर्वत्र संबध्यते ॥ २९ ॥

तत्रादौ

आलिखेन्मण्डलं चित्रं
सितरेखोपशोभितम् ॥३०॥

चतुर्द्वारं चतुष्कोणं
सुसमं तु मनोरमम् ।
शोभोपशोभासंपन्नं
तन्मध्ये शशिमण्डलम् ॥३१॥
संपूर्णचन्द्रसदृशं
रश्मिमालावलीयुतम् ।
तन्मध्येऽष्टदलं पद्मं
सुसितं चन्द्रसन्निभम् ॥३२॥
विचित्रकेसरोपेतं
हेमकर्णिकमुत्तमम् ।

मण्डलस्य विधानं श्रीयागेऽग्रे भविष्यतीति नेह तद्वितानितम् ॥ ३२ ॥

अथ

तन्मध्ये देवदेवेशं
स्वस्थानादवतारयेत् ॥३३॥

स्वस्थानादिति अन्तर्यागभुवः चिद्धाम्नः, अवतारयेत् अनुग्रहाय बाह्यमूर्त्याभासात्मतया-वतरन्तं विमृशेत् सृष्टिक्रमेण च बहिर्न्यसेत्॥३३॥

उत्तानौ तु करौ कृत्वा
अङ्गुष्ठौ तत्र मध्यगौ ।
आवाहनीत्यावाहनमुद्रया ॥
आवाहयेत्ततो देवं
त्रिदेहपरिकल्पितम् ॥३४॥

आ समन्तात् वाहयेत् बहिरपि अनुग्रहाय आश्रितमूर्तौ चिन्तयेत् । त्रिदेहेति चिन्मात्र-तया अन्तर्यागख्यातेन बहिस्त्वेन च रूपेण त्रिभिर्यथोत्तरं व्याप्यव्यापकतया स्थितैः परसू-क्ष्मस्थूलैर्निष्कलादिसौरैर्देहैः परिकल्पितमनुत्त-रैकरूपमपि

'स्वातन्त्र्यामुक्तमात्मानं स्वातन्त्र्याद्द्वयात्मनः ।
प्रभुरीशादिसंकल्पैर्निर्माय व्यवहारयेत् ॥'
(ई. प्र. १ अ. ५ आ. १६ का.)

इति प्रत्यभिज्ञोक्तनीत्या त्रित्वेन विभक्तामि-

त्यर्थः ॥ ३४ ॥

आवाहितस्य संनिधानाय उच्छ्रिताङ्गुष्ठमुष्टिभ्यां लिङ्गमुद्रां, गर्भगाङ्गुष्ठमुष्टिभ्यां तु निरोधाय निष्ठुरां मुद्रां प्रदर्श्य, ततोऽपि

आग्नेय्यादिविभागेन
दलेष्वङ्गानि विन्यसेत् ।

अग्नीशरक्षोवायव्यदिक्षु हृदादीनि चत्वारि, चतसृषु पूर्वादिदिक्षु अस्त्रं, कर्णिकायां नेत्रम् ॥३५

तत्सर्वं

पूज्यं श्वेतोपचारेण
पुष्पाम्बरविलेपनैः ॥३५॥
नैवेद्यैर्विविधैश्चित्रै-
र्धूपैर्मृष्टैः सुधूपितम् ।
हृद्यैः पानैश्च विविधैः

सुधूपितं कृत्वा—इत्यर्थः। अन्यत् स्पष्टम् ॥३५॥

साधकस्य

भावभेदेन पूजयेत् ॥३६॥

तत्र

सर्वश्वेतोपचारेण
शान्त्यर्थं पूजयेत्प्रिये ।
पुष्ट्यर्थं बहुभिर्मिश्रैः
संभारैः संभृतैर्यजेत् ॥३७॥

मिश्रैः सितलोहिताच्छादिरूपैः ॥ ३७ ॥

अथ चाङ्गभूतम्

पश्चाद्धोमं प्रकुर्वीत
यथाकामानुसारतः ।

मुमुक्षुस्तिलाज्याभ्यां, बुभुक्षुस्तु भाविद्रव्यैः ।

केत्याह

त्रिमेखले वर्तुले च
चतुरश्रे सुशोभने ॥३८॥
हस्तमात्रेऽन्ततः कुण्डे

अन्ततः कुण्डे इति स्थूलहोमे । द्विचतुर्हस्तादौ कुण्ड इति भविष्यति ॥ ३८ ॥

अस्य च कुण्डस्य

षडंशेनोर्ध्वमेखला ।

मध्यमा द्विचतुष्केण
द्वादशांशाधमा भवेत् ॥३९॥

दैर्घ्याच्च पार्श्वतस्तद्वत्
षण्मध्याग्रेऽङ्गुलत्रयाम् ।

हस्तस्य षडंशेनाङ्गुलचतुष्टयेन ऊर्ध्वमेखला। मध्यमा द्विचतुष्केणाष्टमांशेनाङ्गुलत्रयेणेत्यर्थः । अधस्तनी द्वादशांशा द्व्यङ्गुला भवेत्। खातमधः शून्यम्। ओष्ठमेखला खातान्तरालेऽन्तर्दृश्यमानावयवविशेषः। अश्वत्थपत्रसदृशीं नाभिं योन्याकारां, नाभिः पुरस्तादवयवविशेषः । दैर्घ्यात् पार्श्वतश्च नवाङ्गुलाम् षडङ्गुलानि मध्ये अग्रे चाङ्गुलत्रयं यस्यास्ताम् ॥ ३९. ॥

एतच्च कुण्डम्

उक्तं साहस्रिके होमे

सहस्रसंख्याक इत्यर्थः ।

द्विगुणं चायुते मतम् ॥४०॥

चस्त्वर्थे । अयुते दशसाहस्रे ॥ ४० ॥

त्रिपञ्चायुते होमे तु
द्विगुणं तद्विधीयते ।
कुण्डं वै लक्षणोपेतं
लक्षहोमे प्रशस्यते॥४१॥

त्रिंशत्पञ्चाशत्साहस्रपर्यन्ते होमे द्विगुणमिति चतुर्हस्तम् ।लक्षहोमे ततोऽपि द्विगुणमष्टहस्तम्। द्विगुणमिति काकाक्षिवत् । लक्षणोपेतं हस्तमानानुसारोचितमेखलादिमानम् ॥ ४१ ॥

किं च

नित्ये नैमित्तिके काम्ये
शान्तौ पुष्टौ च वर्तुलम् ।
सर्वसिद्धौ प्रशस्येत
श्रीकाम्ये चतुरश्रकम् ॥४२॥

शस्यत पूवमानन
शिष्टं वै कर्मभेदतः ।

नित्ये सदातने, नैमित्तिके दीक्षापर्वपवित्रकादौ, काम्ये शान्तिपुष्ट्यात्मनि, एवं च वर्तुलं कुण्डम् । श्रीकामविषये तु चतुरश्रकम्; तच्च मानं पूर्वमानेन प्रोक्तहोमसंख्यानुसारेणेत्यर्थः । अन्यस्यां तु सर्वसिद्धौ देहोच्चाटनादिकर्मभेदेन शिष्टमिति त्रिकोणषट्कोणादिरूपम् ॥ ४२ ॥

अथ

संस्कारास्तस्य कुण्डस्य
कर्तव्या ह्यस्त्रमन्त्रतः ॥४३॥

तानाह

अधःखननमुद्धार
ईतिक्षेपः प्रपूरणम् ।
सेचनं कुट्टनं चैव
मार्जनं लेपनं तथा ॥४४॥

खननं भूस्थाया मृदः, उद्धारः उत्क्षेपः, ईतिक्षेपः शर्कराङ्गारादित्यागः, प्रपूरणं भरणं, सेचकाद्यनन्तरं सेचनमद्भिर्योजनं, कुट्टनं कठिनभागचूर्णनम्, मार्जनं कुण्डस्य समीकरणं, लेपनं गोमयोत्पुंसनम् ॥ ४४ ॥

एतानष्टौ संस्कारान् निष्पादनकाले, निष्पन्नस्यापि भावनयास्त्रेण कृत्वा

प्रणवेन तु कर्तव्यं
कुण्डस्य परिकल्पनम्।

परिकल्पनं क्रियाशक्तिरूपतया, प्रोक्षणताडने च अस्त्रेणेत्यनन्तरमेव भविष्यति। उक्षणमित्यादिना कुण्डकल्पनामित्यन्तेन कवचेनावगुण्ठनमूह्यम् ॥

अथात्र

चतुष्पथं चाक्षवाटं
वागीश्या गृहकल्पनम्॥४५॥

असिना

पूर्वोत्तराननाभ्यां दर्भाभ्यां चतुष्पथं, मध्यलाभात् ऐशादिक्रमेण वागीश्या न्यासाय चकारात् पूर्वामुखैस्त्रिभिः सौम्याननैरेकेन वज्रीकारः, शिवाग्निसहिष्णुतायै च सर्व ऊर्ध्वदिग्दर्भास्तरणमक्षवाटो वागीश्या गृहायेत्यस्त्रेणैतत्सर्वं कुर्यात् ॥ ४५ ॥

प्रणवेनैव
वागीश्यावाहनं पुनः ।
अर्चनं देवि कर्तव्यं
त्रितत्त्वेन

'वागीशि संनिधत्स्व' इत्याह्वानम् । चतुर्थीनमोयोगेन त्वर्चनम् । त्रितत्त्व इति प्रणव इहत्यो मूलमन्त्रो वा ॥ ४६ ॥

पूर्वोक्तकुण्डसंस्कारपूरणमाह

उक्षणं तथा ॥ ४६ ॥
अस्त्रेण ताडनं चैव
संस्कृत्य विधिपूर्वकम् ।

क्रियाशक्तिस्वरूपेण
कौण्डल्या कुण्डंकल्पनम् ।४७।

कौण्डल्या इति शाक्तकुण्डलिनीव्याख्या, यद्वा वागीशीयोनावेव प्रोक्षणताडनकुण्डल्यात्मककुण्डकल्पनानि कुर्यात् ॥ ४७ ॥

अथ

ज्ञानशक्तिस्वरूपं तु
वह्निं तत्रोपकल्पयेत् ।

कथं

वह्निमादाय पात्रस्थं
पञ्चसंस्कारसंस्कृतम् ॥४८॥

तान् पञ्चाह

निरीक्षणादि चास्त्रेण
कवचेनावगुण्ठनम् ।
प्रणवेनाहुतीः पञ्च
हुत्वा क्रव्यादशुद्धये ॥४९॥

विश्वाग्न्यापादनं पश्चा-
त्कुर्वीत भ्रामयेत्त्रिधा ।

आदिशब्दात् प्रोक्षणताडने, एतदन्तमेकः । क्रव्यादत्वं श्मशानिकत्वं, तच्छुद्धिस्तृतीयः । विश्वाग्निरग्नितत्त्वात्मा शिवाग्निस्तदापादनम् । त्रिधा भ्रामणं च प्रणवेनैव ॥ ४९ ॥

किं च

बीजरूपं ततो वह्नि-
मात्मानं परमेश्वरम् ॥ ५० ॥
मायां चैव तु वीगाशीं
योनौ संक्षोभ्य संक्षिपत् ।
वर्तुलीकृत्य

वागीशीमित्यस्यान्ते ध्यात्वेति योज्यं, संक्षोभ्य त्रिधा भ्रामणेनैव । यदत्र तत्त्वं तत् श्रीस्वच्छन्दोद्योते दर्शितम् ॥ ५० ॥

अथ

विश्वाग्नौ
पूजनं प्रणवेन तु ॥ ५१ ॥

कर्तव्यं तन्मुखे पश्चा-
त्संस्कारास्तु ततोऽनले ।

शिवाग्नितापादनाशयेनैव 'शिवाग्नये नमः' इति पूजात्मसंस्कारमुखाविर्भाविसंस्कारान् कुर्यात् ॥ ५१ ॥

तानाह

गर्भाधानं पुंसवनं
सीमन्तोन्नयनं तथा ॥५२॥
वक्त्रकल्पननिष्क्राम-
सीमग्रीवादिकल्पनम् ।
जातकर्म तथैवात्र
निष्क्रामो नामकल्पना॥५३॥
हृदयाद्यङ्गषट्केन
कर्तव्यमनुपूर्वशः ।

सीमन्तोन्नयनमित्यस्य विशेषणं वक्त्रकल्पनादीति । वक्त्राणां कल्पनमनुद्भिन्नता, नि-

ष्क्रामोऽभिव्यक्तिः अङ्गप्रत्यङ्गकल्पना । अत्र मध्ये सीमशब्देन मुखहृत्पाददेशानां त्रितत्त्व-व्याप्त्या कल्पनं सूचितम् । निष्क्रामः आदित्यदर्शनम् । अत्र च हृन्मन्त्रेणाग्निं संपूज्य तेनैव 'गर्भाधानं करोमि स्वाहा' इति तिलैर्जुहुयात्,—इत्यादिक्रमः श्रीस्वच्छन्दादितोऽन्वेष्यः संक्षिप्तत्वादस्य विधेः समानतन्त्रापेक्षत्वात् । एवमुत्तरत्रापि ॥ ५३ ॥

किंच

चूडाद्या ये तु बालान्ताः
पूर्णाहुत्यैकया पुरः ॥५४॥
संस्कारानपि सर्वांस्ता-
न्वह्नौ मूलेन पूरयेत् ।

बालस्य ब्रह्मचारिणोऽन्ते ये भूता उद्वाहादयः । 'चूडाद्यान् सर्वसंस्कारान् वह्नौ करोमि स्वाहा' इत्यत्रोहः ॥ ५४ ॥

अथ

शिवशक्तिमयौ तत्र
कल्पयेत विधानवित् ॥५५॥
स्रुक्स्रुवौ तौ दृढौ कार्यौ
क्षीरवृक्षसमुद्भवौ ।

विधानमनन्तरं भविष्यति। क्षीरवृक्षः श्वेतार्कादिः ॥ ५५ ॥

किंच

शस्येते शान्तिपुष्ट्योस्तु
प्रशस्तद्रुमसंभवौ ॥५६॥
श्रीपर्णीबिल्वाद्युत्थौ ॥ ५६ ॥

अन्यत्र भावभेदेन
कार्यौ कर्मानुरूपतः ।

भगवतोऽमृतेशस्य साधकान्प्रति शान्तिपुष्टी प्राधान्येन कार्ये तत्र तत्र,—इति स्वकण्ठेनोच्यते ॥

अन्यत्तु सामान्योक्त्या पूर्वसूचितं विधानं दर्शयति

षट्त्रिंशाङ्गुलमानेन
स्रुग्वा बाहुप्रमाणतः ॥५७॥

अष्टयवमङ्गुलम् । बाहुप्रमाणत इति ।

'बाहूपबाहू वस्वङ्ककलौ संधिः कलादलम् ।
तद्वत्पाण्युपबाह्वोश्च.....॥

इति मयोक्तनीत्या बाहुमूलात्प्रकोष्ठान्तमानेन । अत्र च

'आयामादर्कभागस्य नवभागोऽङ्गुलम्....' ।

इति स्वाङ्गुलापेक्षा षट्त्रिंशदङ्गुलमानतेति विशेषः ॥ ५७ ॥

अस्याश्च

षडंशपरिणाहेन
दण्डः कुम्भसमुत्थितः ।

परिणाहो वेष्टनमानम् । कुम्भो मूले घटाकृतिः संनिवेशविशेषः ॥

स च दण्डः

चतुरङ्गुलपीठाग्रः
सर्वतश्चतुरङ्गुलः ॥ ५८ ॥
पीठं चतुष्किकाकारं
तत्पीठं कमलोदरम् ।
कर्तव्यं दण्डमध्ये तु

अग्रे यस्य । दण्डशब्देनात्र प्राणदण्डप्रकृतिरूपा सर्वैव स्रुगुच्यते । तस्या अपि विभागे घटदण्डयोः षोडशाङ्गुलानि । चतुष्किका चतुष्कपरिमाणात् । वेदिकाकण्ठमुखानामूर्ध्वभागे षोडशेति कृत्वा मध्ये चत्वारि पीठमानं भवति ॥ ५८ ॥

तत्र च पीठे पद्मं

द्व्यङ्गुलायतवर्तुलम् ॥ ५९ ॥
अर्धाङ्गुलसमुत्सेधं
विचित्ररचनाङ्गुलम् ।

तिलकरचनार्थं पार्श्वयोरङ्गुलद्वयं त्यक्त्वा मध्ये द्व्यङ्गुलीकार्यमित्यर्थः । समुत्सेध औन्नत्यम् ॥ ५९ ॥

अस्याग्रे

वेदिकाष्टाङ्गुला कार्या
चतुरस्रा सुशोभना ॥६०॥
अधःपद्मनिविष्टा तु

अस्याश्च वेद्याः

ऊर्ध्वं पञ्चाङ्गुलायतम् ।
खातं तु त्र्यङ्गुलं कार्यं
तदूर्ध्वं वर्तुलं क्रमात् ॥६१॥

ऊर्ध्वं पृष्ठभागेऽष्टाङ्गुलाधा वेद्याः पार्श्वयोः सार्धं सार्धमङ्गुलं त्यक्त्वा, मध्ये पञ्चाङ्गुलमायतं त्र्यङ्गुलं चाधःखातमाज्यस्थानं कार्यम् । तदूर्ध्वं भ्रमात् सूत्रभ्रमणेन वर्तुलं भवति ॥ ६१ ॥

किंच

अर्धाङ्गुलप्रमाणैश्च
तिलकैरुपशोभितम् ।
तच्च पार्श्वचतुष्कं तु
चतुष्कोणसमन्वितम् ॥६२॥
शिल्पिविज्ञानरचना-
नानासुरचनं च तत् ।

तस्य मध्यगस्य खातस्य वर्तुलस्य पार्श्वे यदध्यर्धमङ्गुलं वेदिकास्थं तत् त्रिधा विभज्य मध्यभागेऽर्धाङ्गुलास्तिलकाः कार्याः । रचना व्यापारः । सुरचनं शोभनं रच्यमानं पत्रावल्यादि । सुरचितमिति तु स्पष्टम् ॥ ६२ ॥

वेदिकाया अग्रे

कण्ठ एकाङ्गुलः कार्य-
स्तत्त्रिभागविभक्तितः ॥६३॥
पार्श्वयोस्तु

१ ग० पु० यत्तर्धमिति पाठः ।

दैर्घ्यादेकाङ्गुलः । वैपुल्यात्तु तदित्यष्टाङ्गुल-वेदिकामानं त्रिभागीकृत्य, पार्श्वयोर्विभज्य भागद्वयं त्यक्त्वा मध्यमत्रिभागमानः कार्य इत्यर्थः ॥ ६३ ॥

एकाङ्गुलकण्ठस्याग्रे

तथा कार्यं
मुखं सप्ताङ्गुलं शुभम् ।

दैर्घ्यात्

मुखमाज्यधारापातक्षेत्रम् । शुभं विरचनासनाथम् ॥

तत्पार्श्वतोऽष्टौ तु

तन्मुखं, पार्श्वतो वेदिकासममूलमित्यर्थः ॥

अस्य च

द्वौ भागौ ह्रासयेत्क्रमात् ॥ ६४ ॥
मुखाग्रं तत्त्रिभागं तु
द्वौ भागौ तस्य पार्श्वतः ।
वर्तयेत्

मुखस्याग्रंभागमष्टाङ्गुलं त्रिधा कृत्वा, मध्यभागपार्श्वाभ्यां पूर्वकोणयोः सूत्रद्वयमास्फाल्य, पार्श्वगौ द्वौ भागौ वर्तयेत् यथानुपातमङ्कयेत्, ततस्तानेव ह्रासयेत् शातयेत् । एवं च मुखाग्रमष्टाङ्गुलमानात्त्रिभागं भवति ॥ ६४ ॥

किंच

वेधयेत्तत्तु,
कनिष्ठाङ्गुलिमानतः ॥ ६५ ॥

मध्येनाज्यधारापाताय ॥ ६५ ॥

तच्च

निम्नं निम्नतरं कुर्या-
द्यावदग्रमुखान्तरम् ।

मुखाग्रमध्यं यावत् ह्रस्वनिम्नच्छिद्रं कुर्यात् ॥

तस्य तु

पार्श्वयोश्च तथा कार्या
विचित्ररचना शुभा ॥ ६६ ॥

स्रुवमानमाह

हस्तमात्रं स्रुवं कुर्या-
न्मूलपीठं त्रिशाखिनम् ।
मध्याग्रपीठपद्माङ्कं
कण्ठेऽङ्गुलसुवर्तुलम् ॥६७॥
चतुरङ्गुलदीर्घं तु
द्विपुटाग्रं सुवर्तितम् ।
अङ्गुष्ठपर्ववत्खातं
गोष्पदाकृति कारयेत्॥६८॥
कनिष्ठाङ्गुलिमानेन
प्रतिशाखं तु वर्तुलम् ।
वर्तयेद्रचनायुक्तं
कर्षापूरितवक्त्रकम् ॥६९॥

मूलपीठं चतुरस्रः संनिवेशो यस्य। कनिष्ठाङ्गुल्यग्रमानेन त्रितयव्याप्त्या प्रशस्ता मूलपीठादुत्थिता शाखा यस्य । तथा मध्याग्रपी-

ठयोः पद्माङ्कितम् । अग्रपीठस्य पुरोभागगे च कण्ठेऽङ्गुलं सुष्ठु वर्तुलं, सुवर्तुलकण्ठमित्यर्थः । अस्य च चतुरङ्गुलानि दैर्घ्यम् । द्विपुटं दीर्घ-मध्ये रेखाविभक्तपार्श्वद्वयमग्रं यस्य तत् । सुष्ठु वर्तुलं यथानुपातं सुन्दरम् । अत एव गोष्प-दाकृति, अङ्गुष्ठस्य मध्यरेखातोऽग्रान्तं यत् पर्व तत्परिच्छेदकत्वेन विद्यते यस्य तादृक् खातं यस्य । अतश्च कर्षेणापूरितं वक्रं वक्र-खातस्थानं यस्य तादृशं स्रुवं कुर्यात् । स्रुक्खातं घृतपरिमाणं न परिच्छिनत्ति ॥ ६९ ॥

चतुष्पला भवेत्पूर्णा

स्रुगादीनां व्याप्तिमाह

स्रुक्शक्तिस्तु स्रुवः शिवः ।
क्रियाशक्तिस्तु वै कुण्डं
ज्ञानशक्तिस्तथानलः ॥७०॥

शिवाभेदव्याप्तिरेवात्र परः संस्कारः,—इत्या-शयात् स्रुक्स्रुवयोरिह संस्कारौ नोक्तौ ॥७०॥

एवं संपाद्य विधिव-
त्पश्चाद्धोमं समारभेत् ।

एवं निष्पादनं शिवशक्त्यभेदेन विमर्शनम्। विधिवदिति वीर्यव्याप्त्यनुसारेण यथाशक्ति शतं सहस्रं वा मूलस्य, तदृशांशं त्वङ्गानां नित्यकर्मणि जुहुयात् ॥

काम्ये द्रव्यनियममाह

तिलैः क्षीरयुतैर्होमा-
च्छर्कराघृतसंयुतैः ॥ ७१ ॥
महाशान्तिः प्रजायेत
तत्क्षणान्नात्र संशयः ।

एतत्प्रसङ्गादुक्त्वा, प्रकृतमाह

आदौ चैवाज्यसंस्कारा-
न्कुर्याद्धोमं ततः परम् ॥७२॥

तानाह

अधिश्रयणमुद्वासं
भ्रमणं स्थापनं ततः ।
निरीक्षणं तथास्त्रेण
नीराजनमतः परम् ॥ ७३ ॥
पर्यग्निकरणं चैव
तथैवोत्प्लवसंप्लवौ ।
अस्त्रेणैव

भाण्डात् पात्रे प्रस्तावणं, अग्नेरूर्ध्वे स्थापनं, कुण्डस्य परितस्त्रिनयनं, योनौ स्थापनं, तत्र तेजसा परतेजोमयत्वापादनं, दर्भोल्मुकेन सर्वदिक्कं प्रकाशनं, ज्वलद्दर्भस्यान्तः प्रक्षेपः, कराभ्यामङ्गुष्ठानामिकागृहीतपवित्रेण त्रिरूर्ध्वं प्रेरणं, त्रिरधःप्रेरणम्,—इत्यधिश्रयणादीनां स्वरूपम् ॥

एतान् नव संस्कारान् अस्त्रेण कृत्वा
अर्चनं मूले-
नामृतीकरणं तथा ॥ ७४ ॥

अमृतमुद्रात्र प्रदर्श्या ॥ ७४ ॥

अथ

दर्भास्तरविष्टराणि
परिधीनस्त्रमन्त्रतः ।

कल्पयेत् । दर्भास्तरे नानाविधास्त्रव्याप्त्या विष्टराणि रक्षार्थान्यवस्थाप्य लोकपालानामासनार्थम् । बहिरस्त्रप्राकारव्याप्त्या हस्तप्रमाणाः समन्त्राः शाखाः परिधयः। एतत्त्रयं कुण्डस्य बहिः ।

अथाज्यपात्रे दर्भौ क्षिप्त्वा

सूर्याचन्द्रमसौ बाह्ये
कल्पयेत्प्रणवेन तु ॥ ७५ ॥

सप्रणवेन मूलेनाज्ये धामत्रयं कल्पयित्वा, वामदक्षिणमध्येभ्यः क्रमेण स्रुवमापूर्य, मूलमन्त्रपूर्वं 'सोमाय स्वाहा, अग्नये स्वाहा, अग्नीषोमाभ्यां स्वाहा' इति होमादग्नेस्त्रिधामता शुक्लपक्षे कल्प्या। कृष्णपक्षे तु वामात् 'सूर्याय

स्वाहा' दक्षिणात् 'अग्नये स्वाहा' मध्यात् 'अग्निसूर्याभ्यां स्वाहा' इति श्रीस्वच्छन्दोक्तविधिरत्रापेक्ष्यः ॥ ७५ ॥

अथाग्निम्

भावयेन्नवजिह्वं तु

राज्यार्था दाहजननी मृत्युदा शत्रुहारिका ।
वशीकर्त्र्युच्चाटनी स्यादर्थदा मुक्तिदायिका ॥
सर्वसिद्धिप्रदा..... ।'

इत्येवंनामकाः प्रागादिमध्यान्ता अग्नेः कल्प्याः 'अग्नेर्जिह्वाः कल्पयामि' इत्यूहेन ॥

पूर्णां मूलेन पातयेत् ।

एवं कुण्डाग्निस्रुक्स्रुवाज्यानि संस्कृत्य

ततः पश्चात्तु तं मन्त्रं
साङ्गं मध्यगतं यजेत् ॥७६॥

साधकस्तु

एवंकृते तु जुहुया-
न्मन्त्रं कर्मानुसारतः ।

एवंकृत इति नित्यकर्मसमाप्तौ ॥

तत्र

पयसा घृतयुक्तेन
पुष्टिर्भवति शाश्वती ॥७७॥

हुतेन साधकस्य ॥ ७७ ॥

घृतगुग्गुलुहोमेन
पूर्णायुर्भवति ध्रुवम् ।

आयुष्कामः ॥

श्रीकामो जुहुयात्पद्मान्
घृतक्षीरपरिप्लुतान् ॥ ७८ ॥

राज्यकामस्तु बिल्वानि
त्रिमध्वक्तानि होमयेत् ।

क्षीरवृक्षसमिद्भिस्तु
होमादारोग्यमाप्नुयात् ॥७९॥

प्रशस्तसमिधा होमा-
त्प्रशस्ततरुजेऽनले ।

सर्वान्कामानवाप्नोति
सत्यमेव न चान्यथा ॥८०॥
व्रीहिसप्तकहोमेन
धनार्थी धनभाग्भवेत् ।

स्पष्टम् ॥ ८० ॥

एवं शुभफलान्होमानुक्त्वा, उच्चाटनादिफलं होममवहेलयाह

ईहितं काममुद्दिश्य
ईहितं होममाचरेत् ॥ ८१ ॥

एतन्मत्रौचित्येन होममाह

पयसा केवलेनैव
होमान्मृत्युं जयेद्ध्रुवम् ॥८२॥

मृत्युञ्जयत्वादस्य नाथस्येति शिवम् ॥

निखिलजगत्प्रकाशिशशिवह्निदिनेशशत-
स्फुरितदयाविभागि विसरत्परमामृतयुक् ।
अकृतकचारुचित्रतिलकाकृति शंकरयो-
रलिकविलोचनं जयति सर्गलयस्थितिकृत् ॥

इति श्रीनेत्रोद्योते यजनादिस्तृतीयोऽधिकारः॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते

चतुर्थोऽधिकारः ।

ऊर्ध्वाधरापाङ्गसङ्गिदृष्ट्या मोक्षं कटाक्षयत् ।
सभोगं जयति श्रीमल्लालाटं नेत्रमैश्वरम् ॥

नित्यात्कर्मणोऽनन्तरं नैमित्तिकमित्याशयेन श्रीभगवानुवाच

अथ दीक्षां प्रवक्ष्यामि
भुक्तिमुक्तिफलप्रदाम् ।

भुक्तिदीक्षा शिवधर्मलौकिकधर्मभेदेन भिन्ना साधकस्य, ईश्वरतत्त्वप्राप्तिहेतुस्तु समयिनो मुक्तिदीक्षा, सर्बीजनिर्बीजरूपाचार्यपुत्रकयोरुभय्यपि श्रीमत्स्वच्छन्दादिदृष्ट्यधिवासप्रोक्तमण्डलान्ताधिकृतत्वात्

तत्त्वैः षट्त्रिंशतार्धेन
तदर्धेनाथ पञ्चभिः ॥ १ ॥
त्रिभिरेकेन वा कार्या
परापरविभूतये ।

पृथ्व्यादिशिवान्तानि षट्त्रिंशत्। तदर्धमष्टादश, भूतानि पञ्च प्रकृतिः पुरुषो रागो नियतिः शुद्धविद्या कालः कला माया विद्या ईशः सदाशिवः शक्तिः शिव इति । तदर्धमपि प्रकृतिः पुरुषो नियतिः कालो माया विद्या ईशः सदाशिवः शिव इति नव । पञ्च पृथिव्यादीनि निवृत्त्यादिकलावद्विश्वव्यापीनि। त्रीणि भुवनशक्तिशिवाख्यानि मायासदाशिवशिवव्याप्तीनि। एकं त्वशेषं विश्वादिं शिवतत्त्वम् । परापरविभूतिर्मोक्षभोगौ संपाद्यौ सर्वत्राविशिष्टौ ॥ १ ॥

एवं षट्प्रकारां तत्त्वदीक्षामुद्दिश्य, कलादिदीक्षामप्युद्दिशति

कलाभिः पञ्चभिर्वाथ
पदैर्दीक्षाथवा पुनः ॥ २ ॥
वर्णैः पञ्चाशता वापि
मन्त्रैर्वा भुवनैस्तथा ।

निवृत्ति-प्रतिष्ठा-विद्या-शान्ता-शान्तातीताः कलाः। श्रीपूर्वादिनीत्या मातृकानुसारेण क्ष ह स ष श व ल र य म भ ब फ प न ध द थ त ण ढ ड ठ ट ञ झ ज छ च ङ घ ग ख क इति नव पदानि, विश्वविश्रान्ति-स्थानत्वाद्विसर्गाद्यकारान्तं तु दशमं पदम् । श्रीस्वच्छन्ददृशा तु नवात्मप्रस्तारोक्तान्येकाशीतिरूकारादीनि पदानि । श्रीस्वायम्भुवादिप्रक्रियया तु व्योमव्यापिसंबन्धीनि । वर्णाः क्षादिकान्ताः चतुस्त्रिंशत्पृथिव्यादिसदाशिवान्तवाचकाः, विसर्गाद्यकारान्तास्तु षोडश शक्तिशिवतत्त्वाभेदामर्शिनः । श्रीपूर्वस्थित्या मध्यम-

वाग्वृत्त्योक्तरूपाणि पदानि पश्यन्तीवृत्त्या आसूत्रितभेदाभेदामर्शप्राधान्येन मन्त्राः । श्रीस्वच्छन्दप्रक्रियया तु हृत् शिरःशिखे कवचमस्त्रं नेत्रमित्यङ्गान्येव, सद्यआदिवक्त्रमन्त्राणि निवृत्त्यादिकलापञ्चकव्याप्तिक्रमेणाशेषाध्वामर्शीनि। मन्त्रा इहत्यप्रक्रियया वक्त्रमन्त्राणामभावादङ्गान्येव । भुवनानि तु श्रीपूर्वोक्तप्रक्रिययाष्टादशोत्तरशतसंख्यानि, स्वच्छन्ददृशा तु चतुर्विंशत्यधिकद्विशतरूपाणि, अस्य शास्त्रस्य सर्वस्रोतःसंग्रहरूपत्वात् तत्तदागमोक्तषडध्वविभागकल्पनया दीक्षाक्रमस्याविरोधात् ॥ २ ॥

तत्र संभवे सति दीक्षा प्रोक्तैः प्रकारैः

एतैः सर्वैः प्रकर्तव्या

अन्यथा तु

कार्या ह्येकतमाथवा ॥ ३ ॥

एकैकत्रापि च प्रकारे षड्भिरप्यध्वभिः

सर्वैस्तु समुदायेन

दीक्षा काया ॥

कथमित्याह

शक्तिव्यक्तिस्वरूपतः ।

एकतमं संशोध्याध्वानं व्यक्तिरूपेण व्यापकतया प्राधान्येनाश्रित्य, तदन्तरितमध्वपञ्चकं शक्तिरूपेण व्याप्यं भावयेदित्यर्थः । यथोक्तं श्रीस्वच्छन्दे

'अध्वावलोकनं पश्चाद्व्याप्यव्यापकभावतः।' (४।९४

इत्यादि ॥

एषा च सर्वैव दीक्षा

यथाविभवसारेण

कर्तव्या दैशिकोत्तमैः ॥४॥

विभववतां महासंभारैः । इतरेषां दूर्वाम्बुपल्लवादिभिरपि । एवं हि अनालस्यनैःस्पृह्याभ्यां दैशिकानामुत्तमता ॥ ४ ॥

तत्रादौ शिष्यदेहपाशसूत्रावलम्बनमध्वसंधानमध्वोपस्थापनमध्वपूजाहोमावध्वान्तःपाशत्रयभावनामाधारशक्तिन्यासादि च कृत्वा

वागीशीपूजनं कार्यं

आह्वानपूर्वं होमान्तमित्यर्थात् ॥

ततः कृतप्रोक्षणताडनचैतन्यग्रहणं शिष्यम्

तद्गर्भे योजयेत्पशुम् ।

कर्मपाशवशसंभाव्यविचित्रचतुर्दशविधभोगायतनोत्पत्त्यर्थम् ॥

अस्य च

गर्भाधानं तु जनन-
मधिकारो लयस्तथा ॥९॥
भोगः कर्मार्जनं चैव
निष्कृतिस्तदनन्तरम् ।
मूलमन्त्रेण कर्तव्यं

नानाशरीराणामन्तःप्ररोहो गर्भाधानं, बहिर्निःसृतिर्जननं, भोगयोग्यानां प्रवृद्धानां संपत्तिरधिकारः, तदनन्तरं मन्त्रमाहात्म्यपरिपक्वभोगसाधनत्वस्य कर्मणोऽर्जनं भोगदानौन्मुख्यरूपं, तदनन्तरं सुखदुःखमोहप्राप्त्यात्मा भोगः, ततो निवृत्तेऽपि भोगे कंचित्कालं भोगसंस्कारो लयः, ततोऽपि समस्तजात्यायुर्भोगनिःशेषसंपत्त्यात्मा निष्कृतिः,-इत्येतत्सर्वं मूलमन्त्रहोमैस्तयादिसंख्यैः कार्यं, निष्कृतिस्तु शतहोमा,तदन्ते च द्विजत्वापत्तिरुद्रांशापत्ती चिन्तयेत् ॥

समाप्तेषु भोगेषु भोक्तृत्वाभावरूपं विश्लेषाख्यं संस्कारं कृत्वा

पाशच्छेदस्तथा स्मृतः ॥६॥

अस्त्रमन्त्रेण

ततो विश्लेषानन्तरभावितया स्मृतं पाशसूत्रस्य छेदमस्त्रमन्त्रेण कृत्वा तेनैव पाशस्य

दाहस्तु

कार्यः ॥

ततोऽपि

भस्मीकरणतत्स्थिते ।

भस्मीकरणं निःसंस्काराणां पाशानां शमनमस्त्रेणैव । तत्स्थितं तु निवृत्ताशेषशरीरस्य शिष्यचैतन्यस्य मूलेनैक्यं विभाव्य, स्वहृत्प्रवेशेन द्वादशान्तप्रापणपूर्वं शिष्यहृत्स्थत्वापादनरूपं स्थानं स्थितं तस्य स्थितमिति व्युत्पत्त्या तत्स्थितम् ॥

अनन्तरं ब्रह्मादेराह्वान-पूजा-होम-पुर्यष्टकांशार्पण-श्रावण–विसर्जनादि कृत्वा, कलादितत्त्वान्तरानुसन्धिपूर्वं सर्वाध्वसंशुद्धिं कृत्वा,

शिखाच्छेदं ततो होमं

कुर्यात् विश्वाध्वाश्रयप्राणशक्तिरूपशिखाव्याप्त्याशिखां छित्त्वा जुहुयादित्यर्थः ॥

अथ विध्यन्यथासंपत्तिवशसंभाव्यप्रायश्चित्तहोमानन्तरम्

'ज्ञात्वा चारप्रमाणं तु प्राणसंचारमेव च ।' (४।२२९)

इत्यादिश्रीस्वच्छन्दोक्तप्रमेयपञ्चदशकंसतत्त्व-ज्ञो ज्ञानयोगशाली आचार्यवर्यः प्रशान्तपाशं शिष्यम्

मूलनैव तु योजयेत् ॥ ७ ॥

'व्यापारं मानसं त्यक्त्वा बोधमात्रेण योजयेत् ।
तदा शिवत्वमभ्येति पशुर्मुक्तो भवार्णवात् ॥' (४।४२)

ते श्रीस्वच्छन्दोक्तदृशा परतत्त्वसमावेशनया परमशिवैकरूपं कुर्यात् ॥ ७ ॥

तदाह

संयोज्य परमे तत्त्वे
संस्थानं तत्र कारयेत् ।
तथासौ तन्मय एव स्यात् ॥

अथ योजनिकानां विभागमाह

अधिकारार्थमाचार्ये
परापरपदे स्थिते ॥ ८ ॥
शिवत्वे साधकानां तु
विद्यादीक्षां सदाशिवे ।

पुत्रके परमे तत्त्वे
समयिन्यैश्वरे तथा ॥ ९ ॥

परापरपदे शिवत्वे इति

'अत्रारूढस्तु कुरुते शिवः परमकारणम् ।'(१०।१२९६)

इति स्वच्छन्दोक्तनीत्या परमशिवयोजनानन्तरमाचार्याणामपरशिवयोजना कार्या, साधकानां तु शिवयोजनानन्तरं सदाशिवयोजना कार्या, पुत्रकाणां परतत्त्व एव, समयिनामीश्वरतत्त्वे इति विभागः ॥ ९ ॥

उपसंहरति

एवमुद्देशतो दीक्षा
कथिता विस्तरोऽन्यतः॥ १० ॥

उद्देशत इत्यन्यत इत्यनेन चातिविततोऽप्ययं दीक्षाविधिरिहातिसंक्षेपेणासूत्रितत्वात् श्रीस्वच्छन्दादिशास्त्रेभ्यो वितत्य सम्यगवगम्य प्रयोक्तव्य इति शिक्षयति,—इति शिवम् ॥

—:०:—

जयत्यशेषपाशौघप्लोषकृद्भक्तिशालिनाम् ।
परधामसमावेशप्रदं नेत्रं महेशितुः ॥

—:०:—

इति श्रीनेत्रोद्योते दीक्षाधिकारश्चतुर्थः ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते



पञ्चमोऽधिकारः



अभिषिञ्चति भुक्तिमुक्तये
महतो यत्स्ववपुःपरिप्लुतैः ।
परमामृतनिर्झरैरिदं
शिवयोर्नेत्रमुपास्महे परम् ॥

अथ शास्त्रान्तराभिहितैतच्छास्त्रसूचितसबीजदीक्षादीक्षितान् श्रुतशीलसमाचारानाचार्यान्साधकांश्चाभिषेचयितुं श्रीभगवानुवाच

अभिषेकं प्रवक्ष्यामि
यथा यस्येह दीयते ।

यथेति, ययेतिकर्तव्यतया, यस्येति आचार्यस्य साधकस्य वा दीयते तथा तस्याभिषेकं प्रवक्ष्यामीति प्रतिज्ञा ॥

तत्र

अष्टभिः कलशैर्दैव
आचार्यस्य विधानतः॥१॥

विधानमीशानदिशि स्वस्तिकादिमण्डल-गतश्रीपर्णाद्यासनोपविष्टस्य विहितन्यासस्य अमृतेशतयार्चितस्य काञ्चिकौदनमृद्गोमयदूर्वा-सिद्धार्थकादिपूर्णसदीपकलशनिर्भर्त्सनतः शमितविघ्नस्य परमन्त्रस्फारावेशनिःष्यन्दिपरामृतधारासारचिन्तनेन सह शिरसि कलशाम्भः-क्षेपात्मकम्॥१॥

ये च ते कलशाः

ते च विद्येश्वराः प्रोक्ताः
समुद्राश्च सगर्भगाः।

समुद्राष्टकाम्भोभृतः श्रीमदमृतेशभैरवस्फारविष्टानन्तादिविद्येश्वराधिष्ठिता भाव्या इत्यर्थः। सगर्भगा इति रत्नौषध्यक्षतादियुक्ताः। एतच्चोपलक्षणम्। तेनाश्रितमन्त्रैः प्रत्येकं साष्टशतमूलमन्त्राभिमन्त्रितैः,-इत्यागमिकमभिषेकविषय-

मभिषिक्तस्य ज्ञानयोगस्फारोपायप्रकाशनोष्णी-
ष--संहिता-च्छत्र-पादुका--करणी--कर्तर्यादिप्रदा-
नाद्यागमोक्तं सर्वमनुसर्तव्यम् ॥

कलशविषयं पक्षान्तरमाह

पञ्चभिर्भूतसंख्यैर्वा
त्रिभिर्वा तत्त्वरूपकैः ॥२॥
आत्मविद्याशिवाख्यैस्तु
एकेनापि शिवात्मना ।

भूतानां पृथिव्यादिव्योमान्तानां सम्यक् ख्यानं निवृत्त्यादिकलाव्याप्त्यनुसन्धिना प्रकाशो येषां, तत्त्वैरात्मादिभी रूपकं रूपणा निरूपणं येषाम्, आत्मविद्याशिवैः आ समन्तात् ख्यानं तन्मयतया प्रथा येषाम् ॥ २ ॥

एष चाभिषेकः

अधिकारार्थमाचार्ये
साधके सिद्धिकामतः ॥३॥

आचार्यविषयः परानुग्रहैकप्रयोजनः कार्यः, मन्त्राराधनेन स्वात्मविषया सिद्धिरस्य स्यादित्याशयेन साधकविषयः कार्यः । अत्रापि श्रीस्वच्छन्दाद्युक्ता सर्वा प्रक्रियानुसरणीया ॥ ३ ॥

अथायं साधकः

अभिषिक्तो ह्यनुज्ञातः
प्रकुर्यान्मन्त्रसाधनम् ।

न तु उदासीत ॥

तेनायम्

तद्व्रतस्तत्समाचार-
स्तद्भक्तस्तत्परायणः ॥४॥

पवित्राहारनिरतो
लघ्वाशी संयतेन्द्रियः ।
एकान्ते पुण्यक्षेत्रे तु
तीर्थायतनगोचरे ॥५॥

सर्वसंगोज्झितमनाः
साधको जपमारभेत् ।

तत्रैव व्रतं वाक्चित्तसंयमः, पूजाहोमात्मकस्तु समाचारो यस्य । स्पष्टमन्यत् ॥ ५ ॥

तत्र

लक्षमेकं जपेन्मन्त्री
पूर्वसेवासमन्वितः ॥६॥
तत्र सामान्यकर्माणि
सिद्ध्यन्ते साधकस्य तु ।

पूर्वसेवायां च मीनोदयात्प्रभृति अधिकविश्रान्त्या जपः कार्य इति श्रीस्वच्छन्देऽस्ति, तथा जपात् दशमांशेनोत्तमादिद्रव्यैर्होम इति । सामान्यकर्माणि वश्याकर्षणादीनि ॥ ६ ॥

किं च

भौमीं सिद्धिमवाप्नोति
दशलक्षजपेन तु ॥७॥

आन्तरिक्षीं च लभते

पातालाकाशगतिमाप्नोतीत्यर्थः ॥

लक्षपञ्चाशता ध्रुवम् ।

दिव्यां सिद्धिमवाप्नोति

साधको नात्र संशयः ॥ ८ ॥

दिव्यां भुवनेश्वरप्राप्तिरूपाम् ॥

तथा कोटिकृते जप्य

ऐश्वरीं सिद्धिमाप्नुयात् ।

व्यापकस्तु शिवो भूत्वा

निग्रहानुग्रहक्षमः ॥९॥

यथेच्छं कुरुते सर्वं

धारयेत्संहरेद्भृशम् ।

सर्वगः सर्वकर्ता च

सर्वज्ञो भवति ध्रुवम् ॥१०॥

व्यापक इत्यादिना ऐश्वरी सिद्धिः स्फुटीकृता । सर्वगः सर्वात्मा । एतच्च सर्वं साधक एतद्देहस्थ एव लभते,—इति शिवम् ॥

—:०:—

कमलजकृष्णरुद्रतनुभिर्वितनोति पृथक्
शिवमुशिवेशमूर्तिभिरथाप्यपृथङ् निखिलम् ।
यदिह परामृतैः समभिषिञ्चति भक्तजनं
जयति समस्तसिद्धिकृदिदं नयनं शिवयोः ॥

-:०:—

इति श्रीनेत्रोद्योतेऽभिषेकविधिर्नाम
पञ्चमोऽधिकारः ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते

षष्ठोऽधिकारः ।

व्याध्यादिदौर्गत्यजरादिदोष-
हुताशशान्तिं परमामृतैर्यत् ।
अर्चाहुतिध्यानजपादि सिञ्चत्
करोति तन्नौमि हरोर्ध्वनेत्रम् ॥

पूर्वपटलाधिगतार्थानुवादेन अन्यदवतारयितुं श्रीदेव्युवाच

श्रुता मया महादेव
मृत्युजित्सिद्धिमोक्षदः ।
अधुना श्रोतुमिच्छामि
सिद्धित्रयसमन्वितम् ॥१॥

अमृतेशं महात्मानं
सर्वप्राणिषु जीवितम् ।
यथा सिद्धिप्रदं लोके
मानवानां हितङ्करम् ॥२॥
पूर्वोक्तदुष्टशमन-
मपमृत्युविनाशनम् ।
आप्यायनं शरीरस्य
शान्तिपुष्टिप्रदं शुभम् ॥३॥

अथ प्रथमद्वितीयाधिकारोक्तवाच्यवाचकात्ममन्त्ररूपो मृत्युजित् तृतीयचतुर्थाधिकारोक्तनित्यनैमित्तिककर्मणा मोक्षदः पञ्चमाधिकारोक्तकाम्यकर्मतः सामान्येन सिद्धिप्रदश्च मया श्रुतः । इदानीं तु तमेव भौमादिव्यान्तरिक्षसिद्धिप्रदममृतेशं विश्वजीवनं महान्तमात्मानं या या सिद्धिर्यथा सिद्धिस्तत्प्रदं लोके सर्वत्र भूतसर्गे द्वितीयाधिकारोक्तदशा विशेषतो व्या-

ध्यादिवाधितानां मनुष्याणां हितङ्करं श्रोतुमिच्छामि । हितङ्करत्वं पूर्वोक्तेत्यादिना स्फुटीकृतम् । शान्तिर्ग्रहादिदोषनिवृत्तिः । आप्यायः शुष्कस्य सरसीभावः । पुष्टिः पूर्णाङ्गता । शुभं दौर्गत्यादिहरम् ॥ ३ ॥

एवं पृष्टः श्रीभगवानुवाच

श्रूयतां संप्रवक्ष्यामि
रहस्यं परमाद्भुतम् ।
यथा तरन्ति मनुजा
दुःखोदधिपरिप्लुताः ॥४॥
अपमृत्युशताक्रान्ता
जना दारिद्र्यसंयुताः ।
आधिव्याधिभयोद्विग्नाः
पापौघैर्विनिपीडिताः ॥५॥
मुच्यन्ते च यथा सर्वे
पूर्वोक्तैर्दारुणैः प्रिये ।

त्रिविधं तदुपायं तु
स्थूलं सूक्ष्मं परं च तत्॥६॥

मनुजा इति कृपास्पदसातिशयत्वेन चोदिता यथा तरन्ति न दुःखादिभाजो भवन्ति, दारुणैर्भूतादिभिश्च यथा मुच्यन्ते त्यज्यन्ते, तथा प्रोक्तवीर्यसारमृत्युजित्परमार्थरहस्यं तत्रोपायरूपं वस्तु यत्तत् संप्रवक्ष्यामि ॥ ६ ॥

तत्र

स्थूलं तु यजनं होमो
जपो ध्यानं समुद्रकम्।
यन्त्राणि मोहनादीनि
मन्त्रराट् कुरुते भृशम् ॥७॥

मन्त्रराट् यजनादि कुरुते स्ववीर्येणापि तिष्ठति। मुद्रा अत्र पूर्वोक्ताः ॥ ७ ॥

सूक्ष्मं चक्रादियोगेन
कलानाड्युदयेन च।

सप्तमाधिकारभाविषट्चक्रषोडशाधारादौ यो योगस्तेन, तथा कलानाड्युदयेनेति कला कालावयवमुहूर्ताद्युपलक्षणपरा तत्प्रधानो यो नाड्युदयस्तेन श्रीस्वच्छन्दाद्युक्तबाह्यान्तररौद्रेतरादिकालैकीकारेण प्रयुक्तो मन्त्रराट् स्ववीर्यस्फारणेन सूक्ष्ममुपायं व्याध्यादिनाशनं करोतीत्यर्थः ॥

परं सर्वात्मकं चैव
मोक्षदं मृत्युजिद्भवेत् ॥ ८ ॥

महासामान्यमन्त्रवीर्यरूपत्वात् मृत्युजिन्नाथस्येत्थं निर्देशः । सर्वात्मकं परमाद्वयम् । एतच्चाष्टमाधिकारे निर्णेष्यते ॥ ८ ॥

तत्र स्थूलोपायं वक्तुमुपक्रमते

यदा मृत्युवशाघ्रातः
कालेन कलितः प्रिये ।
दृष्टस्तत्प्रतिघातार्थ-
ममृतेशं यजेत्तदा ॥९॥

सर्वश्वेतोपचारेण
पूर्वोक्तविधिना ततः ।

मृत्युरपमृत्युः । कालो महामृत्युः । विधानं तृतीयाधिकारोक्तं यागादि ॥ ९ ॥

एवं च

यस्य नाम समुद्दिश्य
पूजयेन्मृत्युजिद्विभुम् ॥१०॥
मृत्योरुत्तरते शीघ्रं
सत्यं मे नानृतं वचः ।

असावित्यर्थात् । सत्यमित्युक्तया नात्र माया-प्रमातृतया सन्देग्धव्यं निश्चयस्यैव सिद्धिनिमित्तत्वात् ॥ १० ॥

सितशर्करया युक्तै-
र्घृतक्षीरप्लुतैस्तिलैः ॥११॥
पुण्यदार्विन्धने वह्नौ
कुण्डे वृत्ते त्रिमेखले ।

महारक्षाविधानेन
जुहुयाद्यस्य नामतः ॥१२॥
महाशान्तिर्भवेत्क्षिप्रं
गतस्यापि यमक्षयम् ।

पुण्यं पलाशादिदारु इन्धनं दीपनं यस्य। महारक्षाविधानमस्त्रप्राकारादिचिन्तनं, यागहर्म्ये च दुष्टप्रवेशरक्षणम् । नामत इति मन्त्रान्तोच्चारितेन । यमक्षयं यमगेहम् ॥ १२ ॥

अथवा शर्करायुक्त-
पयसा केवलेन तु ॥१३॥
होमान्मृत्युं जयेच्छीघ्रं
मृत्युजिन्नात्र संशयः ।

स्पष्टम् ॥ १३ ॥

सुगन्धिघृंतहोमेन
क्षीरवृक्षमयेऽनले ॥ १४ ॥
तर्पितो नाशयेन्मृत्युं
मृत्युजिन्नात्र संशयः ।

यस्य नाम्ना तस्येत्यर्थात् ॥ १४ ॥

क्षीरवृक्षसमिद्धोमा-
ज्ज्वरं नाशयते क्षणात् ॥१५॥

प्रादेशमात्राः सत्वचः कनिष्ठाङ्गुलिमानाः सरसाः शाखाः समिधः ॥ १५ ॥

तिलतण्डुलमाक्षीक-
माज्यक्षीरसमन्वितम् ।
एष पञ्चामृतो होमः
सर्वदुष्टनिवर्हणः ॥१६॥

मन्त्रराजप्रसादात् ॥ १६ ॥

गुग्गुलोर्गुलिकाभिश्च
व्यक्ताभिश्चणमात्रया ।
होमात्पुष्टिर्भवत्याशु
क्षीणदेहस्य सुव्रते ॥१७॥

चणकप्रमाणाभिर्गुग्गुलुधूपगुलिकाभिराज्य-क्षीरक्षौद्रात्मत्रिमध्वक्ताभिर्होमात् पुष्टिर्भवति ।

'वषडाप्यायने शस्तः' (६।९६)

इति स्वच्छन्दोक्तनीत्या सर्वत्रात्र वषट्जातिः प्रयोज्या ॥ १७ ॥

यदा व्याधिशताकीर्णो
ह्यबलो दृश्यते नरः ।
तदास्य सम्पुटीकृत्य
नाम जप्त्वा विमुच्यते ॥१८॥

मूलमन्त्रेणेत्यर्थात् ॥१८॥

किंच

यं यं मन्त्रं जपेद्विद्वा-
नमृतेशेन संपुटम् ।
तस्य सिद्ध्यति स क्षिप्रं
भाग्यहीनोऽपि यो भवेत्॥१९॥

जपोऽत्र स्वकल्पोक्तविधिना ॥ १९ ॥

एतत्प्रासङ्गिकमुक्त्वा प्रकृतमाह

क्षीणगात्रस्य देवेशि
भेषजं मन्त्रसंपुटम् ।

दीयते तत्क्षणाद्देवि
स पुष्टिं लभते बली ॥२०॥

भेषजमौषधं, मन्त्रसंपुटमिति मन्त्रसंपुटीकारेण प्रयुक्तमित्यर्थः ॥ २० ॥

हृत्पद्ममध्यगं जीवं
चन्द्रमण्डलमध्यगम् ।
साद्यर्णरोधितं कृत्वा
मृत्योरुत्तरते भृशम् ॥२१॥

साद्यर्णैः सविसर्गसकारहोमबीजप्रणवैर्जीवनिकटात् क्रमात्क्रमं बहिर्निःसृतैः रोधितम् । अष्टासु दिक्षु ध्यातराक्रान्त चन्द्रावम्बसंनिविष्टमात्मनः परस्य वा जीवं यः करोति ध्यायति, स मृत्युमुत्तरति । कृत्वेति अन्तर्भावितणिजर्थोऽपि ॥ २१ ॥

साद्यर्णरोधितं कृत्वा
ध्यायेद्देहे तु योगवित् ।

सर्वव्याधिविनिर्मुक्तः
स भवेन्नात्र संशयः ॥२२॥

जीवद्देहस्यायं रोधनप्रयोगः ॥ २१ ॥

क्षीरोदपद्ममध्यस्थ-
ममृतोर्मिभिराकुलम् ।
ऊर्ध्वाधःशशिरुद्धं तु
साद्यर्णैः संपुटीकृतम् ॥२३॥
ध्यायते सुप्रहृष्टात्मा
आत्मनोऽपि परस्य वा ।
स बाह्याभ्यन्तरं शुभ्रं
सुधापूरितविग्रहम् ॥२४॥
अनुद्विग्नमनायासं
सर्वरोगैः प्रमुच्यते ।

क्षीराब्धिमध्यस्थसितसरोरुहकर्णिकागतेन्दू-पविष्टम्, ऊर्ध्वस्थेन्द्वमृतैः सिच्यमानमैन्दवप्रभाभरोच्छलत्क्षीरोदतरङ्गैरन्तर्बहिश्चापूरितं,

सुशुभ्रं च, प्रोक्तयुक्त्या ध्यातमन्त्रराजसंपुटीकृतं यस्य शरीरं भृशं ध्यायते स नीरोगो भवति ॥

रोचनाकुङ्कुमेनैव
क्षीरेण च समन्वितः ॥२५॥
सितपद्मेऽष्टपत्रे तु
मध्ये साद्यर्णरोधितः ।
सर्वव्याधिसमाक्रान्त-
श्चन्द्रमण्डलवेष्टितः ॥२६॥
चतुष्कोणपुराक्रान्तो
वज्रभृद्वज्रलाञ्छितः ।
मुच्यते नात्र संदेहः
सर्वव्याधिनिपीडनात् ॥२७॥

गोरोचनाकुङ्कुमक्षीरैर्भूर्जादौ सितकमलमालिख्य प्रतिपत्रमुक्तयुक्त्योल्लिखितमन्त्रेण रोधितोऽर्थात् कर्णिकायां नामद्वारोल्लिखितः साध्यो बहिः षोडशकलेन्दुबिम्बवेष्टितः सवज्रकचतुर-

श्रपुरस्थो व्याध्याक्रान्तोऽपि सर्वव्याधिपीडनान्मुच्यते । वज्रभृद्वज्रेत्युक्तेः समधिष्ठितानि वज्राणि ध्यायेदिति शिक्षयति ॥ २७ ॥

षोडशारे महाचक्रे
षोडशस्वरभूषिते ।
आद्यन्तमन्त्रयोगेन
मध्ये नाम समालिखेत् ॥२८॥
जीवान्तः सान्तमध्यस्थं
वर्णान्तेनाभिरक्षितम् ।
प्रत्यर्णममृतेशेन
संपुटित्वा तु सर्वतः ॥२९॥
मध्ये दलेषु सर्वेषु
शशिमण्डलमध्यगम् ।
बाह्ये तु द्विगुणं पद्मं
कादिसान्तक्रमेण तु ॥३०॥
पूर्ववत्तु लिखेन्मन्त्री
प्रति साद्यर्णरोधितम् ।

वर्णं तदन्तः साध्यस्य
नाम बाह्येऽर्कमण्डलम् ॥३१॥
पुरन्दरपुरेणाधः
समन्तात्परिवारयेत् ।
सितचन्दनसंयुक्तं
रोचनाक्षीरयोगतः ॥३२॥
लिखित्वा मन्त्रराजं तु
कर्पूरक्षोदधूसरम् ।
महारक्षाविधानं तु
पुष्टिसौभाग्यदायकम् ॥३३॥
एतच्चक्रं महादेवि
सितपुष्पैः प्रपूजयेत् ।
सर्वश्वेतोपचारेण
मधुमध्ये निधापयेत् ॥३४॥
अनेनैव विधानेन
सप्ताहान्मृत्युजिद्भवेत् ।

षोडशदलकमलकर्णिकायां मन्त्रसंपुटितं साध्यनाम जीवस्य सकारस्यान्तः कृत्वा, सान्तस्य हकारस्यान्तर्विधाय वर्णान्तेन क्षकारेणान्तर्बहिः संस्थितेन रक्षितं कुर्यात्। प्रतिमन्त्रं च अमृतेशसंपुटितं नाम ठकारवेष्टितं क्रमेणाकारादिस्वरमध्यगं कृत्वा मध्यस्थमन्त्रसांमुख्येन लिखेत्। षोडशपत्रस्य पद्मस्य बहिर्द्वात्रिंशद्दलमुल्लिखेत्, तत्र च कादिसान्तान् द्वात्रिंशद्वर्णान् न्यसेत्। तेषु च प्रतिवर्णं पूर्ववत्साद्यर्णरोधितमित्युक्तयुक्तया मन्त्रसंपुटितं, तादिति पूर्वन्यस्तं साध्यनामान्तर्मध्ये लिखित्वा सर्वस्यास्य बहिरर्कमण्डलमिति ठकारं, तद्बहिः पुरन्दरपुरमिति वज्रलाञ्छितं चतुरश्रसंनिवेशं कुर्यात्। प्रति साद्यर्णरोधितमित्यत्र 'व्यवहिताश्च' इति व्यवहितेन प्रतिना वर्णशब्दस्य संबन्धः। एतत्सर्वं चक्रं सितचन्दनगोरोचनाक्षीरैर्लिखित्वा, सितकुसुमकर्पूरादिभिरभ्यर्च्य माक्षिकमध्यस्थं पुष्टिसौभाग्यकृत्, सप्ताहं मधुमध्ये निहितं च मृत्युजित्३४

किंचेदम्

राजरक्षाविधानं तु
भूभृतां तु प्रकाशयेत् ॥३५॥
संग्रामकाले वरदं
रिपुदर्पापहं भवेत् ।
शिवादिनवतत्त्वानि
प्रत्येकं शशिमण्डलम् ॥३६॥
मध्यात्पूर्वादि ऐश्यन्त-
ममृतेशेन मन्त्रिणा ।
यदा व्याधिशताकीर्ण-
मपमृत्युशतेन वा ॥ ३७ ॥
तदा श्वेतोपचारेण
पूज्यं क्षीरघृतेन वा ।
तिलैः क्षीरसमिद्भिर्वा
होमाच्छान्तिं समश्नुते ॥३८॥

आतानवितानविन्यस्तरेखाचतुष्ककलितकोष्ठनवके प्रत्येकं चन्द्रमण्डललाञ्छिते मध्य-

कोष्ठकात्प्रभृति प्रागादिक्रमेण ऐश्यन्तं शिव-सदाशिव–ईश्वर-विद्या–माया–काल–नियति-प्रकृति–पुरुषतत्त्वानि नामत उल्लिख्य, सितोपचारेणानेन मन्त्रेण मन्त्रिणा यदा पूजा क्षीर-घृताभ्यां क्षीराक्तैस्तिलैः क्षीराक्तसमिद्भिर्वा होमो यथाशक्ति क्रियते, तदा व्याध्याद्यपमृत्युशताकीर्णमपि साध्यशरीरं स्वस्थतामेति ॥

एवं संपूज्य कुम्भे तु
सर्वौषधिसमन्विते ।
सितपद्ममुखोद्गारे
रत्नगर्भाम्बुपूरिते ॥३९॥
सर्वमङ्गलघोषेण
शिरस्सि ह्यभिषेचयेत् ।
स मुच्यते न संदेहः
सर्वव्याधिप्रपीडितः ॥४०॥

एवमिति शिवादिनवतत्त्वानि उक्तयुक्त्या कुम्भे ध्यात्वा संपूज्य, तेन योऽभिषिच्यते

शिरसि स सर्वव्याधिभिः पीडितोऽपि मुच्यते ।
सितपद्मैर्मुखे उद्गार आमोदो यस्येति समासः॥

ध्यात्वा परामृतं नित्यं
नित्योदितमनामयम् ।
प्रक्रियान्तस्थममृत-
मवतार्य पराच्छिवात् ॥४१॥
चतुर्नवामृताधारं
नवधा नवपूरितम् ।
शतार्धक्षोभितं नित्यं
षट्पञ्चैकसमन्वितम् ॥४२॥
अनन्ताधारगम्भीर-
मष्टात्रिंशद्विभूषितम् ।
पञ्चभिर्वा प्रसिद्ध्यर्थं
पूर्णं तेन निरन्तरम् ॥४३॥
एवं ध्यानपरो यस्तु
सबाह्याभ्यन्तरामृतम् ।

विक्षोभ्य कलशं मूर्ध्नि
दैशिको मन्त्रतत्परः ॥४४॥
अनुग्रहपदावस्थो
ह्यभिषिञ्चेत्प्रयत्नतः ।
स मुच्यते न सन्देहः
संसारादुरतिक्रमात् ॥४५॥

प्रक्रियान्तस्थं समनान्ताध्वपर्यन्तगमुन्मनापरतत्त्वामृतं, नित्यमुदितमनावृतचिज्ज्योतीरूपं, नित्यमविनाशि, न विद्यते आमयो माया यतस्तादृक्, ध्यात्वा समावेशयुक्तया विमृश्य, तत एव परमशिवात्, अमृतमिति शाक्तानन्दम्, अवतार्य शिष्यशिरोऽवतीर्णं विचिन्त्य, तन्मन्त्रपूजितं परामृतपूर्णं कलशमुच्छास्य, एवमिति उभयामृतध्यानासक्तो मन्त्रराजपरामर्शपरोऽनुजिघृक्षुराचार्यो यस्य मूर्ध्नि.सबाह्याभ्यन्तरमेतदमृतं विकिरेत् स मोक्षमाप्नोत्येव ।

कीदृगमृतमित्याह चतुर्थे नव षट्त्रिंशदर्थात् तत्त्वानि तान्येव

'एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता ।'

इति च स्थित्या अमृतानि तेषामाधारमाश्रयं, तथा नवधा यानि नव नवात्मव्योमव्याप्यादिप्रक्रियया एकाशीतिः पदानि तैः पूरितं संपूर्णं व्याप्तं, तथा शतार्धेन पञ्चाशता आदिक्षान्तैर्वर्णैः क्षोभितं व्याप्तिं भावितं, तथा षड्भिरङ्गैः पञ्चभिर्वक्त्रैरेकेन च मूलेन सम्यगन्वितं श्रीस्वच्छन्दाद्युक्तसाध्यमन्त्रसंहितापूर्णं, तथा अनन्तैः कालाग्न्याद्यनाश्रितान्तैराधारैर्भुवनैरन्तर्ध्यातैर्गम्भीरमपरिच्छेद्यं, तथा अष्टात्रिंशता वक्त्रपञ्चककलाभिर्विभूषितं, तेनेत्यनेन षड्विधेनाध्वना निरंतरं पूर्णम्, अत एव प्रसिद्धिः प्रकृष्टा भुक्तिमुक्तिलक्षणा सिद्धिरर्थः प्रयोजनं यस्य ॥ ४५ ॥

अतश्च योऽनेनाभिषिच्यते

आयुर्बलं जयः कान्ति-

धृतिर्मेधा वपुः श्रियः ।
सर्वं प्रवर्तते तस्य

प्रकर्षेण वर्तते पुष्यतीत्यर्थः ॥

तथा

भूभृतां राज्यमुत्तमम् ॥४६॥

प्रवर्तते ॥ ४६ ॥

किंच

दुःखार्दितो विदुःखस्तु
व्याधिमान् गतरुग्भवेत् ।
वन्ध्या तु लभते पुत्रं
कन्या तु पतिमावहेत् ॥४७॥

एतत्कलशाभिषेकात्सर्वोऽभीष्टफलमाप्नोतीत्यर्थः ॥ ४७ ॥

यदाह

यान्यान्समीहते कामां-
स्तान्सवान्ध्रुवमाप्नुयात् ।

तदित्थम्

अभिषेकस्य माहात्म्यं
विधानविहितस्य तु ॥४८॥
कथितं ते मया देवि
प्रजानां हितकाम्यया ।
अन्यशास्त्रोपचारेण

शास्त्रान्तरव्यवहारेण ॥ ४८ ॥

तदित्थमभिषेकात्साध्यः

सर्वशान्त्यरहो भवेत् ॥४९॥

अर्हशब्दस्थाने अरह इति शब्द ऐशः ॥

एतदुपसंहरन् अन्यदवतारयति

एवं स्थूलं विधानं तु
सूक्ष्मं चैवाधुना शृणु ॥५०॥

अनेनाधिकारेण स्थूलध्यानमुक्तं, भाविना तु सप्तमेन सूक्ष्ममुच्यते,—इति शिवम् ॥ ५० ॥

समस्तदुःखदलनं सर्वसंपत्प्रवर्तनम् ।
परनिर्वाणजननं नयनं शाङ्करं नुमः ॥

इति श्रीनेत्रोद्द्योते साधनविधिः षष्ठोऽधिकारः

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते

सप्तमोऽधिकारः ।

वक्राधारवियल्लक्ष्यग्रन्थिनाड्यादिसंकुलम् ।
स्वामृतैर्देहमासिञ्चत्स्मराम्यूर्ध्वेक्षणं विभोः ॥

अथ सूक्ष्मध्यानं निर्णेतुं भगवानुवाच

अतः परं प्रवक्ष्यामि
ध्यानं सूक्ष्ममनुत्तमम् ।

न विद्यते उत्तममन्यत् सूक्ष्मध्यानं यतः, परं तु अतोऽपि उत्तमं भविष्यति ॥

तदुपक्रमते

ऋतुचक्रं स्वराधारं
त्रिलक्ष्यं व्योमपञ्चकम् ॥१॥
ग्रन्थिद्वादशसंयुक्तं
शक्तित्रयसमन्वितम् ।

धामत्रयपथाक्रान्तं
नाडित्रयसमन्वितम् ॥२॥
ज्ञात्वा शरीरं सुश्रोणि
दशनाडिपथावृतम्।
द्वासप्तत्या सहस्रैस्तु
सार्धकोटित्रयेण च ॥३॥
नाडिवृन्दैः समाक्रान्तं
मलिनं व्याधिभिर्वृतम्।
सूक्ष्मध्यानामृतेनैव
परेणैवोदितेन तु ॥४॥
आप्यायं कुरुते योगी
आत्मनो वा परस्य च।
दिव्यदेहः स भवति
सर्वव्याधिविवर्जितः ॥५॥

ऋतवः षट् जन्म-नाभि-हृत्-तालु-विन्दु-नादस्थानानि नाडिमायायोगभेदनदीसिशान्ता-

ख्यानि नाडिमायादिप्रसराश्रयत्वात् चक्राणि यत्र, स्वराः षोडश अङ्गुष्ठ-गुल्फ-जानु-मेढ्र-पायु-कन्द-नाडि-जठर-हृत्-कूर्मनाडी-कण्ठ-तालु-भ्रू-मध्य-ललाट-ब्रह्मरन्ध्रद्वादशान्ताख्या जीवस्याधारकत्वादाधारा यत्र, यदि वा सर्वसहत्वादस्य नयस्य कुलप्रक्रियया

'मेढ्रस्याधः कुलो ज्ञेयो मध्ये तु विषसंज्ञितः ।
मूले तु शाक्तः कथितो बोधनादप्रवर्तकः ॥
अग्निसंज्ञस्ततश्चोर्ध्वमङ्गुलानां चतुष्टये ।
नाभ्यधः पवनाधारे नाभावेव घटाभिधः ॥
नाभिहृन्मध्यमार्गे तु सर्वकामाभिधो मतः ।
संजीवन्यभिधानाख्यो हृत्पद्मोदरमध्यगः ॥
वक्षःस्थले स्थितः कूर्मो गले लोलाभिधः स्मृतः ।
लम्बकस्य स्थितश्चोर्ध्वे सुधाधारः सुधात्मकः ॥
तस्यैव मूलमाश्रित्य सौम्यः सोमकलावृतः ।
भ्रूमध्ये गगनाभोगे विद्याकमलसंज्ञितः ॥
रौद्रस्तालुतलाधारो रुद्रशक्त्या त्वधिष्ठितः ।
चिन्तामण्यभिधानाख्यश्चतुष्पथनिवासि यत् ॥
ब्रह्मरन्ध्रस्य मध्ये तु तुर्याधारस्तु मस्तके ।
नाड्याधारः परः सूक्ष्मो घनव्याप्तिप्रबोधकः ॥
इत्युक्ताः षोडशाधाराः.....॥'

इति । त्रीणि अन्तर्बहिरुभयरूपाणि लक्ष्याणि-लक्षणीयानि यत्र, निरावरणरूपत्वात्

'खमनन्तं तु जन्माख्यं' (७।२७)

इति वक्ष्यमाणानां जन्म-नाभि-हृद्-विन्दु-नादरूपाणां व्योम्नां पञ्चकं विद्यते यत्र,

'जन्ममूले तु मायाख्यो.....।' (७।२२)

इत्यभिधास्यमानाश्चैतन्यावृतिहेतुत्वात् ग्रन्थयो माया-पाशव-ब्रह्म-विष्णु-रुद्र-ईश्वर-सदाशिव—इन्धिका - दीपिका - वैन्दव - नाद - शक्त्याख्या ये पाशास्तैः संयुक्तम् । इच्छादिना शक्तित्रयेण सम्यगन्वितमेषणीयादिविषये प्रवर्तमानम् । सोम-सूर्य-वह्निरूपधामत्रयपथैः सव्यापसव्यपवनैर्मध्यमपवनेन चाधिष्ठितम् । इडा-पिङ्गला-सुषुम्नाख्येन पवनाश्रयेण नाडित्रयेण युक्तम् । गान्धारी - हस्तिजिह्वा - पूषा - यशा-अलम्बुसा-कुहू-शङ्खिनीभिश्च युक्तत्वात् दश नाडयः पन्थानो येषां प्राणापानसमानोदान-

व्याननागकूर्मकृकरदेवदत्तधनञ्जयाख्यास्तैः आ समन्ताद्धृतमोतप्रोतम् । दिग्दशकावस्थित-नाडिदशकप्रपञ्चभूताभिर्द्वासप्तत्या सहस्रैर्मध्य-व्यांख्या सार्धकोटित्रयेण च महाव्याख्या ना-डिवृन्दैः समाक्रान्तम् । आणवमायीयकार्ममम-लयोगान्मलिनम् । योगिनामपि

'..... येनेदं तद्धि भोगतः ।'

इति स्थित्यावश्यंभाविक्रोडीकृतं शरीरं ज्ञात्वा योगी यस्य आत्मनः परस्य वा, परेणैवेति पररूपतामनुज्झतापि समनन्तरभाविना सूक्ष्म-ध्यानामृतेनोदितेन स्फुटीभूतेनाप्यायं करोति, स गतव्याधिर्दिव्यदेह इति सूक्ष्मध्यानामृतो-न्मिषच्छाक्तमूर्तिर्भवति ॥५॥

'सूक्ष्मध्यानामृतेनैव परेणैवोदितेन' इति यदुक्तं तत्सोपक्रमं स्फुटयति

यत्स्वरूपं स्वसंवेद्यं
स्वस्थं स्वव्याप्तिसंभवम् ।

स्वोदिता तु परा शक्ति-
स्तत्स्था तद्भर्भगा शिवा ॥६॥
तां वहेन्मध्यमप्राणे
प्राणापानान्तरे ध्रुवे ।
अहं भूत्वा ततो मन्त्रं
तत्स्थं तद्भर्भगं ध्रुवम् ॥७॥
स्वोदितेन वरारोहे
स्पन्दनं स्पन्दनेन तु ।
कृत्वा तमभिमानं तु
जन्मस्थाने निधापयेत् ॥८॥
भावभेदेन तत्स्थाना-
न्मूलाधारे नियोजयेत् ।
नादसूच्या प्रयोगेन
वेधयेत्सूक्ष्मयोगतः ॥९॥
आधारषोडशं भित्त्वा
ग्रन्थिद्वादशकं तथा ।

मध्यनाडिपथारूढो
वेधयेत्परमं ध्रुवम् ॥१०॥
तत्प्रविश्य ततो भूत्वा
तत्स्थोऽसौ व्यापकः शिवः ।
सर्वामयपरित्यागा-
न्निष्कलाक्षोभशक्तितः ॥११॥
पुनरापूर्य तेनैव
मार्गेण हृदयान्तरम् ।
तत्र प्राविष्टमात्रं त
ध्यायेल्लब्धं रसायनम् ॥१२॥
विश्रामानुभवं प्राप्य
तस्मात्स्थानात्प्रवाहयेत् ।
सर्वं तदमृतं वेगा-
त्सर्वत्रैव विरेचयेत् ॥१३॥
अनन्तनाडिभेदेन
अनन्तामृतमुत्तमम् ।

अनन्तध्यानयोगेन
परिपूर्यं पुरं स्वकम् ॥१४॥
अजरामरस्ततो भूत्वा
सबाह्याभ्यन्तरं प्रिये ।
एवं मृत्युजिता सर्वं
सूक्ष्मध्यानेन पूरितम् ॥१५॥
ततोऽसौ सिद्ध्यति क्षिप्रं
सत्यं देवि न चान्यथा ।

यदिति प्रथमाधिकारनिर्दिष्टपरधामात्मवीर्यं, स्वरूपमिति विशेषानिर्देशात् सर्वस्य, स्वसंवेद्यं स्वप्रकाशं नतु स्वसंवेदनान्यप्रमाणप्रमेयम्

'तस्य देवातिदेवस्य परापेक्षा न विद्यते ।
परस्य तदपेक्षत्वात्स्वतन्त्रोऽयमतः स्थितः ॥'

इति कामिकोक्तनीत्या अस्य भगवतः प्रमाणागोचरत्वात्, अत एव स्वतन्त्रात्मन्यवतिष्ठते न त्वन्यत्र तद्विविक्तस्यान्यस्याभावात्, प्रत्युता-

न्याद्विश्वं तद्व्याप्तत्वात्तन्मयमेव संभवतीत्याह 'स्वव्याप्तिसंभवं' स्वव्याप्त्या संभवो विश्वरूपतयोन्मज्जनं यस्य। अस्य च भगवतः परा स्वातन्त्र्यात्मा शक्तिः स्वा अव्यभिचारिणी चासौ उदिता प्रस्फुरद्रूपा, तत्रैव च भगवद्रूपे स्थिता, नचाधाराधेयभावेन अपितु सामरस्येनेत्याह 'तद्भर्गा'। अतश्च शिवा परमार्थशिवाभिन्नरूपत्वात् शिवा। एवं परं रूपं भित्तिभूतत्वेन प्रकाश्य सूक्ष्मध्यानं वक्तुमुपक्रमते तामित्यादिना, तां परां चितिशक्तिं, मध्यमप्राणे सुषुम्नास्थोदानाख्यप्राणब्रह्मणि, वहेत् निमज्जितप्राणापानव्याप्तिं उन्मग्नतया विमृशेत्। कथम्। 'अहं भूत्वा' देहादिप्रमातृताप्रशमनेन पूर्णाहन्तामाविश्येत्यर्थः। तत उक्तवक्ष्यमाणवीर्यव्याप्तिकं मूलमन्त्रं तत्स्थं तद्भर्गमिति पराशक्तिसामरस्यमयम्, अत एव स्पन्दनमिति सामान्यस्पन्दरूपं कृत्वा कथं स्वोदितेन स्पन्दनेन अप्राणाद्यवष्टम्भेन। एवं मन्त्रवीर्यसारमामृश्य

तमभिमानं तदसामान्यचमत्कारमयं स्वं वीर्यं जन्माधारे आनन्दचक्रे निधापयेत् प्रतिष्ठापयेत् । कथम् । भावस्य देहप्राणादिमिताभिमानमयस्य भेदेन प्रशमनेन । ततोऽपि मूलाधारे कन्दे तमभिमानं भावभेदेनैव नियोजयेत् निरूढं कुर्यात् । ततोऽपि स्फुरत्तोन्मिषत्तारूपमन्त्रनाथप्राणसूच्या हेतुना कृतो यः प्रकृष्टः क्रमात्क्रममूर्ध्वारोहात्मा योगस्तेन । तथा सूक्ष्मयोगत इति उन्मिषत्स्फुरत्तोत्तेजनप्रकर्षेण । मध्यनाडीपथमारूढः पूर्वोद्दिष्टकुलशास्त्रादिष्टमाधारषोडशकं तथोपक्रान्तनिर्णेष्यमाणं ग्रन्थिद्वादशकं च भित्त्वा परमं ध्रुवं द्वादशान्तधाम वेधयेदाविशेत्। तच्च प्रविश्य, सर्वस्यामयस्य महामायापर्यन्तस्य बन्धस्य परित्यागात्, तत्रैव ध्रुवपदे स्थितः सन्, व्यापको नित्योदितपराशक्तिसमरसः परमशिवैकरूपो भूत्वा, तेनैव द्वादशान्तादन्तःप्रसृतेन मध्यमेन मार्गेण हृदयमध्यमापूर्य परानन्दप्रसरणाच्छुरितं कृत्वा, तत्र हृदि प्रविष्ट-

मात्रं ततू परमानन्दरूपं रसायनमासादितं ध्यायेद्विमृशेत् तावद्यावत्तत्र विश्रान्तिमेति, ततस्तस्माद्धृदयादुच्छलितं तदमृतं प्रवाहयेत् नाडीप्रवाहाभिमुखं कुर्यात् । ततस्तेनैवामृतेन अनन्तनाडीप्रवाहप्रसृतेन बहलध्यानध्यातेन सबाह्याभ्यन्तरं स्वं पुरं देहं परिपूर्य तदनन्तरं सर्वममृतं वेगात् द्रुतप्रवाहेन सर्वरोमरन्ध्रैः सर्वत्र गोचरे रेचयेत् अव्युच्छिन्नप्रवाहं प्रेरयेत्। एवं परवीर्यात्मना भगवता मृत्युजिता प्रोक्तसूक्ष्मशाक्तानन्दध्यानेन यदा सर्वमापूरितं चिन्तयति योगी तदासौ अजरामरो भूत्वा क्षिप्रं सिद्ध्यति मृत्युजिद्भट्टारकतामाप्नोति । नात्र प्रमातृसुलभः संशयः कार्यः ॥ १५ ॥

एवं शाक्तानन्दमार्गावष्टम्भात्मककौलिकप्रक्रियोक्ताधारादिभेदेन सूक्ष्मध्यानमुक्त्वा, स्थूलयुक्तिक्रमेण तत्रप्रक्रियोक्ताधारादिभेदेन पूर्णसितामृतकल्लोलचिन्तनात्मसूक्ष्मध्यानं वक्तुमुपक्रमते

जन्मस्थाने समाश्रित्य
स्पन्दस्थां मध्यमां कलाम्।१६।
तत्स्थं कृत्वा तदात्मानं
कालाग्निं तु समाश्रयेत् ।
गत्वा गृहीतविज्ञानं
वीर्यं तत्रैव निक्षिपेत् ॥१७॥
तद्वीर्यापूरिता शक्तिः
क्रियाख्या मध्यमोत्तमा ।
विज्ञानेनोर्ध्वतो भित्त्वा
ग्रन्थिभेदेन चेच्छया ॥१८॥
मूलस्पन्दं समाश्रित्य
त्यक्त्वा वाहद्वयं ततः ।
मध्यमार्गप्रवाहिन्या
सुषुम्नाख्यां समाश्रयेत्॥१९॥
तामेवाश्रित्य विरमे-
त्तत्सर्वेन्द्रियगोचरात् ।

तदा प्रत्यस्तमायेन
विज्ञानेनोर्ध्वतः पुनः ॥२०॥
ब्रह्मादिकारणानां तु
त्यागं कृत्वा शनैः शनैः ।
षण्णां शक्तिमतां प्राप्य
कुण्डलाख्यां निरोधिकाम् २१
मायादिग्रन्थिभेदेन
हृदादिव्योमपञ्चकम् ।

पूर्वं जन्मस्थानमानन्देन्द्रियमुक्तम् इह तु कन्दः तत्र, स्पन्दस्थामिति स्पन्दाविष्टां, मध्यमां कलां प्राणशक्तिमाश्रित्य मत्तगन्ध-स्थानसंकोचविकासाभ्यां शतशः उन्मिषितां सूक्ष्मप्राणशक्तिमभ्यास्य, आत्मानं मनस्तदवसरे तत्स्थं तन्निभालनैकाविष्टं कृत्वा, कालाग्निमिति पादाङ्गुष्ठाधारं गत्वा समाश्रयेत् भावनया-ध्यासीत। तत्रैव च गृहीतविज्ञानं वीर्यमिति कन्दभूम्यासादितं शाक्तस्पन्दात्म वीर्यं निक्षि-

पेत् भावनाप्रकर्षेण स्फुटयेत्। इत्थं तद्वीर्येत्युक्त-वीर्येणापूरिता लब्धोदया, प्राणस्पन्दात्मा क्रिया-शक्तिरुत्तमातिशयेनोद्गता सती मध्यमा भवति समस्तदेहस्य नाभिर्मध्यं तत्र प्राप्ता जायते । कथम्। इच्छया संकोचक्रमोत्थोर्ध्वारोहणप्रयत्ने-न, विज्ञानेन च भावनया, ऊर्ध्वत इत्युपरितनगु-ल्फजानुमेढ्रकन्दनाभ्याख्यानां ग्रन्थीनां भेदेन वेधनव्यापारेण भित्त्वा अर्थात् तान्येवोर्ध्वस्था-नान्याक्रम्य 'भेदिता माण्डलिका भूभुजा'इति-वद्भिदिः स्वीकारार्थः । अथ मूलस्पन्दं समाश्रि-त्येति मत्तगन्धस्थानं विकासाकुञ्चनपरम्परापुरः-सरं निरोध्य । एतच्च श्रीस्वच्छन्दोक्तदिव्यकर-णोपलक्षणपरम्। अत एव वाहद्वयं पार्श्वनाड्यौ त्यक्त्वा परिहृत्य, तत इति प्रोक्तेच्छाज्ञानावष्ट-म्भयुक्तया, मध्यमार्गप्रवाहिण्या प्रोक्तया मध्य-प्राणब्रह्मशक्त्या सुषुम्नाख्यां नाडीं सम्यगाश्र-येत्। तामाश्रित्य तत इत्यभ्यस्तात् सर्वेन्द्रिय-

गोचराद्विरमेत् अन्तर्मुखीकृतसर्वेन्द्रियस्तिष्ठेत् । तदा च प्रत्यस्ता प्रतिक्षिप्ता माया प्राणादिप्रधानतात्माख्यातिर्येन तादृशा, प्रकाशानन्दात्मना ज्ञानेन हृत्कण्ठादिगतस्रष्ट्रयादिसंवित्स्वभावब्रह्मादिकारणानि क्रमात् त्यक्त्वा, वक्ष्यमाणमायादिग्रन्थिभेदेन सह हृदादिव्योमपञ्चकं च त्यक्त्वा, षण्णां ब्रह्मविष्णुरुद्रेश्वरसदाशिवशिवाख्यानां कारणानामूर्ध्वत ऊर्ध्वे स्थितां कुण्डलाख्यां शक्तिं शून्यातिशून्यांन्तमशेषविश्वगर्भाकारात्मककुण्डलरूपतयावस्थितां समनाख्यां शक्तिं प्राप्य, विज्ञानेनोर्ध्वं विरमेत् उन्मनापरतत्त्वात्मतामाविशेदिति दूरेण संबन्धः। विरमेदिति पूर्वस्थमिहापि योज्यम् ॥

तत्र निर्भेद्यग्रन्थ्यादीनां स्वरूपं तावत्क्रमेणादिशति

जन्ममूले तु मायाख्यो
ग्रन्थिर्जन्मनि पाशवः ॥२२॥

ब्रह्मा विष्णुश्च रुद्रश्च
ईश्वरश्च सदाशिवः ।
कारणस्थास्तु पञ्चैवं
ग्रन्थयः समुदाहृताः ॥२३॥
इन्धिकाख्यस्तु यो ग्रन्थि-
र्हिमार्गाशमनः शिवः ।
तदूर्ध्व दीपिका नाम
तदूर्ध्वे चैव बैन्दवः ॥२४॥
नादाख्यस्तु महाग्रन्थिः
शक्तिग्रन्थिरतः परः ।

जन्ममूलमानन्देन्द्रियं तच्छरीरोत्पत्तिहेतु-र्मायारूपतया मायाख्यो ग्रन्थिः । जन्मनि कन्दे पाशवः पशूनां संकुचितदृक्शक्तित्वात् पाश्यानामयमाधारनानानाडीप्राणादीनां प्रथमोद्भेदकल्पः । हृत्कण्ठतालुभ्रूमध्यललाटस्थानां ब्रह्मादीनां कारणानां पशुं प्रति सृष्ट्यादि-

कर्तृत्वेन निरोधकत्वात् ग्रन्थिरूपकत्वात् तत्स्थाः पञ्च ग्रन्थयः, निरोधिकोर्ध्वे

'इन्धिका दीपिका चैव रोचिका मोचिकोर्ध्वगा ।'(१०।१२२३)

इति श्रीस्वच्छन्दे नादशक्तयो या उक्ताः ता एवेह परचित्प्रकाशावारकरूपत्वात् ग्रन्थय उक्ताः । तत्रेन्धिकाख्यो यो ग्रन्थिरसौ द्विमार्गाशमनः इति निरोधिकास्पृष्टवामदक्षिणवाहनिःशेषप्रशमनहेतुः, अत एव शिव ऊर्ध्वैकमार्गारोहकत्वात् श्रेयोरूपः । तदूर्ध्वे किंचिद्दीप्तिहेतुत्वात् दीपिकाख्यो ग्रन्थिः, अतोऽपि किंचिदधिकप्रकाशहेतुत्वात् बैन्दवः । रोचिकेत्यन्यत्र योक्ता शक्तिस्तद्रूपो ग्रन्थिः । तदुपरि नादाख्यो महाग्रन्थिरिति। मोचिकोर्ध्वगेत्यन्यत्र यच्छक्तिद्वयमुक्तं तत्रोर्ध्वगा नादान्तेति तत्रैव योक्ता सैवेहान्तर्भावितमोचिका नादाख्यो महाग्रन्थिरित्युक्तः । महत्त्वं चास्य ग्रन्थ्यन्तर्भावादेव । अतः परः शक्तिस्थानस्थो ग्रन्थिः शक्तिग्रन्थिः ॥

यदेवं निर्णीतं तत्

ग्रन्थिद्वादशकं भित्त्वा
प्रविशेत्परमे पदे ॥२५॥

उन्मनापरतत्त्वात्मनि धाम्नि ॥ २५ ॥

अत्र ब्रह्मादिकारणग्रन्थिभेदनादेव तदधिष्ठितहृदादिस्थानानि शक्तिग्रन्थिभेदेन च शक्तिस्थानं तदुपरि च व्यापिनीधामशिवस्थाने दलयेदित्याह

ब्रह्माणं च तथा विष्णुं
रुद्रं चैवेश्वरं तथा ।
सदाशिवं तथा शक्तिं
शिवस्थानं प्रभेदयेत् ॥२६॥

अन्ते स्थानशब्दो ब्रह्मादिशब्दानामपि तत्स्थानप्रतिपादकत्वसूचनाय ॥ २६ ॥

अथ पूर्वोद्दिष्टं शून्यपञ्चकं षट्चक्रं च प्रदर्शयति

खमनन्तं तु जन्माख्यं
नाभौ व्योम द्वितीयकम् ।

तृतीयं तु हृदि स्थाने
चतुर्थं बिन्दुमध्यतः ॥२७॥
नादाख्यं तु समुद्दिष्टं
षट्चक्रमधुनोच्यते ।
जन्माख्यं नाडिचक्रं तु
नाभौ मायाख्यमुत्तमम्॥२८॥
हृदिस्थं योगिचक्रं तु
तालुस्थं भेदनं स्मृतम् ।
बिन्दुस्थं दीप्तिचक्रं तु
नादस्थं शान्तमुच्यते ॥२९॥

अनन्तवद्विश्वाश्रयत्वादनन्तम् । नादाश्रयत्वात् नादाख्यम्। नाडिप्रसरहेतुत्वात्

'नाभिचक्रे कायव्यूहज्ञानम्।' (पा० यो० ३।२९)

इति नीत्या समस्तमायाप्रपञ्चख्यातिहेतुत्वात्, योगिनां चित्तैकाग्र्यप्रदत्वात्, प्रयत्नेन भेदनीयत्वात्, दीप्तिरूपत्वात्, शान्तिप्रदत्वादिति

क्रमेण नाडिचक्रादौ हेतवः । एतानि शून्यानि सौषुप्तावेशप्रदत्वात् चक्राणि तु भेदप्रसरहेतुत्वात् हेयानीति कृत्वा ॥ २९ ॥

तैः सह

पूर्वोक्तानि च सर्वाणि
ज्ञानशूलेन भेदयेत् ।

पूर्वोक्तनीत्याधारग्रन्थ्यादीनि । ज्ञानशूलं मन्त्रवीर्यभूतचित्स्फुरत्ता ॥

ज्ञानशूलोत्तेजने युक्तिमाह

आक्रम्य जन्माधाराख्यं
तन्मूलं पीडयेच्छनैः ॥३०॥

चित्तप्राणैकाग्र्येण कन्दभूमिमवष्टभ्य, तन्मूलमिति मत्तगन्धस्थानं, शनैरिति संकोचविकासाभ्यासेन, शक्त्युन्मेषमुपलक्ष्य पीडयेत् यथा शक्तिरूर्ध्वमुखैव भवति ॥ ३० ॥

अथ प्रसंगान्नानाशास्त्रप्रसिद्धान् पर्यायान् जन्माधारस्याह

जन्माधारस्य सुश्रोणि
पर्यायाञ्छृण्वतः परम् ।
जन्मस्थानं तु कन्दाख्यं
कूर्माख्यं स्थानपञ्चकम्॥ ३१॥
मत्स्योदरं तथैवेह
मूलाधारस्तथोच्यते ।

मरुदुद्भवहेतुत्वात्, मध्यनाडीकन्दरूपत्वात्, कूर्माकारत्वात्, पृथिव्यादिव्योमान्ततत्त्वपञ्चकस्थानत्वात्, मत्स्योदरवत् स्फुरणात्, मूलभूतत्वाच्च जन्मादि आख्यायते ॥

एवं महामाहात्म्याच्छास्त्रेषु निरुच्यते या कन्दभूः

तत्स्थां वै खेचराख्यां तु
मुद्रां विन्देत योगवित्॥ ३२॥
मुद्रया तु तया देवि
आत्मा वै मुद्रितो यदा ।

तदा चोर्ध्वं तु विसरे-
द्विज्ञानेनोर्ध्वतः क्रमात्॥ ३३॥

तत्स्थामिति कन्दभूमिविस्फुरितां शक्तिं, मुदो हर्षस्य राणात् पाशमोचनभेददावणात्मत्वात् परसंविद्द्राविणमुद्रणाच्च मुद्रां, खे बोधगगने चरणात् खेचर्याख्यां योगी लभेत। लब्धया तु तया यदा आत्माणुर्मुद्रितः तद्वशः संपन्नः, तदा मन्त्रवीर्यस्फुरत्तात्मना विज्ञानेनोर्ध्वं द्वादशान्तं यावद्विसरेत् प्रसरेत् ॥ ३३ ॥

एतदेव स्फुटयति

भिन्द्याद्भिन्द्यात्परं स्थानं
यावत्स्वरवरार्चिते ।
तत्स्थानं चैव संप्राप्य
योगी समरसो भवेत् ॥३४॥
निष्कलं भावमापन्नो
व्यापकः परमः शिवः ।

परं स्थानं द्वादशान्तम् । भिन्द्यादिति वीप्सया क्रमादित्युक्तिः स्फुटीकृता । समरस इति सर्वस्याधस्तनस्याध्वनस्तन्मयीभावप्राप्तेः। परमः शिव इति नतु भेदवाद्युक्तव्यतिरिक्तमुक्तशिवरूपः ॥

अथ श्लोकार्धेन परमशिवाभेदव्याप्तिमनुवदन् शक्तेरवरोहक्रमेण व्याप्तिमादेष्टुमुपक्रमते

एवं भूत्वा समं सर्वं
निःस्पन्दं सर्वदोदितम्॥३५॥
ततः प्रवर्तते शक्ति-
र्लक्ष्यहीना निरामया ।
इच्छामात्रविनिर्दिष्टा
ज्ञानरूपा क्रियात्मिका॥३६॥
एका सा भावभेदेन
तस्य भेदेन संस्थिता ।

भूत्वेत्यन्तर्भावितणिजर्थः । तेन सर्वं समनान्तम्, एवं द्वादशान्तारोहणेन, समं समरसं,

निःस्पन्दं प्रशान्तकल्लोलं, सर्वदोदितं प्राप्तपरचित्प्रकाशैक्यं, भावयित्वा संपाद्य, तत एव द्वादशान्तधाम्नो, लक्ष्यहीना परस्फुरत्तात्मा,निष्क्रान्त आमयो महामाया यस्यास्तादृशी महामायाद्युल्लासिका परा शक्तिः, प्रवर्तते समुन्मिषति इच्छा-ज्ञान-क्रियारूपतया क्रमेण स्फुरतीत्यर्थः । तत एवैका, तस्येति परमशिवस्य, संबन्धिना भावभेदेन एषणीयज्ञेयकार्यावभासनोदयवैचित्र्येण हेतुना, भेदेन संस्थिता गृहीतेच्छादिनानात्वा ॥

यत एवं परमशिवाच्छक्तिः स्वयं प्रवर्तते, तेन

खेचरीमुद्रयापूर्य
शक्त्यन्तं तत्र सर्वतः ॥३७॥
यावच्च नोदितश्चन्द्र-
स्तावत्सूक्ष्मं निरञ्जनम् ।
भावग्राह्यमसंदिग्धं
सर्वावस्थोज्झितं परम् ॥३८॥

व्यापकं परमेशान-
मनौपम्यमनामयम् ।
भवन्ति योगिनस्तत्तु
तदारूढौ वरानने ॥३९॥

तत्र

'बद्ध्वा पद्मासनं योगी नाभावक्षेश्वरं न्यसेत् ।
दण्डाकारं तु तावत्तन्नयेद्यावत्कखत्रयम् ॥
निगृह्य तत्र तत्तूर्णं प्रेरयेत्खत्रयेण तु ।
एतां बद्ध्वा महायोगी खे गतिं प्रतिपद्यते ॥' (७।१६)

इति श्रीमालिनीविजयलक्षितया पूर्वोद्दिष्टखेचरीमुद्रया शक्त्यन्तं यावत्, सर्वतः सर्वप्रकारेणापूर्य यावत् तत्र चन्द्र इत्यपानो नोदितो भवेत् तावत् तदारूढौ तच्छक्तिपदारोहे सति, योगिनः, सूक्ष्ममतीन्द्रियं, निरञ्जनमनावरणं, भावग्राह्यं स्वप्रकाशम्, असन्दिग्धं स्वविमर्शसारं, सर्वाभिर्जागराद्यवस्थाभिरुज्झितं, सर्वसामरस्यावस्थानात्परं, दिग्देशाद्यनवच्छेदात् व्या-

पकं, परमेशानं स्वतन्त्रम्, अद्वितीयत्वात् अनौपम्यं, न विद्यते आमयो महामायावच्छेदो यतो भक्तिभाजां तदनामयं, यत् परं धाम तद्भवन्ति तन्मया जायन्ते इत्यर्थः ॥३९॥

एवं प्राप्तपरतत्त्वाभेदस्य योगिनः 'ततः प्रवर्तते शक्तिः' इत्यनेन योन्मिषन्ती परा शक्तिरुक्ता

सा योनिः सर्वदेवानां
शक्तीनां चाप्यनेकधा ।
अग्नीषोमात्मिका योनि-
स्तस्याः सर्वं प्रवर्तते ॥४०॥
तत्र संग्रथिता मन्त्रा-
स्त्राणवन्तो भवन्ति हि ।
सर्वेषां चैव संहार-
स्तदेव परमं पदम् ॥४१॥
तस्मात्प्रवर्तते सृष्टि-
र्विक्षोभ्य परमं शिवम् ।

अनौपम्यामृतं प्राप्य
बिन्दुं विक्षोभ्य लीलया॥४२॥
चन्द्रोदये तदा ख्याते
परमामृतमुत्तमम् ।
बहलामृतकल्लोल-
मनन्तं तत्र संस्मरेत् ॥४३॥
तस्मात्प्राप्यामृतं शुद्धं
स्वशक्त्या चैव कर्षयेत् ।
मध्यमार्गेण सुश्रोणि
कारणादि प्रभेदयेत् ॥ ४४ ॥
आप्यायनं प्रकुर्वीत
स्थाने स्थाने ह्यनुक्रमात् ।
यावद्ब्रह्मपदं प्राप्तं
तस्मादाप्याययेदधः ॥ ४५ ॥
जन्मस्थानपथाच्चैव
कालाग्नौ तु प्रवर्तयेत् ।

तदापूर्य समन्तात्तु
परिपूर्णं स्मरेत्पुरम् ॥ ४६ ॥
सुषुम्नामृतेनाखिलं
परिपूर्णं विभावयेत् ।
अनन्तनाडिभिस्तत्र
रोमकूपैः समन्ततः ॥ ४७ ॥
निष्क्रम्य व्यापको भूत्वा
ह्यमृतोर्मिभिराकुलम् ।
अमृतार्णवसंरूढं
मज्जन्तममृतार्णवे ॥ ४८ ॥
तदूर्ध्वं ह्यमृतार्णं तु
प्रद्रुतं व्यापकं शिवम् ।
एवं समरसीभूतं
ह्यमृतं सर्वतोमुखम् ॥ ४९ ॥
इच्छाज्ञानाक्रियारूप
शिवमात्मस्वरूपकम् ।

निरामयमनुप्राप्य
स्वानुभूत्या विभावयेत्॥५०॥
अमृतेशपदं सूक्ष्मं
संप्राप्यैवामृतीभवेत् ।
तदासावमृतीभूय
मृत्युजिन्नात्र संशयः ॥५१॥
कालजित्सुभगो धीरो
मृत्युस्तं च न बाधते ।

सर्वदेवानामिति अनाश्रितसदाशिवेश्वरानन्तरुद्रादीनां, शक्तीनामिति वामाज्येष्ठादीनां ब्राह्म्यादीनां च, यतश्च सा शक्तिरग्नीषोमात्मिका योनिस्तत एव सोमप्रधाना, यतस्तस्याः सर्वं प्रवर्तते उद्भवति अत एवाग्नीषोमात्मशक्तिप्रकृति विश्वमग्नीषोममयमेव । तथा चाग्निरप्याह्लादयति हिममपि च दहति,—इति तत्त्वविद आहुः। किंच तत्राग्नीषोमात्मशक्तिधाम्नि

संग्रथितास्तद्वीर्यसारत्वेनोच्चारिता मन्त्रास्त्राण-वन्तः सिद्धिमुक्तिदाः,—इति शक्तेः स्थितिहेतु-त्वमुक्तम् । तदेवेति अग्नीषोमात्मनः शक्तेरग्नि-रूपत्वात्संहर्तृत्वं च । एवं सृष्टिस्थितिसंहारहेतुत्वं शक्तेः प्रदर्श्य प्रकृतमाह तस्मादिति, यत एवं-भूतैषा शक्तिस्तस्मात्परं शिवं विक्षोभ्य समना-पदावरोहणेन सृष्ट्युन्मुखं कृत्वा, तत्रानौपम्य-मिति परमानन्दमयममृतं प्राप्य, बिन्दुमिति महाप्रकाशात्म समनारूढं धाम, लीलया स्वात-न्त्र्यक्रीडया, विक्षोभ्य सृष्टिप्रसरोन्मुखं विधाय, तदा चन्द्रोदयेऽपानोल्लासे ख्याते सति, तत एव शाक्ताद्धाम्न उदितं परमामृतमुत्तममान-न्दरसप्रधानं बहला अमृतकल्लोलाः सुसितसुधा-प्रसरा यस्य तादृक्, अनन्तमनवच्छिन्नं, तत्र स्मरेत् ध्यायेत् । तस्मात् चन्द्रोदयाच्छुद्धममृतं प्राप्यान्तर्मुखीभूतया स्वशक्त्या मध्यमार्गेण कर्षयेदधोऽधः प्रवर्तयेत् । तेन च कारणादीति कारणानि ब्रह्मादीनि आदिशब्दात् पूर्वोक्तं

चक्राधारादि सर्वं, प्रभेदयेत् निषिञ्चेत् । एतदेवाप्यायनमित्यादिनानेन स्फुटीकृतम् । ब्रह्मस्थानं हृद्धाम यावत्तदमृतं प्राप्तं भवति, ततोऽप्यधो नाभेरधःस्थाने निषिच्य कालाग्न्यन्तमापूर्य समन्तात्परिपूर्णं देहं स्मरेत्। ततः सर्वरोमकूपैः प्रस्रत्यान्तर्बहिरासादितव्याप्ति सर्वदिक्क्रममृतार्णवप्लावनसमरसीभूतपरमामृतरूपम्, इच्छाज्ञानक्रियाशक्तिकचितं परमशिवरूपं निरामयमात्मानं चिन्तयेत् । एवं सूक्ष्मध्यानाद्विजितमृत्युरासादितपरमसौभाग्योऽमृतेशतुल्यो भवति ॥ ५१ ॥

उपसंहरति

कालस्य वञ्चनं सूक्ष्मं
मया ते प्रकटीकृतम् ॥५२॥
न कस्यांचिन्मयाख्यातं
त्वद्दते भक्तवत्सले ॥५३॥

तवैव परानुग्रहैकव्रताया एवं प्रकटीकृतम् ॥

सूक्ष्मध्यानसमुल्लासिसुधाकल्लोलकेलिभिः ।
प्लावयन्निखिलं नौमि नेत्रमुच्चैर्महेशितुः ॥

इति श्रीनेत्रोद्योते सूक्ष्मध्याननिरूपणं नाम सप्तमोऽधिकारः ॥ ७ ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते

अष्टमोऽधिकारः ।

अमन्दानन्दसन्दोहि स्पन्दान्दोलनसुन्दरम् ।
स्वज्योतिश्चिन्महाज्योतिर्नेत्रं जयति मृत्युजित् ॥

सूक्ष्मध्यानानन्तरं परध्याननिर्णयाय श्रीभगवानुवाच

अथ मृत्युञ्जयं नित्यं
परं चैवाधुनोच्यते ।
यत्प्राप्य न प्रवर्तेत
संसारे त्रिविधे प्रिये ॥१॥

अथशब्दः सूक्ष्मध्यानानन्तर्यप्रथनाय, नित्यमेव च यन्मृत्युञ्जयं कालग्रासि, परमनुत्तरं परमेशस्वरूपम्। त्रिविध इति मायान्तसदाशिवान्तशिवान्तभवाभवातिभवरूपे ॥ १ ॥

किंच

योगी सर्वगतो भाति
सर्वदृक्सर्वकृच्छिवः ।
तदहं कथयिष्यामि
यस्मादन्यन्न विद्यते ॥२॥
यत्प्राप्य तन्मयत्वेन
भवति ह्यजरामरः ।

परयोगिनोऽस्य देहादिप्रमातृतास्पर्शात् जरामरणादिकथैव न काचिदस्तीत्यर्थः ॥

तदेतद्वक्तुमुपक्रमते

यन्न वाग्वदते नित्यं
यन्न दृश्येत चक्षुषा ॥३॥
यच्च न श्रूयते कर्णै-
र्नासा यच्च न जिघ्रति ।
यन्नास्वादयते जिह्वा
न स्पृशेद्यत्त्वगिन्द्रियम् ॥४॥
न चेतसा चिन्तनीयं
सर्ववर्णरसोज्झितम् ।

सर्ववर्णरसैर्युक्त-
मप्रमेयमतीन्द्रियम् ॥ ५ ॥
यत्प्राप्य योगिनो देवि
भवन्ति ह्यजरामराः ।
तदभ्यासेन महता
वैराग्येण परेण च ॥६॥
रागद्वेषपरित्यागा-
ल्लोभमोहक्षयात्प्रिये ।
मदमात्सर्यसंत्यागा-
न्मानगर्वतमःक्षयात् ॥७॥
लभ्यते शाश्वतं नित्यं
शिवमव्ययमुत्तमम् ।

पश्यन्त्यादित्रिरूपापि वाग् यन्न भाषते; यच्च बाहिरन्तःकरणागोचरः; वर्णयन्तीति वर्णा वाचकाः, वर्ण्यन्ते इति वर्णा वाच्याः, सर्वे च ते वर्णास्तेषां रसाः प्रसरास्तैरुज्झितमवाच्यवाचकात्मेत्यर्थः; अथच तैः सर्वैर्युक्तं विश्वात्मकत्वात् अतश्चातीन्द्रियत्वान्न प्रमेयमपितु परप्रमात्रे-

करूपमिति पर्यवसितं, यदेवंभूतं तत्त्वं प्राप्य समाविश्य,

'योगमेकत्वमिच्छन्ति ..... ।' (४।२२)

इति स्थित्या योगिनः परतत्त्वैकशालिनस्तत्त्वतो जरामृत्युरहिता भवन्ति । तन्महताभ्यासेन 'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।' (भ. गी. १२।२) इति सततसमावेशप्रयत्नेन परेण वैराग्येण दृष्टागमिकधराद्यनाश्रितान्तसमस्तभोगवैतृष्ण्येन, अत एव रागद्वेषादिसर्वदोषप्रशमाच्च लभ्यते, मानाच्छंकरपूजातो यो गर्वो नास्ति मत्तुल्यः कश्चिदिति स एव तमोऽनात्मनि आत्मग्रहरूपमज्ञानं तस्य क्षयात्, शाश्वतमविवर्तात्मकं, नित्यं लोकोत्तरं शिवं परश्रेयोरूपमव्ययमपरिणामि अतश्चोत्तमं सर्वोत्कृष्टम् ॥

इयांश्चास्य स्फारोऽयम्

निमेषोन्मेषमात्रेण
यदि चैवोपलभ्यते ॥८॥
ततः प्रभृति मुक्तोऽसौ
न पुनर्जन्म चाप्नुयात् ।

केनचिदिति मध्येऽध्याहार्यम् । उपलभ्यते समाविश्यते । ततःप्रभृति नतु कालान्तरे । मुक्तः स्थितैरपि देहप्राणैरगुणीकृतः । नच तद्देहत्यागे पुनर्जन्म देहान्तरसंबन्धमाप्नोति अपितु परमशिव एव भवति ॥

ततश्च योगी

अष्टाङ्गेन तु योगेन
प्राप्नयान्नान्यतः क्वचित् ॥९॥

तमष्टाङ्गयोगमन्यशास्त्रप्रतिपादितरूपवैलक्षण्येन क्रमेणादिशति देवः

संसाराद्विरतिर्नित्यं
यमः पर उदाहृतः ।
भावना तु परे तत्त्वे
नित्यं नियम उच्यते ॥१०॥

स्पष्टम् ॥१०॥

मध्यमं प्राणमाश्रित्य
प्राणापानपथान्तरम् ।
आलम्ब्य ज्ञानशक्तिं च
तत्स्थं चैवासनं लभेत् ॥११॥

प्राणापानमार्गयोः सव्यापसव्ययोरान्तरं मध्यनाड्यां भवं प्राणमित्यूर्ध्वगामिनमुदानमाश्रित्य, ततश्च प्राणीयव्याप्तिनिमज्जनेन चिद्व्याप्युन्मज्जनात् ज्ञानशक्तिमुन्मिषत्स्फुरत्तारूपां संविदमालम्ब्यावष्टभ्य, तत्स्थमेवासनं योगी लभते निजज्ञानशक्त्यासनासीनश्चिन्महेशरूपो भवतीत्यर्थः ॥ ११ ॥

प्राणादिस्थूलभावं तु
त्यक्त्वा सूक्ष्ममथान्तरम् ।
सूक्ष्मातीतं तु परमं
स्पन्दनं लभ्यते यतः ॥१२॥
प्राणायामः स उद्दिष्टो
यस्मान्न च्यवते पुनः ।

प्राणादौ प्राणापानसमानेषु यः स्थूलो रेचकपूरकादिर्भावः स्वभावस्तं त्यक्त्वा उज्झित्वा, अथेति एतत्स्थूलप्राणायामानन्तरभावि, सूक्ष्ममान्तरमिति मध्यपथेन रेचनाचमनादिरूपं च तं त्यक्त्वा, यतो यस्मात्सूक्ष्ममप्यतीतं परमिति प्राणाद्यचित्स्फुरत्तात्म स्पन्दनं लभ्यते

तस्मात्तदेव परं स्पन्दनं यत् स एव स्थूलसूक्ष्मभेदभाजां प्राणानामायामः प्रशमितप्राधान्यावभासात्मा नियम उत्कृष्टतयादिष्टो निरूपितः । यस्मादिति यं प्राणाय्ममासाद्य न पुनश्च्यवते चित्प्रमातृमयतां न कदाचिज्जहाति ॥

शब्दादिगुणवृत्तिर्या
चेतसा ह्यनुभूयते ॥१३॥
त्यक्त्वा तां प्रविशेद्धाम
परमं तत्स्वचेतसा ।
प्रत्याहार इति प्रोक्तो
भवपाशनिकृन्तकः ॥१४॥

शब्दस्पर्शादीनां गुणानां सत्त्वादिरूपाणां या काचिद्वृत्तिर्दशा चेतसा संविदा अनुभूयते तां त्यक्त्वानादरेणापहस्त्य, स्वचेतसा विकल्पसंवित्परामर्शेनैव परचिद्धामप्रवेशो हीति यस्माच्चितिभूमेः प्रसृतस्य चित्तस्य तत्प्रतीपप्रापणात्मा प्रत्याहारोऽतश्च भवपाशानां निकृन्तकः ॥

धीगुणान्समतिक्रम्य
निर्ध्येयं चाव्ययं विभुम् ।

ध्यात्वा ध्येयं स्वसंवेद्यं
ध्यानं तच्च विदुर्बुधाः ॥१५॥

धियो बुद्धेः सत्त्वादिगुणान् समतिक्रम्य समावेशेन प्रशमय्य, निर्ध्येयमिति ध्येयेभ्यो नियत्याकृत्यादिरूपेभ्यो निष्क्रान्तं, निष्क्रान्ताने च तानि यस्मात् तं, विभुं व्यापकमव्ययं नित्यं, स्वसंवेद्यं स्वप्रकाशं, ध्येयं ध्यानार्हमथ चाध्येयमध्येतव्यं, विश्रष्टव्यं स्मर्तव्यं च अर्थाच्चिदानन्दघनं परमेश्वरं ध्यात्वा विमृश्य ये बुधास्तत्त्वज्ञास्ते, तच्चेति तद्विमर्शात्मैव, ध्यानं विदुरविच्छिन्नेन पारम्पर्येण जानन्ति । च एवार्थे॥

धारणा परमात्मत्वं
धार्यते येन सर्वदा।
धारणा सा विनिर्दिष्टा
भवबन्धविनाशिनी ॥१६॥

येन योगिना सर्वदा परमात्मत्वं चैतन्यं धार्यते समावेशेनावलम्ब्यते, तस्य या धारणा चैतन्यविमर्शनात्मा वृत्तिः, सा भवबन्धविनाशहेतुर्धारणान्यधारणावैलक्षण्येन विनिर्दिष्टा ॥

एवं यमनियमासनप्राणायामप्रत्याहारध्यानधारणा .लोकोत्तरदृष्ट्या प्रतिपाद्य, समाधिमपि परस्वरूपविषयमाणवशाक्तशाम्भवोपायप्राप्यमनुपायं चादिशति श्लोकचतुष्केण

समं सर्वेषु भूतेषु
आधानं चित्तनिग्रहः ।
समाधानमिति प्रोक्त-
मन्यथा लोकदाम्भिकम् १७

सर्वप्राणिषु चित्तस्य समं वैषम्यप्रतिपत्तिनिग्रहात्म आधानं चित्तनिग्रहः समाधानमिति चोक्तम् । स्वात्मतुल्यताचिन्तनं यत्तत्समाधानं प्रोक्तम् । अन्यथा लोचननिमीलनादिप्रकारेणैतद्विपरीतं यत् समाधानं तत् लोकदम्भैकप्रयोजनम् ॥ १७ ॥

एतद्ध्यानोपायकमाणवं समाधानं, शुद्धविकल्पोपायं शाक्तम् । तदाह

स्वपरस्थेषु भूतेषु
जगत्यस्मिन्समानधीः ।

शिवोऽहमद्वितीयोऽहं
समाधिः स परः स्मृतः॥१८॥

सर्वमिदमहमेव—इत्यहन्तेदन्तासामानाधिकरण्यात्मशुद्धविद्योत्थाध्यवसायरूपः परः समाधिः स्मृतः पारम्पर्यतः प्रसिद्धः ॥ १८ ॥

अथैकवारोपायप्राप्यमपि पुनरुपायानपेक्षतयानुपायं सततोदितं समाधिमादिशति

सम्यक्स्वरूपं संवेद्यं
संविद्रूपं स्वभावजम् ।
स्वसंवेद्यस्वरूपं च
समाधानं परं विदुः ॥१९॥

सम्यगेकवारोपायतः संवेद्यं स्फुरितं यत्स्वाभाविकं संविद्रूपं स्वरूपं चकासच्चिद्धाम, तत् स्वसंवेद्यस्वरूपमिति स्वप्रकाशं परं नित्योदितत्वेनाव्युत्थानं समाधानम् ॥ १९ ॥

अविकल्पोपायं शाम्भवं समाधिमाह

राशिभ्यां चिज्जडाभ्यां च
विचार्यं निपुणं पदम् ।

यन्नित्यं शाश्वतं रूपं
समाधानं तु तद्विदुः ॥२०॥

जडराशिर्भुवनभावदेहादिः । चिद्राशिः सकलप्रलयाकलविज्ञानाकलमन्त्रमन्त्रेशमन्त्रमहेशशिवाख्यः प्रमातृवर्गः। ततो मध्यात् पदं विश्वप्रतिष्ठास्थानं निपुणं विचार्य बाढं विमृश्य यन्नित्यमविनाशि शाश्वतं विवर्तपरिणामशून्यं सदा स्वप्रकाशं च रूपमर्थात् स्फुरति, तत्समाधानं विदुस्तत्त्वज्ञाः ॥ २० ॥

'अष्टाङ्गेन तु योगेन' इत्युपक्रान्तमुपसंहरन् प्रकृते योजयति

एवमष्टाङ्गयोगेन
स्वभावस्थं परं ध्रुवम् ।
दृष्ट्वा वञ्च्यते काल-
ममृतेशं परं विभुम् ॥२१॥
मृत्युजित्स भवेद्देवि
न कालः कलयेच्च तम् ।

एवमित्युक्तरूपेण नत्वन्यशास्त्रोक्ताहिंसासत्याद्यात्मना, परममृतेशं चिन्नाथं, परं विभु-

मनाश्रितान्ताशेषकारणस्वामिनं, दृष्ट्वा कालं वञ्चयति अकालकलितत्रिदानन्दैकघन एव जायते । अत एव तत्त्वतोऽयमेव संकोचात्म-मृत्युविदलनात् मृत्युजित् । सुचिरमपि स्थिरी-कृतदेहस्तु न वस्तुतो मृत्युजिदित्याशयशेषः॥

किंच

तत्त्वषट्त्रिंशतस्त्यागा-
द्भुवनानन्त्यवर्जनात् ॥२२॥
एकाशीतिपदोर्ध्वं वै
वर्णपञ्चाशतः परम् ।
व्यापकं सर्वमन्त्रेषु
सर्वेष्वेव हि जीवनम् ॥२३॥
अष्टात्रिंशत्कलोर्ध्वं तु
सर्वान्तः सर्वमध्यगम् ।
आदिर्मध्यं न चैवान्तो
लभ्यते यस्य केनचित्॥२४॥
तदप्रमेयमतुलं
प्राप्य सर्वं न लभ्यते ।

पृथ्व्यादिशिवान्तानि तत्त्वानि, कालाग्न्याद्यनाश्रितान्तानि भुवनानि च त्यक्त्वा नवात्मादिप्रक्रियया प्रणवादिपदानामकारादिवर्णपञ्चाशत ईशानपुरुषाघोरादिकलाष्टात्रिंशतश्चोर्ध्वं सर्वमन्त्रव्यापकम्, एवं च षड्विधाध्वोत्तीर्णम्, अतश्च सर्वजीवितभूतं सर्वेषामन्तः पूर्वापरकोट्यात्म, तन्मयत्वादेव च विश्वस्य सर्वमध्यगतं, नचास्य केनाप्यादिमध्यान्ता लभ्यन्ते दिक्कालादिकथोत्तीर्णत्वात्, अतश्चाप्रमेयम्, अद्वितीयत्वादतुलं, प्राप्य षड्विधाध्वमयदेहप्राणाद्युल्लङ्घनेन योगिभिरासाद्य, सर्वमित्यध्वप्रपञ्चात्म निखिलं न लभ्यते न प्राप्यते तेन प्राग्वत् नाव्रियते, अथच काक्का सर्वं न लभ्यते अपितु लभ्यते सर्वसर्वात्मामृतेशभैरवता विद्यत इत्यर्थः ॥

तथा

येनैकेन जगत्सर्व-
मप्रमेयेन पूरितम् ॥ २५ ॥
तज्ज्ञात्वा मुच्यते क्षिप्रं
घोरात्संसारबन्धनात् ।

ज्ञात्वा दार्ढ्येन निश्चित्य ॥

अपिच

तत्त्वत्रयविनिर्मुक्तं
शाश्वतं चाचलं ध्रुवम् ॥२६॥
दिव्येन योगमार्गेण
दृष्ट्वा भूयो न जायते ।
सर्वेन्द्रियविनिर्मुक्त-
मवेद्यं चाप्यनामयम् ॥२७॥

तत्त्वत्रयं नरशक्तिशिवाख्यम् । शाश्वतं विवर्तवाद इव नासत्यविभक्तान्यरूपोपग्राहि, अचलमपरिणामि, ध्रुवं नित्यम्, इन्द्रियविनिर्मुक्तमनामयमिति मायेन्द्रियानावृतम्, अवेद्यं च, दिव्येन योगमार्गेण विकल्पहानोन्मिषदविकल्पविमर्शावष्टम्भोपायेन, दृष्ट्वा साक्षात्कृत्य न पुनर्जन्मेति ॥ २७ ॥

एवमाणवेन शाक्तेन शाम्भवेन चोपायेनासादितं परं तत्त्वं मुक्तिदं न केवलमिहैवोपादेयमुक्तं, यावत् सर्वशास्त्रेषु इत्याह

परमात्मस्वरूपं तु
सर्वोपाधिविवर्जितम् ।
चैतन्यमात्मनो रूपं
सर्वशास्त्रेषु कथ्यते ॥ २८ ॥

यत् सर्वैः समनान्तैरुपाधिभिरवच्छेदकैर्विशेषेण वर्जितं तत्संकोचासंकुचितं चैतन्यमात्मनो ग्राहकस्य रूपं, तदेव परमात्मनः परमशिवस्य स्वरूपं नतु व्यतिरिक्तं यथा भेदवादिनो मन्यन्ते । अत एव शिवोऽहमद्वितीयोऽहमिति तात्त्विकसमाधिनिर्णयावसरे उक्तम् । सर्वशास्त्रेषु चैतत्कथ्यते नतु क्वचिदेवेत्यनेन सिद्धान्तानामपि रहस्याद्वयसारता अन्तःसंभवन्त्यपि गाढप्ररूढसांसारिकद्वैतवासनानां न स्फुटीकृता । यथोक्तं श्रीकुलपञ्चाशिकायाम्

'यन्नास्ति सर्वलोकस्य तदस्तीति विरुध्यते ।
निगद्यते यदा देवि हृदये न प्ररोहति ॥
एतस्मात्कारणाद्देवि देवताभिः प्रगोपितम् ।
तेन सिद्धेन देवेशि किं न सिद्ध्यति भूतले ॥'

इति । तत एव समस्तशैवशास्त्रसारसंग्रहरूपेषु शिवसूत्रेषु 'चैतन्यमात्मा' इति प्रारम्भ एवोक्तम् ॥ २८ ॥

एवंभूतमपि चैतदात्मनो रूपं
निर्मलं न भवेद्देवि
यावच्छक्त्या न बोधितम् ।

'.....शैवी मुखमिहोच्यते ।' (२०)

इति श्रीविज्ञानभट्टारकादिष्टनीत्या परमेश्वरस्यैव शक्त्या शक्याभासात्मनोऽणोः स्वस्फुरत्ताप्रवेशनया अणुत्वं निमज्ज्य, परमशिवत्वमुन्मील्यते ॥

ननु दीक्षयाभिव्यक्तशिवत्वा अपि मक्तशिवा भिन्ना एव परमशिवात्, तत्कथं परमात्मस्वरूपैक्यमात्मचैतन्यस्योक्तमित्याशङ्कां शमयति

दीक्षाज्ञानादिना शोध्य-
मात्मानं चैव निर्मलम् ॥२९॥
ये वदन्ति नचैवान्यं
विन्दन्ति परमं शिवम् ।
त आत्मोपासकाः शैवे
न गच्छन्ति परं पदम् ॥३०॥

दीक्षाज्ञानयोगचर्याभिः शोध्यमात्मानं निर्मलमन्यमेव परमशिवात् व्यतिरिक्तमेव वदन्ति नतु परमशिवं विन्दन्ति परमशिवरूपं नासादयन्ति, ते आत्मोपासकाः शुद्धात्मतत्त्वाराधकाः शैवे यत् परं पदं परमशिवत्वं, तन्न गच्छन्ति नाप्नुवन्ति । यदि तु कदाचित् तीव्रशक्तिपातादुच्छन्ति, तच्छैवेन शिवादिष्टाद्वयज्ञानेनैव नत्वन्येन ज्ञानेनेति सप्तमीतृतीये तन्त्रेण योज्ये । तदुक्तं श्रीस्वच्छन्दे समनान्तस्थशुद्धात्मनिर्णयावसरे

'अविदित्वा परं तत्त्वं शिवत्वं कल्पितं तु यैः ।
त आत्मोपासका शैवे न गच्छन्ति परं शिवम्॥'(४।३९२)

इति ॥ ३० ॥

एतदेव भङ्ग्यन्तरेण स्फुटयति

यदा तु परमा शक्तिः
सर्वज्ञादिगुणान्विता ।
आपादादिविकासिन्या
न विकास्येत निर्मला ॥३१॥
तावन्न निर्मलो ह्यात्मा
बद्धः शैवे तदोच्यते ।

तावच्छब्दापेक्षया यावच्छब्दोऽध्याहार्यः । तेनापादादि पादाङ्गुष्ठात्प्रभृति विकासिन्या प्राणप्राधान्यनिमज्जनेन चित्प्राधान्यमुन्मज्जयन्त्या दीक्षाज्ञानादिरूपया अनुग्राहिकया शक्त्या यावत् सर्वज्ञत्वसर्वकर्तृत्वस्वतन्त्रताद्यात्मा परमा शक्तिर्न विकास्येत नोन्मिष्येत, न तावदात्मा जीवो निर्मलः । यदा चैवं, तदा शैवेऽसावात्मा जीवन्मुक्तेरनासादाद्बद्ध एवोच्यते ॥

विकसितायाः शक्तेः स्वरूपं दर्शयति

यत्रस्थः पुरुषः सर्वं
वेत्त्यतीतमनागतम् ॥ ३२ ॥
सन्नियम्येन्द्रियग्रामं
तत्तत्त्वं शक्तिलक्षणम् ।

इन्द्रियाण्यन्तर्मुखीकृत्य यत्र तुट्टिपातात्मनि आद्योन्मेषस्थितौ लब्धावस्थितिर्योगी अतीतानागतादि सर्वं वेत्ति, तत् प्रतिभात्म तत्त्वं शक्तिलक्षणम् ॥

तथा

यत्र यत्र भवेदिच्छा
ज्ञानं वापि प्रवर्तते ॥ ३३ ॥
क्रियाकृत्यस्वरूपा वा
तत्तत्त्वं शक्तिलक्षणम् ।

न कृत्यं निष्पाद्यं स्वरूपं यस्यास्तादृश्यकृत्रिमा निर्विकल्पा इच्छा ज्ञप्तिः स्फुरत्तात्मा क्रिया वा यत्र यत्रावसरे प्रवर्तते, तत्र तत्र तत् एषणीयाद्यनारूषितशुद्धेच्छादिमात्रात्म तत्त्वं शक्तिलक्षणम् ॥

तथा

व्यापकस्य यतो देवि
चिद्रूपस्यात्मनः शिवात् ॥३४॥
प्रसरत्यद्भुतानन्दा
सा शक्तिः परमा स्मृता ।

व्यापकचिन्मात्रमयतामात्मनो भावयतो योगिनो या आश्चर्यरूपा आनन्दात्मा शक्तिः शिवात्प्रसरत्युन्मिषति, सा परमा स्मृता तत्तत्त्वं शक्तिलक्षणमित्यर्थः ॥

एवं लक्षितशक्त्यवष्टम्भविस्फारेण

विप्रसार्य तमात्मानं
सर्वज्ञादिगुणैर्गुणी ॥ ३५ ॥
साभासः कथ्यते देवि
शिवः परमकारणम् ।

सर्वज्ञादिगुणैरिति तद्विमर्शनेनात्मानं विप्रसार्य

'बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः'

(यो० सू० ३।४३)

इति स्थित्या विकास्य यो योगी तैरेव सर्वज्ञत्वादिगुणैर्गुणी संपन्नः, स सर्वज्ञत्वाद्याभासविमर्शनादेव साभासः शिवः कथ्यते ॥

एतदेव स्फुटयति

सर्वज्ञः परितृप्तश्च
यस्य बोधो ह्यनादिमान् ॥ ३६
स्वतन्त्रो ह्यप्रलुप्तश्च
यश्च वानन्तशक्तिकः ।
शक्तिमान्गुणभेदेन
स्वगुणान्विन्दते गुणी ॥३७॥

पृथग्भेदविभेदेन
नानात्वं विमृशेदिह ।
स साभास इति प्रोक्तो
निराभासस्तु कथ्यते ॥ ३८ ॥

परितृप्तो नैराकांक्ष्येण चिदानन्दघनः, अनादिमान् नतु भावनोत्थः, स्वतन्त्रो नतु भेदेश्वरवत् कर्ममलपरिपाकाद्यपेक्षः, अप्रलुप्तो नतु ब्रह्मादिवत् स्वापाद्यावृतः, अनन्तशक्तिकः

'शक्तयोऽस्य जगत्कृत्स्नं.....।'

इति स्थित्या मरीचिरूपाशेषविश्वशरीरः, शक्तिमानिति समुत्पन्नयथालक्षितपरशक्तिस्वरूपः, गुणानां सत्त्वरजस्तमसां भेदेन चिद्भुविदेहादिप्रमातृतानिमज्जनोत्थेन विदारणेन, स्वगुणान् सर्वज्ञत्वाद्दीन् लभते । तैरेव च गुणैर्गुणी, भेदानां सर्वज्ञत्वादिविशेषाणां व्याख्यातदृशा व्यावृत्तिकृतो यः पृथग्विभेदस्तेन नानात्वं विचित्राभासरूपतां य आत्मनो विमृशेत्, स साभास इत्युक्तः। निराभासस्तु उच्यते॥

तमाह

नाहमस्मि न चान्योऽस्ति
निराभासस्तदा भवेत् ।
सावस्था परमा प्रोक्ता
शिवस्य परमात्मनः ॥ ३९ ॥

आभासेभ्यो ग्राह्यग्राहकविमर्शात्मकेभ्यो निष्क्रान्तः चिद्विमर्शैकपरमार्थः । तदुक्तं श्रीप्रत्यभिज्ञायाम्

'सर्वथा त्वन्तरालीनानन्ततत्त्वौघनिर्भरः ।
शिवश्चिदानन्दघनः परमाक्षरविग्रहः ॥' (४।१।१४)

इति ॥३९॥

एतद्दशासमापन्नस्य च योगिन ईदृशी स्फुरत्तेत्याह

नाहमस्मि न चान्योऽस्ति
ध्येयं चात्र न विद्यते ।
आनन्दपदसंलीनं
मनः समरसीगतम् ॥४०॥

अहमिति देहादिर्ग्राहकः । अन्यो मद्व्यतिरिक्तो नीलादिः । ध्येयमिति अनुग्राहकत्वेन बुद्ध्योपस्थापितम् ॥४०॥

एतत्पदलाभाय शाम्भवोपायमादिशति देवः

नोर्ध्वे ध्यानं प्रयुञ्जीत
नाधस्तान्नच मध्यतः।
नाग्रतः पृष्ठतः किंचि-
त्पार्श्वयोरुभयोरपि ॥ ४१ ॥

नान्तःशरीरसंस्थाने
न बाह्ये भावयेत्क्वचित् ।
नाकाशे बन्धयेल्लक्ष्यं
नाधो दृष्टिं निवेशयेत् ॥४२॥

न चाक्ष्णोर्मीलनं किञ्चि-
न्न किञ्चित् दृष्टिबन्धनम् ।
अवलम्बं निरालम्बं
सालम्बं नच भावयेत् ॥४३॥

नेन्द्रियाणि न भूतानि
शब्दस्पर्शरसादि यत् ।
सर्वं त्यक्त्वा समाधिस्थः
केवलं तन्मयो भवेत् ॥४४॥

ऊर्ध्वे द्वादशान्ते, अधः कन्दादौ, मध्ये हृदादौ, अग्रतः पृष्ठतः पार्श्वयोः तत्पुरुषसद्यो-जातादिरूपम् । अन्तःशरीर इति

'आमूलात्किरणाभासां सूक्ष्मात्सूक्ष्मतरात्मिकाम् ।
चिन्तयेत्तां द्विषड्वान्ते शाम्यन्तीं भैरवोदयः ॥ (वि.भै.२८)

इतिवत्, न बाह्य इति

'वस्त्वन्तरे वेद्यमाने सर्ववेद्येषु शून्यता ।
तामेव मनसा ध्यायन्विदितोऽपि प्रशाम्यति॥' (१२२)

इतिवत्, नाकाश इति

तेजसा सूर्यदीपादेराकाशे शबलीकृते ।
दृष्टिं निवेश्य तत्रैव स्वात्मरूपं प्रकाशते ॥ (७६)

इतिवत्, नाध इति

कूपादिके महागर्ते स्थित्वोपरि निरीक्षणात् ।
अविकल्पमतेः सम्यक्सद्यश्चित्तलयः स्फुटम् ॥ (११९)

इतिवत्, नचाक्ष्णोर्मीलनमिति

एवमेव निमील्यादौ नेत्रे कृष्णाभमग्रतः ।
प्रसार्य भैरवं रूपं भावयंस्तन्मयो भवेत् ॥ (८८)

इतिवत्, न दृष्टिबन्धनमिति

निर्वीक्षगिरिभित्त्यादिदेशे दृष्टिं विनिक्षिपेत् ।
निलीने मानसे भावे वृत्तिक्षीणः प्रजायते ॥ (९०)

इतिवत्, अवलम्ब्यते इति अवलम्बो ध्येय आकारस्तम्

भावे त्यक्ते निरुद्धा चिन्नैव भावान्तरं व्रजेत् ।
तदा तन्मध्यभावेन विकसत्यतिभावना ॥ (९२)

इतिवत्, निरालम्ब इति

उभयोर्भावयोर्ज्ञाने ज्ञात्वा मध्यं समाश्रयेत् ।
युगपच्च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते ॥ (९१)

इतिवत्, सहालम्बेन वर्तते सालम्बं साकारं ज्ञानम्

'इच्छायामथवा ज्ञाने जाते चित्तं निवेशयेत् ।
तत्र बुद्ध्यानन्यचेतास्ततः स्यादात्मदर्शनम् ॥ (९८)

इतिवत् । नेन्द्रियाणि न भूतानि इति तत्तद्धारणापटलोक्तनीत्या सर्वं त्यक्त्वा समाधिस्थ इति अकिंचिच्चिन्तकत्वेन स्वस्वरूपविमर्शनप्रवणस्तन्मय इत्यानन्दपदसंलीनसमरसज्ञानमयः॥४४

या चैवंभूता दशा

सावस्था परमा प्रोक्ता
परस्य परमात्मनः ।
निराभासं पदं तत्तु
तत्प्राप्य विनिवर्तते ॥४६॥

सांसारिकीं स्थितिमुज्झति ॥४५॥

अतश्च यः

भावयेदेवमात्मान-
मात्मनो भावनाबलात्।
स गच्छेत्परमं शान्तं
शिवमत्यन्तनिर्मलम् ॥४६॥

आत्मनो निर्विकल्पसंवेदनस्य या भावना विकल्पहानेन संपादना, तस्या यद्बलं विमर्शदार्ढ्यं तेन भावयेत् ॥४६॥

किंच

तत्तत्त्वमेकं सर्वत्र
भवति मृत्युजिच्छिवम् ।
तच्चामृतेशं परमं
तृतीयं पदमुत्तमम् ॥४७॥
आख्यातं तव देवेशि
किमन्यत्कथयामि ते ।

सर्वत्र क्षित्याद्यनाश्रितान्ते, तदेवैकमद्वितीयं, तत्त्वं पारमार्थिकं स्वरूपं, शिवं श्रेयोरूपं, मृत्युजिद्भवति । तृतीयमिति प्रोक्तस्थूलसूक्ष्मज्ञानद्वयापेक्षया, तवेत्यनुग्रहैकपरायाः, किमन्यत्कथ-

यामीति नातोऽन्यद्रहस्यं कथनीयं किंचिद-स्तीत्यर्थः ॥

एतदुपसंहरति

एवं मृत्युजिता सर्वे
ध्यात्वाऽव्यातं विमुच्यते॥४८॥

योगी ॥ ४८ ॥

एतच्च

सर्वकालं तु कालस्य
वञ्चनं कथितं प्रिये ।

अकालकलितचिद्धामसमावेशोपदेशात् ॥

प्रकृतमुपसंहृत्य पूर्वप्रस्तुतमुपसंहरति

एवं तु त्रिविधं देवि
मया ते प्रकटीकृतम् ॥४९॥

कालस्य वञ्चनं नाम

एष च

योगः परमदुर्लभः ।

किंच

अनेनाभ्यासयोगेन
मृत्युजिद्भवति नरः ॥५०॥

न केवलमात्मनः, यावत्

अनेनैव तु योगेन
लोकानुग्रहकाम्यया ।
भवते मृत्युजिद्योगी
सर्वप्राणिषु सर्वदा ॥५१॥

एतज्ज्ञाननिष्ठो विश्वानुग्रहकरणक्षम इत्यर्थः। यत्त्वत्राधिकारे परं ज्ञानमुक्तम्

एष मृत्युञ्जयः ख्यातः
शाश्वतः परमो ध्रुवः ।
अस्मात्परतरो नास्ति
सत्यमेतद्ब्रवाम्यहम् ॥५२॥

शिष्याणामत्रार्थे दृढ आश्वासो जायतामित्याशयेनादरादुक्तमर्थमत्युपादेयत्वात् पुनः पुनरादिशति

यत्परामृतरूपं तु
त्रिविधं चोदितं मया ।
तदभ्यासाद्भवेज्जन्तु-
रात्मनोऽथ परस्य वा ॥५३॥

अमृतेशस्समो देवि
मृत्युजिन्नात्र संशयः ।

किंचेमं मृत्युजिन्नाथं

येन येन प्रकारेण
यत्र यत्रैव संस्मरेत् ॥५४॥
तेन तेनैव भावेन
स योगी कालजिद्भवेत् ।

येन येनेत्याणवेन शाक्तेन शाम्भवेन वा । यत्र यत्रेति नात्र देशकालावस्थादिनियम इत्यर्थः ॥

अयं च योगी

यत्र यत्र स्थितो वापि
येन येन व्रतेन वा ॥५५॥
येन येन च योगेन
भावभेदेन सिद्ध्यति ।

येन येन योगेन तत्तत्संहितासु योगंपादोक्तेन, भावभेदेनेत्येतत्तत्त्वनिष्ठभावनाविशेषेण ॥

यच्चेदममृतेशनाथाख्यं परं तत्त्वं

तदेकं बहुधा देवि
ध्यातं वै सिद्धिदं भवेत् ॥५६॥
द्वैताद्वैतविमिश्रे वा
एकवीरेऽथ यामले ।
सवशास्त्रप्रकारेण
सर्वदा सिद्धिदं भवेत् ॥५७॥

एकमिति पराद्वयस्वतन्त्रचित्सतत्त्वम्, अत एव बहुधेत्येतत्स्वातन्त्र्यावभासितभाविपटलवक्ष्यमाणश्रीसदाशिवतुम्बुरुभैरवकुलेश्वरादिरूपतया ध्यातं सिद्धिं ददात्येवेत्यर्थः। परमाद्वैतरूपत्वाच्चास्य नाथस्य द्वैताद्वैतादिसर्वप्रकारक्रोडीकारित्वं न विरुध्यते। वक्ष्यति चैकविंशाधिकारे

'अद्वैतं कल्पनाहीनं चिद्घनं ....।' (२ ।२१)

इति ॥ ५७ ॥

किंच

चिन्तारत्नं यथा लोके
चिन्तितार्थफलप्रदम् ।
तथैव मन्त्रराजस्तु
चिन्तितार्थफलप्रदः ॥५८॥

अत्रत्य इत्यर्थः ॥५८॥

किंच

मन्त्राणा सप्तकोटीना-
मालयः परमो बली ।

तेषामपि पराद्वयैकवीर्यत्वात् ॥

अपिच

भावहीनास्तु ये मन्त्राः
शक्तिहीनास्तु कीलिताः ॥५९
वर्णमात्राविहीनास्तु
गुर्वागमविवर्जिताः ।
भ्रष्टाम्नायविहीना ये
आगमोज्झितविघ्रिताः ॥६०
न सिद्ध्यन्ति यदा देवि
जप्ता इष्टाः सहस्रशः ।
असिद्धा रिपवो ये च
सर्वांशकविवर्जिताः ॥६१॥
आद्यन्तसंपुटेनैव
साद्यर्णेन तु रोधिताः ।

मन्त्रेणानेन देवेशि
अमृतेशेन जीविताः ॥६२॥
सिद्ध्यन्ति ह्यप्रयत्नेन
जप्ता इष्टा न संशयः ।
ध्याताः सर्वप्रदा देवि
भवन्ति न वचोऽनृतम्॥६३॥

भावहीनाः अज्ञातवीर्याः, शक्तिहीनाः साञ्जनाः । यथोक्तम्

'साञ्जनास्तेऽण्डमध्यस्थाः सात्त्वराजसतामसाः ।'

इति । कीलिताः व्यत्यस्तवर्णपदाः, गुर्वाम्नायविवर्जिताः शिष्यैः स्वयमेव पुस्तकाद्गृहीताः, भ्रष्टाम्नाया अज्ञातसंहितोत्थानाः तत एव विनष्टाः, आगमोज्झितैर्विघ्निताः नित्यं क्षुद्रसिद्धिविनियोगेन विघ्नाभिभूताः कृताः । असिद्धा रिपवो ये इति नामाक्षरान्मन्त्राक्षरं मातृकाक्रमेणाङ्गुलिपर्वचतुष्टये पुनःपुनरावर्तनया गण्यमानं यदि प्रथमं पर्व स्पृशति, तदा सिद्धं भवति । यदि द्वितीयं पर्व स्पृशति, तदासिद्धं साध्यं तदुच्यते । यदि तृतीयं पर्व स्पृशति,

तदा सुसिद्धं भवति। अथ चतुर्थं पर्व स्पृशति, तदास्य विरुध्यते। सर्वे अंशका भावस्वभाव-पुष्पपाताद्याख्याः । एवमादि च श्रीस्वच्छन्दादेर्ज्ञेयम् । एवमीदृशा अपि मन्त्रा नेत्रनाथसंपुटीकारेण इष्टा ध्याता जप्ताश्च सर्वसिद्धिप्रदा भवन्ति। 'न संशयः' इति 'न वचोऽनृतम्' इति चोक्त्यानाश्वस्तानामपि आश्वासं रोहयति ॥६३॥

उपसंहरति

इति सर्वं समाख्यातं
रहस्यं परमं प्रिये ॥६३॥

प्रथमाधिकारे यत् परमं रहस्यं प्रश्नितं, तदिति उक्तदृशा सर्वं समाख्यातमिति शिवम् ॥

चिदानन्दघनं धाम शाङ्करं परमामृतम् ।
मृत्युजिज्जयति श्रीमत्स्वावेशेनोद्धरज्जगत् ॥

अष्टमाधिकारः समाप्तः ॥

अथ

श्रीनेत्रतन्त्रं

श्रीक्षेमराजकृतोद्योतोपेते

नवमोऽधिकारः ।

स्वच्छस्वच्छन्दचिन्नेत्रं चित्रानुग्रहहेतुतः ।
सदाशिवादिभी रूपैः प्रस्फुरज्जयति प्रभु ॥

अथाधिकारसंगतिं कुर्वती श्रीदेव्युवाच

श्रुतं देव मया सर्वं
माहात्म्यं मन्त्रनायके ।
अधुना श्रोतुमिच्छामि
यदुक्तं विभुना मम ॥१॥
सर्वागमविधानेन
भावभेदेन सिद्धिदम् ।
वामदक्षिणसिद्धान्त-
सौरवैष्णववैदिके ॥२॥

यथेष्टसिद्धिदं देवं
यथेष्टाचारयोगतः ।
तदाख्याहि सुरेशान
चिन्तारत्नफलोदयम् ॥३॥

सर्वमुक्तं माहात्म्यमित्यधिकाराष्टकोक्तम् । उक्तमित्यधिकाराष्टके 'येन येन हि योगेन भावभेदेन' इत्यादिना सिद्धिदमित्यन्तेन । वामेत्यादि भाव्यधिकारासूत्रणाय । यथेष्ट आचारस्तत्तत्स्रोतोदेवतानां सुप्रसिद्धो नतु संकीर्णः । यद्वक्ष्यति

'येषु येषु समाचारो मया शास्त्रेषु भाषितः ।
स्रोतःसु स तथा कार्यो विशेषाद्यागहोमयोः ॥'

इति । चिन्तारत्नादिव फलोदयो यतः ॥ ३ ॥

एतन्निश्चयाय श्रीभगवानुवाच

शृणु सुन्दरि तत्त्वेन
परमार्थं वदामि ते ।

प्रश्नितेऽर्थे इत्यर्थात् ॥

तत्र परमाद्वयचिन्मात्रपरमार्थस्यापि अस्य भगवतो यथा तत्तच्चित्रदेवतात्मतोपपन्ना, तथा क्रमेणादिशति

अमृतेशविधानेन
मृत्युजित्कथितं मया ॥४॥
यत्प्रथमाधिकारादौ
तदेवं परमं देव-
ममृतेशमनामयम् ।
स्वभावस्तत्समुद्दिष्टं
व्यापकं शाश्वतं ध्रुवम् ॥५॥
न तस्य रूपं वर्णो वा
परमार्थेन विद्यते ।
यस्मात्सर्वगतो देवः
सर्वागममयः शुभः ॥६॥
व्यापकः सर्वमन्त्राणां
सर्वसिद्धिप्रदायकः ।

तन्निर्णीतमहावीर्यममृतेशं देवं विशेषानुपादानात् विश्वस्य स्वभावो यत् सम्यगुद्दिष्टं, न तस्य भावि सदाशिवादिरूपं नाम वा पारमार्थिकमपितु

'आत्मानमत एवायं ज्ञेयीकुर्यात्'.....।

इति

'स्वातन्त्र्यामुक्तमात्मानं स्वातन्त्र्याद्द्वयात्मनः ।
प्रभुरीशादिसंकल्पैर्निर्माय व्यवहार्ययेत् ॥ (१।५।१६)

इति प्रत्यभिज्ञोद्दिष्टनीत्या पुंसामनुग्रहाय तथावभासितम् । युक्तं चैतद्यस्माद्देवः क्रीडादिमयः, सर्वं गच्छति सर्वरूपतया स्फुरति, तत एव तत्तदुपदेश्यापदेशिनानाशास्त्ररूपः सर्वशास्त्राणां वाक्यैकवाक्यरूपतया परामर्शात्मकभगवदेकरूपत्वात्, अतश्च शुभः पराद्वयश्रेयोमयः । केवलं यत्र परमेश्वरेण सा परा विमर्शमयता न प्रकाश्यते, ते सृष्ट्यादिपात्रवाक्यैकवाक्यतामचेतयमाना अवान्तरवाक्यार्थविश्रान्तास्तत्तन्मितव्याप्तिकशास्त्रविनेयाः । यतश्चोक्तयुक्त्या सर्वागममयो देवस्तत एव सर्वमन्त्रानपि अभेदेन व्याप्य स्थितोऽतश्च सर्वसिद्धिप्रदः ॥

एतत् दृष्टान्तेन घटयति

निर्मलं स्फटिकं यद्व-
त्तन्तौ प्रोतं शितादिके ॥७॥

प्रतिबिम्बेत सर्वत्र
येन येन हि रञ्जितम् ।
तत्तद्दर्शयतेऽन्येषां
न स्वभावेन रञ्जितम् ॥८॥
तथा तथैव देवेशः
सर्वागमनियोजितः ।
फलं ददाति सर्वेषां
साधकानां हि सर्वतः ॥९॥

प्रतिविम्बेतेति प्रतिविम्बं गृह्णीयात् । न स्वभावेनेति स्वच्छैकरूपत्वात्, सर्वागमेषु नियोजितः सर्वात्मत्वात्तत्तदागमोक्तदेवतारूपतया ध्यातः सर्वेभ्यः साधकेभ्यः फलं ददाति ॥

यत एवं

तस्मात्स्रोतःसु सर्वेषु
चिन्तामणिरिवोज्ज्वलः ।
भावभेदेन वै ध्यातः
सर्वागमफलप्रदः ॥१०॥

शिवः सदाशिवश्चैव
भैरवस्तुम्बुरुस्तथा ।
सोमसूर्यस्वरूपेण
वह्निरूपधरो विभुः ॥११॥

सर्वेषु स्रोतस्सु उज्ज्वलो भ्राजमानः शिवो भावभेदेनाशयविशेषौचित्येन सदाशिवादिरूपतया ध्यातः सिद्धान्तवामदक्षिणादिशास्त्रोक्तं फलं प्रददाति ॥ ११ ॥

युक्तं चैतदित्याह

यतो ज्ञानमयो देवो
ज्ञानं च बहुधा स्थितम् ।
नियन्त्रितानां बद्धानां
त्राणं तन्नेत्रमुच्यते ॥१२ ॥

देवः परमेश्वरो ज्ञानमयश्चिन्मात्रपरमार्थः । तच्च ज्ञानं बहुधेति स्वातन्त्र्यात्संकोचमाभास्य नानात्वमाश्रित्य स्थितम् । अतश्च संकोचाभासभाजो ये निगृहितस्वरूपतया नियन्त्रिता आभासिता देवेन तत एव बद्धास्तेषां नानादर्शनोपासाभिः स्वस्वरूपप्रथाहेतुतया यतो

देवस्त्राणं, तस्मान्निरुक्तदृशा नेत्रमुच्यते, नतु चक्षुर्गोलकतया ॥ १२ ॥

अयमेव च

मृत्योरुत्तारयेद्यस्मा-
न्मृत्युजित्तेन चोच्यते ।
अमृतत्वं ददात्येव-
ममृतेश इति स्मृतः ॥१३॥

मृत्योर्देहप्राणादिजवञ्जवीभावात् । अमृतत्वं रुद्रशक्तिसमावेशम् ॥ १३ ॥

एवं सर्वगतो देवो
बहुरूपो मणिर्यथा ।
सर्वैराराधितो देवि
स्वसिद्धिफलवाञ्छया ॥१४॥
सर्वेषां फलदो देवः
प्रार्थितार्थविधायकः ।

एवमित्युक्तनीत्या । स्वसिद्धिफलवाञ्छयेति तदिच्छावग्राहिततत्फलाभिनिवेशतया ॥

यत एवं

तस्माद्भावानुरूपेण
साधकः साधने स्थितः॥१५॥
येन येनैव भावेन
तस्य तत्फलदो भवेत् ।

भावानुरूपेणाशयानुगुणेन । भावेन भावना-प्रकारेण ॥

इत्थं चान्तर्बहिर्यागयोः
यः सदाशिवरूपेण
सदा ध्यायति साधकः॥१६॥
सदाशिवतनुस्तस्य
भवतीव सुरेश्वरि ।

सदाशिवतनुर्भवति सादाशिवीमिव मूर्तिमनुग्रहायाश्रयति ॥

उपपन्नं चैतदित्याह
सर्वास्ता....ह्येष
सर्वानुग्रहकारकः ॥१७॥

अतश्च श्रीमदघोरवक्त्रानुगुण्येनायं
सद्यो वामो ह्यघोरश्च
पुरुषेशानविग्रहः ।

ध्यातव्य इति शेषः ॥

अस्य च मन्त्रराजस्य पराद्वैतरूपतया विश्वात्मकत्वादनेनैवाङ्गासनादि न्यस्यमित्याह

अनेन हृदयादीनि
न्यस्तव्यानि वरानने ॥१८॥
अनेनैव तु मन्त्रेण
स्वासनं परिकल्पयेत् ।

अनया विशेषोक्त्या पूर्वोक्ताङ्गमन्त्राणामपवादो दर्शितः। एवकारोऽन्यूनातिरिक्तामाह। शोभनमभेदव्याप्त्यावस्थितं, स्वं चानन्तान्तमासनं स्वासनम् । यदुक्तं श्रीकालोत्तरे

'बीजाङ्कुरं पुरा शक्त्या पश्चादानन्तमासनम् ।
अनन्तं चान्तगं कुर्यात्क्रमेणैव षडानन ॥'

इत्यादि ॥

भगवतः सदाशिवाकारं ध्यानमाह

चन्द्रार्बुदप्रतीकाशं
हिमाद्रिनिचयोपमम् ॥१९॥
पञ्चवक्त्रं विशालाक्षं
दशबाहुं त्रिलोचनम् ।

नागयज्ञोपवीतं तु
व्याघ्रचर्माम्बरच्छदम् ॥२०॥
बद्धपद्मासनासीनं
सितपद्मोपरिस्थितम् ।
देवं ध्यायेत् ॥
किंचास्य
त्रिशूलमुत्पलं बाण-
मक्षसूत्रं समुद्गरम् ॥२१॥
दक्षिणेषु करेष्वेवं
वामेषु शृण्वतः परम् ।
स्फेटकादर्शचापं च
मातुलुङ्गं कमण्डलुम् ॥२२॥
स्फेटकमुद्यमनकम् ॥ २२ ॥
किंच
चन्द्रार्धमौलिनं देव-
मापीतं पूर्ववक्त्रतः ।
ध्यायेत् ॥
अस्य च

दक्षिणं कृष्णभीमोग्रं
दंष्ट्रालं विकृताननम् ॥२३॥
कपालमालाभरणं
जगत्संत्रासकारकम् ।
पश्चिमं हिमकुन्दाभं
वामं रक्तोत्पलप्रभम् ॥२४॥
ऊर्ध्ववक्त्रं महेशानि
स्फटिकाभं विचिन्तयेत् ।

स्पष्टम् ॥

एवं ध्यात्वा तु देवेशं
पूजयेद्विधिपूर्वकम् ॥२५॥

विधिः सिद्धान्तोक्तः प्रकारः ॥ २५ ॥

क्व पूजयेदित्याह

स्वमूर्तौ स्थण्डिले लिङ्गे
जले वा कमलोपरि ।

स्वमूर्तिर्मुख्येत्यादावुक्ता ॥

तत्र च

ईशानाद्यांश्च सद्योन्तान्
स्वदिक्षु प्रतिपूजयेत् ॥२६॥

मूलमन्त्रेणैव ईशानपूर्वादिदिक्षु ईशानादि-वक्त्राणि आवरणक्रमेण प्रपूजयेत् ॥ २६ ॥

तदग्रे

आग्नेय्यादौ हृदादीनि
न्यस्येत्पूजाविधानतः ।

पूजाविधिनिमित्तमग्नीशरक्षोवायुविदिक्षु हृच्छिरःशिखाकवचानि, पूर्वादिदिक्चतुष्टयेऽस्त्रं, देवाग्रे नेत्रमितीत्थमङ्गानि न्यस्येत् । तदुक्तं तत्रैव

'आग्नेय्यां हृदयं न्यस्येदैशान्यां तु शिरस्तथा ।
नैर्ऋत्यां तु शिखां न्यस्येद्वायव्यां कवचं तथा ॥
अस्त्रं दिक्ष्वथ विन्यस्येत्कर्णिकायां सदाशिवम् ।'

इति । नेत्रस्य ज्योतीरूपतया प्राधान्यात् कर्णिकाग्रे स्थानम् । यदुक्तं श्रीस्वच्छन्दे


'ज्योतीरूपप्रतीकाशं नेत्रं मध्ये तु संस्थितम् ।'
(२।१११)

इति ॥

यदा चैवं पूजयेत् कश्चित्

तदा सिद्ध्यत्यसंदेहं
सत्यमेतद्ब्रवीमि ते ॥ २७ ॥

आराधकवर्ग इति शिवम् ॥



परानुग्रहहेवाकाश्रितसादाशिवाकृति ।
मृत्युजिज्जयति श्रीमच्छाङ्करं नेत्रमद्वयम् ॥

नवमोऽधिकारः समाप्तः ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्योतोपेते

दशमोऽधिकारः ।

पाशराशिकवलीकृतिदक्षं
दक्षिणं वपुरघोरममोघम् ।
भैरवं श्रयदनुग्रहहेतोः
शाङ्करं जयति नेत्रमणुत्रम् ॥

पूर्वोद्दिष्टभैरवात्मतां भगवतो निर्णेतुं श्री-भगवानुवाच

अथेदानीं प्रवक्ष्यामि
भैरवागमभेदितम् ।
भिन्नाञ्जनचयप्रख्यं
कल्पान्तदहनात्मकम् ॥१॥
पञ्चवक्त्रं शवारूढं
दशबाहुं भयानकम् ।
क्षपामुखगणप्रख्यं
गर्जन्तं भीषणस्वनम् ॥२॥

दंष्ट्राकरालवदनं
भ्रुकुटीकुटिलेक्षणम् ।
सिंहासनपदारूढं
व्यालहारैर्विभूषित ॥३॥
कपालमालाभरणं
दारितास्यं महातनुम् ।
गजत्वक्प्रावृतपटं
शशाङ्ककृतशेखरम् ॥४॥
कपालखट्वाङ्गधरं
खड्गखेटकधारिणम्
पाशाङ्कुशधरं देवं
वरदाभयपाणिकम् ॥५॥
वज्रहस्तं महावीरं
परश्वायुधपाणिकम् ।
भैरवं पूजयित्वा तु
तस्योत्सङ्गगतां स्मरेत् ॥६॥
प्रलयाग्निसमाकारां
लाक्षासिन्दूरसप्रभाम् ।

ऊर्ध्वकेशीं महाकायां
विकरालां सुभीषणाम् ॥७॥
महोदरीं पञ्चवक्त्रां
नेत्रत्रयविभूषिताम् ।
नखरालां कोटराक्षीं
मुण्डमालाविभूषिताम् ॥८॥
भैरवोक्तभुजां देवीं
भैरवायुधधारिणीम् ।
इच्छाशक्तिरिति ख्यातां
स्वच्छन्दोत्सङ्गगामिनीम्॥९॥
अघोरेशीति विख्याता-
मेतद्रूपधरां स्मरेत् ।

भैरवागमेषु दक्षिणस्रोतःसमुत्थेषु स्वच्छन्दचण्डत्रिशिरोभैरवादिषु भेदितं भेदसंहारित्वेन दीप्तविशिष्टरूपतया प्रतिपादितं भगवतो मृत्युजितः स्वरूपं वक्ष्यामि । भिन्नेत्यादिना भेदसंहर्तृत्वेनातिकृष्णमहादीप्तरूपतोक्ता । शवोऽत्र सदाशिवः । यथोक्तं श्रीस्वच्छन्दे

'ब्रह्मविष्णुमहेशानं शवान्तं परिकल्पयेत् ।' (१।३९)
इति । गर्जन्तमिति नादामर्शपरम् । दारितं व्यात्तमाननं यस्य । गजत्वगेव प्रावृतः प्रावरणीकृतः पटो येन । कपालेत्यादि सव्यापसव्यक्रमेण दशभुजत्वनिर्णयाय। पूजयित्वेति अनेनैव मन्त्रेण हृदाद्यङ्गसहितमुक्तवक्ष्यमाणस्थित्या अमुष्यैव सर्वत्राधिकारात् । कोटराक्षीमित्यन्तर्लक्ष्यां बहिर्दृष्टिं च । इच्छाशक्तिरित्यनेनाकृतिमत्त्वेऽपि परव्याप्तिसारत्वमुक्तम्। न विद्यते घोरं भेदात्म भेदाभेदप्रधानं च रूपं यासां पराद्वयधामप्रथनात्मकानुग्रहकर्त्रीणां, ता अघोरा मरीचिरूपाः शक्तयस्तासामीशीं स्वामिनीं स्मरेत् पूजार्थं ध्यायेत् । यदत्र भैरवाकृतौ रहस्यमस्ति, तच्छ्रीस्वच्छन्दोद्द्योते वितत्य मया दर्शितम् । तद्वदाकृत्यन्तरेष्वपि ज्ञेयम् । शिष्टं स्पष्टम् ॥

एतच्च परचिदात्मकस्वच्छन्दभैरवतदिच्छाशक्त्यात्मभैरवीयामलस्वरूपं मया

सर्वतन्त्रेषु च प्रोक्तं
प्रच्छन्नं न स्फुटीकृतम् ॥१०॥

सिद्धान्तेष्वपि निष्कलस्वतन्त्रपारमेशव्याप्तेर्भावात् ॥ १० ॥

केवलं गूढत्वात् तत्र·

ममाशयो न केनापि
लक्षितो भुवि दुर्लभः ।

स्थूलदृशो हि न रहस्यमाम्रष्टुं क्षमाः । तथाच श्रीकालोत्तरेऽपि

'नादाख्यं यत्परं बीजं ।'

इत्यादि

'पञ्चैतानि तु तत्त्वानि यैर्व्याप्तमखिलं जगत् ।'

इति

'एवं ज्ञात्वा महासेन श्वपचानपि दीक्षयेत् ।

इत्याद्यतिरहस्यमन्यथा व्याकुप्येत ॥

एतत्प्रासङ्गिकमुक्त्वा प्रकृतमाह

व्याधिनिग्रहणाद्येषु
पापेषु क्षयहेतवे ॥ ११ ॥
गोब्राह्मणेषु रक्षार्थं
शान्तौ पुष्टौ सदा यजेत् ।

व्याधिकृतं निग्रहणमाक्रमणम् । आदिशब्दादाध्यादयः । तेषु पापेषु शान्तये रक्षाशा-

न्तिपुष्ट्यर्थं चैतद्भैरवयामलं यजेत । गोब्राह्मणे-ष्वित्येतदन्ताः सप्तम्यः षष्ठ्यर्थे ॥

अथवा हिमकुन्देन्दु-
मुक्ताफलसमद्युतिम् ॥१२॥
चन्द्रकोटिसमप्रख्यं
स्फटिकाचलसंनिभम् ।

भैरवयामलं ध्यायेत् ॥

कल्पान्तदहनप्रख्यं
जपाकिंशुकसंनिभम् ॥१३॥
सूर्यकोटिसमाकारं
रक्तं वा तमनुस्मरेत् ।
अथवा पद्मरागाभं
हरितालसमद्युतिम् ॥१४॥

एकः कथं नानेत्याशङ्क्याह

इच्छारूपधरं देव-
मिच्छासिद्धिफलप्रदम् ।

चिद्भैरव एव तत्तत्सिद्ध्यभिलाषुकतत्तत्साधकाशयेनेच्छया तत्तद्रूपं गृह्णातीत्यर्थः ॥

अतश्च

यादृशेनैव वपुषा
साधकस्तमनुस्मरेत् ॥१५॥
तादृशं भजते रूपं
तादृक्सिद्धिप्रदं शुभम् ।

'चन्द्रकोटि' इत्यादिरूपं देवं न प्राग्वत् शवारूढम्, अपितु

पद्ममध्यस्थितं ध्यायेत्
पूजयेद्विधिना ततः ॥१६॥
यथानुरूपनैवेद्य-
पुष्पधूपासवैर्विभुम् ।

विधिर्निरोधार्घदानादिः । यदुक्तं श्रीस्वच्छन्दे

'पश्चादर्घः प्रदातव्यः सुरया सुसुगन्धया ।' (२।१३६)

इत्यादि । यथानुरूपं ध्यानानुसारि ॥ १६ ॥

प्रोक्तभैरवयामलस्य संमुखं प्राग्दक्षिणपश्चिमवामदिक्षु सिद्धारक्ताशुष्कोत्पलहस्ताख्या देवीः क्रमेणादिशति

गोक्षीरसदृशीं देवीं
हारहाससमप्रभाम् ॥१७॥

सुशुद्धस्फटिकप्रख्यां
कुन्देन्दुशशिनिर्मलाम् ।
चतुर्भुजा त्रिनेत्रां च
वक्त्रैकेन विभूषिताम् ॥१८॥
सिताम्बरधरां देवीं
सितहारविभूषिताम् ।
सारङ्गासनसंस्थां तु
वज्रहस्तां महाबलाम् ॥१९॥
पाशाङ्कुशधरां देवीं
घण्टाध्वनिनिनादिनीम् ।
पूर्वस्यां दिशि तिष्ठन्तीं
देवदेवस्य संमुखीम् ॥२०॥
यस्तु ध्यायति युक्तात्मा
क्षिप्रं सिद्ध्यत्यसौ नरः ।

इन्दुः कर्पूरम् । सारङ्गो हरिणः । देवाभिमुख्येन दिक्पूर्वा ॥

सिद्धामुक्त्वा, रक्तामाह

सूर्यकोटिसमप्रख्यां
ज्वलिताग्निसमप्रभाम् ॥२१॥
सिन्दूरराशिसंदृशीं
विद्युद्रूपां भयङ्कराम् ।
त्रिनेत्रां भीमवदनां
स्थूलकायां महोदरीम् ॥२२॥
लम्बोदरीं लम्बकुचां
प्रेतारूढां महाबलाम् ।
कपालमालाभरणां
व्याघ्रचर्मकटिस्थलाम् ॥२३॥
गजचर्मोत्तरीयां च
मुण्डमालाविभूषिताम् ।
महोल्कामिव राजन्तीं
भासयन्तीं दिगम्बराम्॥२४॥
चतुर्भुजामेकवक्त्रां
खड्गखेटकधारिणीम् ।
कपालखट्वाङ्गधरां
दक्षदिक्संस्थितां स्मरेत्॥२५॥

दिगम्बरामिति गजचर्मोत्तरीयामित्येतदपेक्षोऽयमर्थाद्विकल्पः ॥ २५ ॥

शुष्कामाह

कृष्णारुणां महादीप्तां
निर्मांसां विकृताननाम् ।
सुशुष्कां कोटराक्षीं च
एकवक्त्रां चतुर्भुजाम् ॥२६॥
त्रिनेत्रां भीमवदनां
व्यालहारविभूषिताम् ।
ऊर्ध्वकेशीं महाकायां
मुण्डमालाविभूषिताम् ॥२७॥
स्नायुरज्जुनिबद्धाङ्गीं
नरचर्मकटिच्छदाम् ।
व्याघ्रचर्माम्बरधरां
खड्गखेटकधारिणीम् ॥२८॥
अन्त्रासृङ्मांससंपूर्ण-
पिटकं बिभ्रतीं करे ।
त्रोटयन्तीं महान्त्राणि
पश्चिमायां दिशि स्मरेत्॥२९॥

कुम्भीरासनसंस्था तु
देवदेवस्य संमुखाम् ।

सुशुष्कत्वादेव स्नायुरज्जुषु निबद्धानि अङ्गानि यस्याः, पिटक पात्रावशेषः ॥

आसनेऽस्याः यः कुम्भीर उक्तः स चैवमधुनोच्यते

उष्ट्रग्रीवो गजस्कन्धा
ह्यश्वकर्णो हुडाननः ॥३०॥
व्याडजङ्घोपमाकारो
वज्रायुधनखोपमः ।
कूर्मपृष्ठो मीनपुच्छः
कुम्भीरः परिकीर्तितः ॥३१॥

हुडस्य मेषस्येव आननं यस्य । वज्राख्येनायुधेन नखोपमा यस्य ॥ ३१ ॥

उत्पलहस्तामाह

नीलोत्पलदलश्यामा
शारदाम्बरसंनिभा ।
त्रिनेत्रा चैकवक्त्रा च
नीलाम्बरविभूषिता ॥३२॥

सिंहपृष्ठसमारूढा
शरचापकरोद्यता ।
शक्तिहस्ता महादेवी
ध्याता चेष्टफलप्रदा ॥३३॥
सिद्धा रक्ता तथा शुष्का
तथाचोत्पलहस्तिका ।
चतुर्दिक्षु स्थिता देव्यो
भैरवस्य गणाम्बिके ॥३४॥

किंच

विदिक्षु दूत्यो विन्यस्या
वह्न्यादीशादिगन्ततः ।
काली चैव कराली च
महाकाली तथैव च ॥३५॥
भद्रकालीति विख्याता
देवीरूपेण संस्थिताः ।

एताश्च क्रमेण

किंत्वेता द्विभुजा देव्यः
पद्मासनमवस्थिताः ॥ ३६ ॥

कर्तिकामुण्डधारिण्यः
सर्वा एव । कर्तिका वीरकर्तिका ॥
किंच

किंकरा द्वारदेशतः ।

क्रमेण चतुर्षु द्वारेषु

क्रोधनो वृन्तकश्चैव
कर्षणोऽथ गजाननः ॥३७॥
द्विभुजा विकृतास्याश्च
खड्गखेटकपाणयः ।

एतच्च देव्यष्टकस्य किंकराणां च मुख्यभैरवयामलपरिवारत्वे रूपमुक्तम् ॥

काम्यविषये त्वाह

शान्त्यर्थं तु सिताः सर्वे
सर्वे च सर्वाश्च इत्येकशेषः ॥
रूपं वा कर्मभेदतः ॥३८॥

एषां ध्यायेत् । 'वश्ये रक्तं स्तम्भे पीतम्' इत्यादिकं, किङ्करान्तश्च परिवारो मूलमन्त्रेण पूज्य इति भाविरक्षाविधेर्ज्ञातम् ॥ ३८ ॥

तदाह

अथेदानीं प्रवक्ष्यामि
राजरक्षां विधानतः ।
मन्त्रसंपुटयोगेन
मध्ये नाम समालिखेत् ॥३९॥
तदूर्ध्वे भैरवं देव-
ममृतेशं यजेत्प्रिये ।
देव्यो दलेषु तेनैव
तथैवाद्यन्तयोजिताः ॥४०॥
दूत्यस्तथा नियोज्यन्ते
मूलमन्त्रेण किंकराः ।
पद्मबाह्ये सुशुक्लं तु
लिखेत्तच्छशिमण्डलम् ॥४१॥
चतुष्काण तु तद्बाह्ये
वज्रलाञ्छनलाञ्छितम् ।
रोचनाकुङ्कुमेनैव
क्षीरेण सितया तथा ॥४२॥
लिखित्वा पूजयेच्छान्तौ
सर्वश्वेतोपचारतः ।

यथानुरूपनैवेद्यै-
र्घस्मरैर्बलिनासवैः ॥४३॥

गोरोचनाकुङ्कुमक्षीरसितशर्करोल्लिखितपद्म-कर्णिकामध्ये साध्यनाम प्राग्वत् नेत्रमन्त्रसंपुटितं चन्द्रमण्डलगतं लिखित्वा, तत्पृष्ठे मूलेनैवामृतेशभैरवं प्रकरणात् सदेवीकं पूजयेत् । प्रागुक्तदिक्क्रमेण देवीर्दूतीश्च दलेषु मन्त्रसंपुटिता नामतो लिखित्वार्चयेत् । चतुर्षु दिग्दलाग्रेषु तथैव मन्त्रसंपुटितान् किंकरान् लिखित्वा बहिर्वज्रलाञ्छितं चतुरश्रं कृत्वा क्रमेण मन्त्रचक्रमेतत् राजरक्षार्थं सर्वश्वेतोपचारैर्महासंभारैरर्चयेत् । नैवेद्यैर्यो बलिस्तेन सहितैरासवैरिति संबन्धः ॥ ४३ ॥

एवमर्चां कृत्वा

सितचन्दनसंमिश्रा-
न्कर्पूरक्षोदधूसरान् ।
साक्षतांस्तण्डुलतिला-
न्सितशर्करया सह ॥ ४४ ॥
घृतक्षीरसमायुक्तान्
होमयेद्यस्तु यत्नधीः ।

यत्ने पराप्यायनादौ धीर्ध्यानसंविद्यस्य ॥
यदर्थं होमं कुर्यात्तस्य

महाशान्तिर्भवेत्क्षिप्रं
गृहीतो यदि मृत्युना ॥४५॥

मृत्युनापि यद्याक्रान्तः साध्यस्तस्य रक्षा-चक्रार्चाहोमतः शान्तिर्भवत्येवेति शिवम् ॥



व्याधीनामगदं दिव्यमाधीनां मूलकर्तनम् ।
उपद्रवाणां दलनं श्रये चिन्नेत्रभैरवम् ॥

दशमोऽधिकारः समाप्तः ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्योतोपेते

एकादशोऽधिकारः ।

सर्वसौभाग्यसंभोगवमनं वामदर्शनम् ।
दर्शयत्परमानन्दि नौमि नेत्रं त्रिशूलिनः ॥

दक्षिणस्रोतोऽनुष्ठानात्मतां मृत्युजिन्नाथस्य प्रदर्श्य, वामदर्शनात्मतादर्शनाय श्रीभगवानुवाच

अथेदानीं प्रवक्ष्यामि
तन्त्रमुत्तरमुत्तमम् ।
मन्त्रेणानेन यष्टव्य
सर्वसिद्धिफलोदयम् ॥१॥

'उत्तमत्वमस्य पराद्वयसारैतन्मन्त्रव्याप्तियुक्तयैव।

तत्र

सर्वोपद्रवशान्त्यर्थ-
मष्टपत्रे कुशेशये ।

पूर्वोक्तमण्डले देवि
मध्ये देवं च तुम्बुरुम् ॥२॥
दशबाहुं सुरेशानं
पञ्चवक्त्रं त्रिलोचनम् ।
मूलमन्त्रन्यस्तासनोपरि मूलेनैव विन्यस्य
सादाशिवेन वपुषा
वक्त्राण्यस्य प्रकल्पयेत् ॥३॥
मूलेनैव ॥ ३ ॥
तं चार्धचन्द्रशिरसं
राजीवासनसंस्थितम् ।
हिमकुन्देन्दुधवलं
तुहिनाचलसंनिभम् ॥४॥
नागयज्ञोपवीतं च
सर्पभूषणभूषितम् ।
सर्वाभरणसंयुक्तं
व्याघ्रचर्मकटिस्थलम् ॥५॥
गजचर्मपरीधानं
वृषारूढं महाबलम् ।

खड्गचर्मधरं देवं
टङ्ककन्दलभूषितम् ॥६॥
पाशाङ्कुशधरं देवं
चक्रहस्ताक्षसूत्रिणम् ।
वरदाभयहस्तं च
सर्वकिल्विषनाशनम् ॥७॥

ध्यायेत् । राजीवासनं शुद्धविद्यापद्मव्याप्त्या, तदुपरि वृषभो नादशक्तिव्याप्त्या, तदुपरि चिन्मूर्तिर्देवः । टङ्कः आयुधविशेषः । कन्दलं कपालम् ॥ ७ ॥

अस्य च

सर्वदिक्षु स्थिता देव्यः
पूर्वादौ दूत्य एव च ।
आग्नेय्यादिविदिक्ष्वेवं
किङ्करा द्वारदेशतः ॥८॥

दूतीः किङ्करांश्च नामत उद्दिशति

जम्भनी मोहनी चैव
सुभगा दुर्भगा तथा ।

दूतयस्तु समाख्याताः
किङ्करान् शृण्वतः परम् ॥९॥
क्रोधनो वृन्तकश्चैव
गजकर्णो महाबलः ।

तुम्बुरुनाथस्य

सव्यापसव्ये गायत्रीं
सावित्रीं विनिवेशयेत् ॥१०॥
अध ऊर्ध्वेऽङ्कुशं मायां
विन्यस्येत्तदनन्तरम् ।

तदनन्तरमिति किङ्करास्तु समस्तमन्त्रचक्रस्य बहिः ॥

इत्थं क्रमेण

सर्वाण्येतानि योज्यानि
मूलमन्त्रेण सर्वदा ॥११॥

एषां ध्यानमाह

सितरक्तपीतकृष्णा
देव्यो वै चतुराननाः ।

आसां मध्यात्

चतुर्भुजा त्रिनेत्रा च
टङ्ककन्दलधारिणी ॥१२॥
दण्डाक्षसूत्रहस्ता च
प्रेतोपरि विराजते ।
जया देवी तु विजया
रक्तवर्णा चतुर्भुजा ॥१३॥
चतुर्वक्त्रा त्रिनेत्रा च
शरकार्मुकधारिणी ।
खड्गचर्मधरा देवी
ह्युलूकोपरि संस्थिता ॥१४॥
अजिता पद्मगर्भा च
चतुर्वक्त्रा चतुर्भुजा ।
शक्तिघण्टाधरा देवी
चर्मपट्टिसधारिणी ॥१५॥
अश्वारूढा महादेवी
सर्वाभरणभूषिता ।
अजिता जयन्ती ॥

भिन्नेन्द्रनीलसदृशी
चतुर्वक्त्रविभूषिता ॥१६॥
चतुर्भुजा त्रिनेत्रा च
पाशाङ्कुशधरा तथा ।
रत्नपात्रगदाहस्ता
दिव्यासनसुसंस्थिता ॥१७॥
सौवर्णाम्बरसंवीता
स्वर्णभूषणभूषिता ।

अपराजितेत्यर्थात् ॥

एताश्च

स्वदिक्षु संस्थिता इष्टा
ध्याताः सिद्धिफलप्रदाः॥१८॥

विदिक्षु तु

दूत्यस्तद्रूपधारिण्यः
किंतु वक्त्रैकभूषिताः ।
द्विभुजाश्च त्रिनेत्राश्च
मुण्डकर्तरिभूषिताः ॥१९॥

क्रमेणैव

मत्स्यः कूर्मस्तु मकरो
भेकस्तासां तथासनम् ।

किंच

किंकराः खड्गहस्ताश्च
द्विभुजाश्चर्मधारिणः ॥२०॥
एकवक्त्रास्त्रिनेत्राश्च
भ्रुकुटीकुटिलेक्षणाः ।
सितादिवर्णभेदेन
ध्याताः सिद्धिफलप्रदाः॥२१॥

सितादीत्यादिशब्दात् रक्तपीतकृष्णाः ॥

गायत्री रक्तवर्णाभा
वक्त्रैकेन विभूषिता ।
बद्धपद्मासनासीना
ध्यानोन्मीलितलोचना ॥२२॥
सावित्री सितवर्णेन
ध्यानान्तर्गतलोचना ।
तथैवावयवा देवी

तथैवावयवेति एकवक्त्रा देवी चतुर्भुजा च

किंतु पाशाङ्कुशपुस्तकाक्षसूत्रकरा इयम् । देवीति गायत्री सावित्री च ॥

किंच

माया कृष्णा चतुर्भुजा॥२३॥
महापटावगूहिन्या-
संपुटाकारयुग्मतः ।

महेति विततेनाख्यातिव्याप्तिना पटेन पार्श्वगपाशाङ्कुशवत् करयुग्मधृतेन शिरःस्थेन निगूहति आच्छादयति विश्वमवश्यं, तथा आ ईषत् संपुटाकारेण युग्मेनान्तःकृतविश्वाच्छादनव्याप्तिना करद्वयेनोपलक्षिता ॥ २३ ॥

किंच

अङ्कुशो भैरवाकारः
पाशाङ्कुशधरो विभुः ॥२४॥
कपालखट्वाङ्गधरो
वसासृङ्मांसलम्पटः ।

भैरवाकार इति भ्रुकुटीकरालदंष्ट्रालवक्त्रः । अत एव श्रीनन्दिशिखायाम्

'एकवक्त्रो महाभीमः..... ।'

इत्युक्तम् । तथा

'..... स्निग्धविद्रुमसंनिभः ।
पाशाङ्कुशाकारशिराः साध्यस्यांकर्षणः परः ॥'

इति तत्रैवाभिधानादेवंरूपः चिन्त्यः ॥ २४ ॥

उक्तवक्ष्यमाणस्य मन्त्रचक्रस्यासनन्यासार्थमाह

नावं क्षीरार्णवं चोर्वीं
शक्तिमाधारिकां शुभाम् ॥२५
आसनार्थं प्रयुञ्जीत
शान्त्यर्थं सितनीरजम् ।

व्योमव्याप्त्या आधारशक्तिः, तदुपरि उर्वी पृथ्वी, तदूर्ध्वं तत्त्वव्याप्त्या क्षीरार्णवः, तदूर्ध्वं प्लवनचलनधर्मतया तेजोवायुद्वयव्याप्त्या नौः । एतावती च शुद्धविद्यातत्त्वव्याप्तिकसिताब्जस्य कन्दभूः । यथोक्तं श्रीपूर्वे

'आदावाधारशक्तिं तु नाभ्यधश्चतुरङ्गुलाम् ।
धरां सुरोदं पोतं च कन्दश्चेति चतुष्टयम् ॥'
(मा० वि० त० ८।९९)

इति ॥ २५ ॥

एवमासनमन्त्रचक्रस्य ध्यानमुक्त्वा अत्रैव विशेषमाह

सर्व एव तु देवेशि.
सुशुक्लाः शान्तिकारकाः २६॥
रक्ताः पीतास्तथा कृष्णा
ध्यातव्याः कर्मभेदतः ।

वश्यादिवैचित्र्येण ॥ २६ ॥

प्रागधिकारान्त इवेहापि रक्षाविधिमाह

अथान्यं संप्रवक्ष्यामि
चक्रराजं महाबलम् ॥२७॥

महाबलं शान्त्यादावप्रतिहतम् ॥ २७ ॥

तत्र

आद्यन्तसंपुटेनैव
मध्ये नाम समालिखेत् ।
देवं देवीश्च दूतीश्च
पूर्ववद्विधिना न्यसेत् ॥२८॥
मध्ये दलेषु विदले-
ष्वन्यतः सर्वतः सुधीः ।

पूर्वोक्तगोरोचनादिद्रव्योल्लिखिताब्जकर्णिकायां चन्द्रमण्डलमध्ये मन्त्रसंपुटितं साध्यनाम लिखित्वा, उपरि सावित्रीगायत्रीसहितं देवं

ध्यात्वा सितोपचारेण पूजयेत् । पूर्वादिदिक्पत्रेषु जयादिदेवीचतुष्टयमाग्नेय्यादिविदिग्दलेषु जम्भन्यादिदूतीः मन्त्रसंपुटिता नामतो लिखित्वा पद्मस्य बहिर्दिक्चतुष्टये किंकरांस्तद्बहिर्मायाङ्कुशौ, तद्बहिर्वज्रलाञ्छितचतुरश्रसंनिवेशं लिखित्वा सर्वमन्त्रचक्रं सितोपचारेणार्चयेदिति पिण्डार्थः । दूतीश्चेति चकारात् किंकरान् मायाङ्कुशद्वयं च। अन्यत इति पद्मक्षेत्राद् बहिर्दिक्षु किंकरादिन्यासः । सर्वत इत्यनेन मायाङ्कुशयोर्बहिश्चतुष्कोणं पुरं सूचितम् ॥

एतच्च रक्षाचक्रं

यथानुरूपैर्नैवेद्यै-
भूरिशान्त्यर्थमात्मनः ॥ २९ ॥

अन्यस्य वा प्रयोक्तव्यं

लिखित्वाभ्यर्च्य बन्धनीयम् ॥

किंच

यष्टव्यं शान्तिकर्मणि ।

बहिर्मण्डलकं कृत्वा ॥

अर्चौचित्येन होममाह

तिलतण्डुलमध्वाज्य-
क्षीरशर्करया सह ॥३०॥
होमयेत्पूर्ववत्कुण्डे
प्रशस्तेन्धनदीपिते ।

मन्त्रचक्रतृप्त्यर्थमित्यर्थात् । पूर्ववदिति वर्तुल इत्यर्थः ॥ ३० ॥

एवं कृते रक्ष्यस्य
महाशान्तिः प्रजायेत
सत्यं मे नानृतं वचः ॥३१॥

एताश्च
सर्वरक्षाविधानेषु
याज्या देव्यः सुसिद्धिदाः।

प्रोक्तपद्मक्रमेण ॥ ३१ ॥

बहिर्यागे क्रमान्तरेणापीत्याह
पङ्क्तिष्ठा वा यजेद्देवी-
र्मध्ये देवं च तुम्बुरुम् ॥३२॥
सर्वाः श्रियः समाप्नोति
साधकः संयतेन्द्रियः ।

एकाग्रचित्त एव ॥

अन्यस्य वा प्रयुञ्जानो
जयत्यत्र न संशयः ॥३३॥

अत्र जगति । जयति ईहितात्म्या सर्वोत्कर्षेण वर्तते इति शिवम् ॥ ३३ ॥

सर्वाः सिद्धीर्वमद्वामस्रोतश्चक्रार्चनक्रमात् ।
मृत्युजिज्जयति श्रीमन्नेत्रं शाक्तामृतोल्बणम् ॥

इति श्रीनेत्रोद्योते एकादशोऽधिकारः

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते

द्वादशोऽधिकारः

यत्कामान्तकमप्यनन्तजनताकामैकसंपूरणं
यद्विश्वान्तकमन्तकान्तकमलं यच्चाकुलं सत्कुलम् ।
सर्वोल्लासि समग्रभेददलनाद्वाणं त्रिलोक्याः परं
शार्वं तन्नयनं स्वधामनयनं धामत्रयात्म स्तुमः ॥

ऊर्ध्वदक्षिणवामस्रोतोरूपतामुन्मील्य, तदविभेदसारकुलाम्नायमयतामपि मृत्युजिन्नाथस्य दर्शयितुं श्रीभगवानुवाच

अथातः संप्रवक्ष्यामि
कुलाम्नायनिदर्शनम् ।
यागं होमं जपं कार्यं
येन सर्वमवाप्नुयात् ॥१॥

कुलाम्नाये निदर्शनं प्रकाशो यस्य तादृशं कार्यं कर्तव्यं यागहोमादि सम्यक् संप्रवक्ष्यामि, येन साधकः सर्वं भोगं मोक्षं प्राप्नोति । तत्रादौ ऐशान्यादिवायव्यदिगन्तं गणेश-

वटुकगुर्वादीन्,प्राग्दक्षिणपश्चिमासु श्रीखगेन्द्र-कूर्ममेषनाथान् सदूतीसंतानान्, उदीच्यां श्रीमच्छन्दकुङ्कुणाम्बादिसाधिकारराजपुत्रषट्कं सदूतीकमिति इहत्यमन्त्रपूर्वं पादान्तमर्चये-दि. कुलाम्नायदर्शनशब्दार्थः ॥ १ ॥

अथैतद्युगगुरुपङ्क्त्यन्तः

पद्ममध्ये तु संपूज्यो
भैरवः पूर्वचोदितः ।
पूर्वादिदिग्दलावस्था
ह्यष्टौ देव्यः स्वभावतः ॥२॥
ब्रह्मादिदेवतानां च
स्वरूपायुधवाहनाः ।

ब्रह्मादीनां स्वभावत इति तदीयेन सृष्ट्यादिकारिणा स्वरूपेण।स्वानि ब्रह्मादिसंबन्धीनि रूपायुधवाहनानि यासाम् ॥

ता नामतो दर्शयति

ब्राह्मी माहेश्वरी चैव
कौमारी वैष्णवी तथा ॥३॥
वाराही चैव माहेन्द्री
चामुण्डा बहुरूपिणी ।

आद्याश्चतस्रः पूर्वदक्षिणादिदिक्षु । अपरा ऐशवायव्यादिविदिक्षु । एवमनुलोमप्रतिलोमाभ्यां सर्गसंहारक्रमक्रोडीकारो भवतीति गुरवः ॥

आसां रूपायुधासनभेदं स्फुटयति

ब्रह्मादिबहुरूपान्तं
रूपमासां स्ववाहनम् ॥ ४ ॥
स्वायुधं चैव सर्वासां
स्वरूपेण विभूषितम् ।

ब्रह्मादीनां यदरुणत्वचतुर्भुजत्वादिरूपं तदेवासाम् । तद्वाहनमेव च वाहनं, तच्च हंसवृषमयूरगरुडैरावणकुम्भीरप्रेतरूपम् । वाराह्यास्तु वाहनं न दृश्यते । तदायुधमेव चायुधं, तच्च दण्डत्रिशूलशक्तिचक्रवज्रखड्गरूपम्, एतच्च दक्षिणहस्ते । एतच्चासनादि सर्वं स्वेन स्वभावेन भ्राजमानम् ॥

अन्यत्र हस्तत्रये साधार विधिमाह

कपालखट्वाङ्गधरा
वराभयकरोद्यताः ॥ ५ ॥

वामो वरदः ॥ ५ ॥

दिक्क्रमेण न्यासमुक्त्वा पङ्क्तिक्रमेणाप्याह

पङ्क्तिष्ठा वा यजेद्देवीः
सर्वाभीष्टफलप्रदाः ।

देवस्य सव्यापसव्ययोश्चतुष्कं चतुष्कमित्यर्थः ॥

किंचेमाः

सर्वेषामेव शान्त्यर्थं
प्राणिनां भूतिमिच्छता ॥६॥
भूरियागेन यष्टव्या
यथाकामानुरूपतः ।

शान्तिकादौ सितादिरूपेणेत्यर्थः ॥

विशेषाद्देवि यष्टव्या
भूभृतामपि दैशिकैः ॥७॥

महासंभारेणेत्यर्थः ॥ ७ ॥

यतस्ते

आसामेव प्रसादेन
राज्यं निहतकण्टकम् ।
भुञ्जते सर्वराजानः
सुभगा ह्यवनीतले ॥८॥

युक्तं चैतदित्याह

यस्मादेतज्जगत्सर्वं
देवीनां तु स्वभावजम् ।
एता योनिस्वरूपास्तु
देवादिजगतः प्रिये ॥९॥
सर्वास्ताः सर्वदुःखौघ-
हारिण्यः प्राणिना प्रिये ।
रक्षन्ति मातृवच्चैताः
पालयन्ति जगत्सदा ॥१०॥

विश्वकारणत्वाद्विश्ववद् भूतसर्गं स्वत एव रक्षन्ति किं पुनरर्चिता इत्यर्थः ॥ १० ॥

किंच

कोष्ठे वै कार्षिका यद्व-
च्छक्तिरूपं जगत्प्रिये ।
प्रलये धारयन्ति स्म
सृजन्तीह पुनश्च ताः ॥११॥

यथा कृषीवलाः प्रलये पौषमासात्मनि संहारकाले शक्तिरूपं बीजावस्थावशेषं स्थावररूपं

जगत् कोष्ठे कुसूले धारयन्ति पुनः सृजन्ति वापोन्मुखं कुर्वन्ति, तथा देव्यो विश्वात्मजगत्संहारकालेषु संस्कारावशेषं पुनश्च सृष्ट्युन्मुखं संपादयन्ति ॥ ११ ॥

यद्वच्च कार्षकाः काले
बीजवापं प्रकुर्वते ।
फलाय तद्वत्फलदा
ब्रह्मकल्पसिसृक्षया ॥१२॥

काल इति वसन्ते । फलदा इति देव्यः । ब्रह्मेति ब्रह्मणो यः कल्पः स्वदिनात्मा, तत्र या सिसृक्षा तया हेतुभूतया । ब्रह्मकल्पशब्दः सदाशिवान्तादिनोपलक्षणपरः । देव्य एव हि तत्तत्सदाशिवादिब्रह्मान्तकारणाधिष्ठानेन सृष्ट्यादि कुर्वते । यदुक्तं श्रीस्वच्छन्दे

'ब्राह्मी नाम विभोः शक्तिर्यत्रेच्छा तत्र पातयेत् ।'

इति । तथा

'वैष्णव्यास्तु स्मृतो विष्णुः.....।'

इति ॥ १२ ॥

यतश्च

कल्पादौ कल्पमध्यान्ते
व्याप्नुवन्ति जगच्च ताः ।
तस्मात्सर्वप्रकारेण
शान्त्यर्थं हितकारिकाः॥१३॥
यष्टव्या देवि होतव्या
ध्यातव्याः सिद्धिकामतः ।

होतव्या इति होमेन तर्पणीयाः । सिद्धिकामत इति सिद्धिकामेन ॥

किंच

सर्वबीजैस्त्रिमध्वक्तै-
स्तिलैर्वा श्रीफलैः शुभैः॥१४॥
पुष्पैर्वा सुप्रशस्तैश्च
फलैर्वान्यैः सुहोमितैः ।
सर्वसिद्धिप्रदा देव्यः
सर्वकामफलप्रदाः ॥१५॥

सर्वसिद्धिप्रदस्वभावत्वात् सर्वाणि कामफलानि प्रददतीत्यर्थः । अत्र च

'सर्वकामप्रदो होमस्तिलैः शस्तो घृतान्वितैः ।
धान्यैर्धनार्थसिद्ध्यर्थं घृतगुग्गुलुहोमतः ॥

जायते विपुला सिद्धिरधमा मध्यमोत्तमा ।
श्वेताराबिन्दैराज्याक्तैर्बिल्वैश्च श्रियमाप्नुयात् ॥' (२।२८१)

इत्यादि श्रीस्वच्छन्दोक्तमनुसर्तव्यमिति शिवम्

विश्वसर्गादिकृत्स्वाभावैरिंश्चादिकुलक्रमात् ।
अकुलो जयति श्रीमानेकश्चिन्नेत्रभैरवः ॥

इति श्रीनेत्रोद्योते द्वादशोऽधिकारः ॥

अथ

श्रीनेत्रतन्त्रं

श्रीक्षेमराजकृतोद्द्योतोपेते

त्रयोदशोऽधिकारः

स्फुरत्परामृतासारापूरैरापूर्य तन्मयम् ।
भक्तिभाजां जगत्सर्वं दर्शयन्नेत्रमाश्रये ॥

अधिकारसंगतिपूर्वं वस्तूपक्षेप्तुं श्रीभगवानुवाच

एवं वै मन्त्रराजस्य
कौलिकश्चोदितो विधिः ।
पुनरन्यत्प्रवक्ष्यामि,
विधानं यत्फलप्रदम् ॥ १ ॥

इहत्यव्याख्या पूर्णभोगापवर्गदम् ॥ १ ॥

तत्र

नारायणं चतुर्बाहुं
पद्मपत्रायतेक्षणम् ।

अतसीपुष्पसंकाश-
मेकवक्त्रं द्विलोचनम् ॥२॥

शङ्खचक्रगदापद्म-
सर्वाभरणभूषितम् ।
दिव्याम्बरधरं देवं
दिव्यपुष्पोपशोभितम् ॥३॥

स्फुरन्मुकुटमाणिक्य-
किङ्किणीजालमण्डितम् ।
दिव्यकुण्डलधर्तार-
मुत्थितं तु सदा स्मरेत् ॥४॥

शङ्खचक्रगदापद्मानि च सर्वाभरणानि चेति समासः । स्मरेदिति इहत्यमन्त्रविमृश्यमानमित्यर्थात् ॥ ४ ॥

अथवा पक्षिराजस्थं
सुश्वेतं तु मनोरमम् ।
त्रिवक्त्रं सौम्यवदनं
वराहहरिभूषितम् ॥५॥

भुजैः षड्भिः समायुक्तं
वराभयसमन्वितम् ।
उत्सङ्गेऽस्य श्रियं ध्याये-
त्तद्वर्णायुधधारिणीम् ॥६॥
लावण्यकान्तिसदृशीं
देवदेवस्य संमुखीम् ।

वराभय इति पूर्वोक्तशङ्खाद्याधिक्येनोक्तम् ।
लावण्यकान्ती संनिवेशावयवसौन्दर्ये ॥

अस्यावरणयुक्तया

चतुर्दिक्षु स्थिता देवी-
र्विदिक्ष्वङ्गानि पूजयेत् ॥७॥

अङ्गानां विन्यासः प्राग्वत् ॥ ७ ॥

देवीराह

जया लक्ष्मीस्तथा कीर्ति-
र्माया वै दिक्षु ता यजेत् ।

ताश्च

पाशाङ्कुशधरा देव्यो
वरदाभयपाणिकाः ॥ ८ ॥

देवस्य संमुखे ध्याये-
च्छ्रीवर्णा रूपधारिणीः ।
देवस्य सदृशाङ्गानि
तद्वर्णास्त्रधराणि च ॥ ९ ॥

देवस्य सादृश्यादङ्गानामन्तरङ्गत्वादादौ पूजा । एवं श्रीजयासंहितादृष्ट्योक्त्वा मायावामनिकास्थित्याप्याह

अथवाष्टभुजं देवं
पीतवर्णं सुशोभनम् ।
मेषोपरिस्थितं देवि
दिग्वस्त्रं चोर्ध्वलिङ्गिनम् ।१०।

अस्य पूर्वोक्तकरषट्कायुधाद्यतिरेकिकरद्वयनिवेशमाह

शृङ्गं वष्टभ्य चैकेन

मेषस्य संबन्धि । स्थितमित्यर्थात् ॥

तथा

चेयारोद्यत(?)पाणिकम् ।
बालरूपं यजेन्नित्यं
क्रीडन्तं योषितां गणैः ॥११॥

अस्य च

चतुर्दिक्षु स्थिता देव्यो
दिगम्बरमनोरमाः ।
कर्पूरी चन्दनी चैव
कस्तूरी कुङ्कुमी तथा ॥१२॥

एताश्च

तद्रूपधारिका देव्य
इच्छासिद्धिफलप्रदाः ।

यद्वा

बहुनात्र किमुक्तेन
विश्वरूपं तु तं स्मरेत् ॥१३॥
अनेकवक्त्रसंघातै-
रनेकास्त्रभुजैस्तथा ।

यद्वा

शयनस्थं विवाहस्थ-
मर्धलक्ष्मीयुतं तथा ॥१४॥
केवलं नरसिंहं वा
वराहं वामनं स्मरेत् ।

कपिलोऽप्यथवा पूज्य-
श्चाव्यक्तो वापि निष्कलः।१५।

अव्यक्त इत्येतदाख्यः; स च निष्कलः सुशान्तस्वरूपः ॥ १५ ॥

किंच

येन येन प्रकारेण
भावभेदेन संस्मरेत् ।
तस्य तन्मयतामेति
इत्याज्ञा पारमेश्वरी ॥१६॥

मृत्युजिद्धामेत्यर्थात् ॥ १६ ॥

इदानीं सौरसंहितावेदादिदृष्टसूर्यादिदेवता-कारेणापि मृत्युजिदाराधनमाह

तजाम्म्यमतो वक्ष्ये
येन सिद्धिर्भवेन्नृणाम् ।
रक्तपद्मनिभाकारं
लाक्षारससमप्रभम् ॥१७॥
सिन्दूरराशिवर्णाभं
पद्मरागसमप्रभम् ।

कुसुम्भरागसंकाशं
दाडिमीकुसुमप्रभम् ॥१८॥
कल्पान्तवह्निसदृश-
मेकवक्त्रं त्रिलोचनम् ।
चतुर्भुजं महात्मानं
वरदाभयपाणिकम् ॥१९॥

सूर्यं ध्यायेत् ॥ १९ ॥

स च

वज्रमेकेन हस्तेन
रश्मिमेकेन धारयेत् ।

तं च

सप्ताश्वरथमारूढं
नागयज्ञोपवीतिनम् ॥२०॥
रक्तमाल्याम्बरधरं
रक्तगन्धानुलेपितम् ।
अथवाष्टभुजं देवि
लोकपालायुधान्वितम् ॥२१॥

त्रिवक्त्रं घोरवदनं
त्रिनेत्रं विकृताननम् ।
अश्वोपरिसमारूढं
पद्ममध्ये सदा यजेत् ॥२२॥

लोकपालायुधानि वज्रशक्तिदण्डखड्गपाश-ध्वजगदात्रिशूलानि ॥ २२ ॥

भगवत आवरणान्याह

हृच्छिरश्च शिखा वर्म
लोचनास्त्रं प्रपूजयेत् ।

प्राग्वत् सर्वाङ्गानि न्यस्येदिति यावत् ॥

अत्र च

पद्ममध्ये यजेद्देवं
ग्रहानष्टौ द्वितीयके ॥२३॥

चन्द्रादिषट्कं केतुराहू चेति ग्रहाः । द्वितीयके इत्यावरणे ॥ २३ ॥

नक्षत्राणि तृतीये तु
यथासंख्यं त्रिभिस्त्रिभिः ।

दलाग्रे त्रितयं पूज्यं
लोकपालांश्चतुर्थके ॥२४॥
पञ्चमे पद्मसंस्थाने
अस्त्राण्यष्टौ प्रपूजयेत् ।

त्रिभिस्त्रिभिर्विभक्तानि नक्षत्राणि पूर्वादि-दलाष्टके चतुर्विंशतिः, त्रयं च पूर्वदलाग्र इति नक्षत्रावरणं तृतीयं, लोकपालावरणं चतुर्थम-स्त्रावरणं पञ्चमम् ॥

प्रकारान्तरेणाप्याह

उत्थितं केवलं वापि
द्विभुजं रश्मिसंयुतम् ॥२५॥
विश्वकर्मस्वरूपं वा
विश्वाकारं जगत्पतिम् ।
चतुर्भुजं महात्मानं
टङ्कपुस्तकधारिणम् ॥२६॥
संदंशं वामहस्तेन
सूत्रं वै दक्षिणेन तु ।

देवैः सिद्धैश्च गन्धर्वैः
स्तूयमानं विचिन्तयेत् ॥२७॥

संदंशमिति विभ्रतम् ॥ २७ ॥

उक्तवक्ष्यमाणं सर्वं .

स्थलेऽनले जले चैव
पर्वताग्रे प्रपूजयेत् ।
यत्र वा रोचते चित्ते
इच्छासिद्धिफलप्रदम् ॥२८॥

अस्य भगवतो देवतास्विव नाश्रयेष्वपि कोऽपि नियमः। चित्ते इति चतुर्थ्यर्थे सप्तमी॥

किञ्च

शङ्खकुन्देन्दुधवलं
त्रिनेत्रं रुद्ररूपिणम् ।
सादाशिवेन रूपेण
वृषारूढं विचिन्तयेत् ॥२९॥
चतुर्भुजं महात्मानं
शूलाभयसमन्वितम् ।

मातुलुङ्गधरं देव-
मक्षसूत्रधरं प्रभुम् ॥३०॥

वृषारूढं चतुर्भुजमिति सदाशिवरूपाद्विशेषः ॥ ३० ॥

एवमेव

अथो बहुभुजं देवं
नाट्यस्थं चिन्तयेत्प्रभुम् ।
उमार्धधारिणं यद्वा
विष्णोरर्धार्धधारिणम् ॥३१॥
विवाहस्थं च वा ध्याये-
त्समीपस्थं प्रपूजयेत् ।

समीपस्थमित्युमादेव्या इत्यर्थात् ॥

किंच

ब्रह्मा चतुर्मुखः सौम्यो
रक्तवर्णः सुलोचनः ॥३२॥
लम्बकूर्चः सुतेजाश्च
हंसारूढश्चतुर्भुजः ।

दण्डाक्षसूत्रहस्तश्च
कमण्डल्वभये दधत् ॥३३॥
वेदैश्चतुर्भिः संयुक्तः
सर्वसिद्धिफलप्रदः ।

वेदैरिति साकारैः पार्श्वस्थैः ॥

किंच

बुद्धः पद्मासनगतः
प्रलम्बश्रुतिचीवरः ॥३४॥
पद्माक्षः पद्मचिह्नश्च
मणिबद्धो जगद्धितः ।
समाधिस्थो महायोगी
वरदाभयपाणिकः ॥३५॥
अक्षसूत्रधरो देवः
पद्महस्तः सुलोचनः ।
एवं ध्यातः पूजितश्च
स्त्रीणां मोक्षफलप्रदः ॥३६॥

पद्ममिवाक्षिणी यस्य । पद्मं चिह्नं करादौ

लाञ्छनं यस्य । मणिबद्ध इत्याहिताग्न्यादि-त्वात् निष्ठायाः परत्वम् ॥ ३६ ॥

यद्वा

बहुनात्र किमुक्तेन
पौनःपुन्येन सुन्दरि ।
कार्तिकेयश्च कामश्च
सूर्यः सोमो विनायकः ॥३७॥
लोकपालास्तथा सर्वे
येऽन्ये वा देवयोनिजाः
गारुड भूततन्त्र च
वाग्विधानेषु सर्वतः ॥३८॥
न्यायारहतयोगेषु
वैदिकाद्येष्वनेकशः ।
यामले चैकवीरे च
नवक त्रिकभेदतः ॥३९॥
समभेदे च देव्याख्ये
दुर्गाख्ये विन्ध्यवासिनि ।

चण्डिकाद्ये चतुष्के च
स्वयम्भूत्थे महेश्वरे ॥४०॥
प्राक्प्रतिष्ठितरूपे वा
ऋषिमानुषयोजिते ।
आयुधावावधे चैव
विद्यापीठेषु सर्वतः ॥४१॥
सर्वपातालतन्त्रेषु
नागेषु द्रामिडेषु च ।
शक्तयो वा ह्यनन्ताश्च
मन्त्रेणानेन सुव्रते ॥४२॥
विधानेनार्चिताः सर्वे
सर्वसिद्धिफलप्रदाः ।
भवन्त्यावृतथाः सर्वे
सत्यं मे नानृतं वचः ॥४३॥

सूर्य इति प्राक् संहितास्थित्योक्तः, इह तु बाह्यः । अन्ये इति ध्रुवान्ताः । कार्तिकेयाद्या ये च देवाः, गारुडाद्येषु द्रामिडान्तेषु च याः शक्तयो देवताः, सर्वे तेऽनेनैव मन्त्रेण विधानेनेति तत्त-

च्छास्त्रप्रसिद्धेनेतिकर्तव्यताभेदेनार्चिताः सर्व-सिद्धिफलप्रदा भवन्त इति सबन्धः । न्याय-शास्त्रे नरेभ्यो भिन्नः सर्वज्ञत्वादिगुणो महे-श्वरो देवता, आर्हतेषु अर्हन्, योगे क्लेशाद्यस्पृष्टः पुरुषविशेषः, वैदिकमाद्यं येषु पौराणिकेतिहा-सिकेषु कर्मसु तत्र या अग्न्याद्या देवताः, यामल इति ब्रह्मयामलरुद्रयामलादौ, एकवीर इति परात्रीशिकामतत्रिंशिकादौ, नवक इति नवात्मचक्रादौ, त्रिक इति षडर्धनयेषु, सम-भेदे चेति समविषमाख्येषु मतनयेषु, देव्याख्य इति महाघोराजयादिभेदेषु, विन्ध्यवासिनी-त्येतदाख्यदेवताप्रतिपादके, चण्डिकाद्ये च-तुष्के इति दक्षिणवामस्रोतसि तत्तद्देवताचतु-ष्टयाराधनप्रतिपादिनि, स्वयंभूत्वेनोत्थितो यो महेश्वरो लिङ्गमूर्तिस्तत्र, तत्तत्तत्त्वावतारानुसार-माम्नायसिद्धेऽधिष्ठातरि देवताविशेषे प्राक्-प्रतिष्ठिते ऋषिमानुषयोजित इति समानाधि-करणे सप्तम्यौ । विविधे खड्गनाराचादौ, नागे-ष्विति तत्तन्नागाकारेषु, द्रामिडेष्विति द्रामि-

डादिलोकाविगीतप्रसिद्धिसिद्धेषु देवताकारेषु ।
अवितथा इत्यादि प्राग्वत् ॥ ४३ ॥

किंचायं

सर्वसाधारणो देवः
सर्वसिद्धिफलप्रदः ।
सर्वेषामेव मन्त्राणां
जीवभूतो यतः स्मृतः ॥४४॥

ततः

प्रतिष्ठापूजने चैव
भद्रपीठार्घपात्रके ।
अग्निसंस्करणे चैव
न्यासध्यानादिवाहने ॥४५॥
विकल्पो नैव कर्तव्यः
सर्वसाधारणो यतः ।

वाहन इत्यासने । विकल्प इति द्वैताद्वैत-शास्त्रोक्तव्याप्तिभेदाशयेन नात्र शङ्कितव्यं, यतोऽयं देवः प्रोक्तपरमाद्वयव्याप्त्या सर्वसाधारणः विश्वैवचित्र्यचित्रस्य समभित्तितलोपम इत्यर्थः ॥

अतश्च

संकरोऽत्र न जायेत
तस्माच्छङ्कां परित्यजेत्॥४६॥

अन्यत्रेव नात्र मन्त्रादिसंकरः कोऽपीत्यर्थः॥

अयमप्यस्य मन्त्रराजस्य महिमा, यत्

सकृज्जप्तः शरीरस्थः
सकृज्जप्तोऽर्घपात्रके ।
सकृद्धस्तेषु विन्यासो
मानसे तु सकृज्जपात् ॥४७॥
बाह्यस्थितः सकृत्पूज्यः
सकृच्चन्द्रार्कमूर्तिषु ।
सकृद्धामं सकृज्जप्यं
उदके तु सकृद्यजेत् ॥४८॥
सकृत्सकृच्च सर्वत्र
पूजयेत्परमेश्वरम् ।

सकृद्विभातत्वादस्यैवमुक्तम् ॥

अत एव

प्राणायामादिकः क्लेशो
मुद्रा योगश्च धारणा ॥४९॥

नैवोपयुज्यते ह्यस्य
मन्त्रराजस्य सुव्रते ।
अस्य च भगवतोऽर्चनादि सर्वं
व्यवसायेन कर्तव्य-
मन्यथा नैव

सुखोपायमहामन्त्रवीर्यानुप्रवेशनेन, नतु क्लेशेनेत्यर्थः ॥

यदि तु प्राणायामप्रयासादि आश्रीयेत, तदेतदत्र

दूषणम् ॥५०॥

भवति ॥

व्यवसायेन तु क्रियमाणं
निश्छिद्रं साधकेन्द्रस्य
राज्ञो राष्ट्रविवृद्धये ॥

भवतीति शिवम् ॥

समानतन्त्रप्रतितन्त्रभेदो
नचासनाधेयभिदास्ति यस्य ।
नियन्त्रणात्रोटि सकृद्विभातं
चिदात्म नेत्रं प्रणमामि शार्वम् ॥

इति श्रीनेत्रोद्योते त्रयोदशोऽधिकारः ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेते

चतुर्दशोऽधिकारः

निजौजसोज्जृम्भ्य निजौजसैव
यन्मन्त्रचक्रं स्फुरयन्निजात्म ।
अनुग्रहायाधिकरोति नेत्रं
नुमस्तदीशं द्रयदक्षशान्त्यै ॥

एवमियताधिकारकदम्बकेन सर्वदर्शनाभेदिमहारहस्यपराद्वयरूपता मन्त्रराजस्य यथाप्रश्नं निर्णीतेत्यपरमन्त्राणामनुपयोगितां संभावयमाना श्रीदेव्युवाच

यादृ देव परत्वेन
वर्णितो मन्त्र उत्तमः ।
सर्वेषामेव मन्त्राणां
देवतानां च सर्वतः ॥१॥

हृदयं परमं ह्येष
मन्त्रराट् सर्वसिद्धिदः ।
किमन्यैर्मन्त्रमुख्यैश्च
जप्तैरिष्टैर्वद स्व मे ॥२॥

किमित्यस्यादौ तर्हिशब्दोऽध्याहार्यः। चकारश्चित्रैस्तदाराधनप्रकारैरपि किमिति समुच्चिनोति । स्वेति पदं भिन्नम् ॥ २ ॥

एवं पृष्टः श्रीभगवानुवाच

साधु साधु महेशानि
पृष्टोऽहं यत्त्वयानघे ।
तद्दृहं संप्रवक्ष्यामि
[redacted]रं परमं ध्रुवम् ॥३॥

यद्वस्तु त्वयाहं पृष्टस्तत् सम्यग्वक्ष्यामि यस्मादेतद्ध्रुवं निश्चितं सत् परं रहस्यम् ॥३॥

तद्वक्तुमुपक्रमते

आसीदिदं शक्तिरूप-
मनौपम्यमनामयम् ।

शिवं सर्वगतं शुद्धम-
प्रतर्क्यमतीन्द्रियम् ॥४॥

इदमिति देहादिप्रमात्रपेक्षयेदन्तावभास्यं यत्किंचित्, तद्देहाद्यनाविष्टपरचित्प्रमात्रपेक्षया शक्तिरूपं परप्रमात्रभिन्नम् । अतश्च

'स्वात्मैव स्वात्मना पूर्णो भावो भान्त्यमितस्य तु ।'
(ई० प्र० २।१।७)

इति स्थित्यानौपम्यादिरूपम् । शिष्टं प्रागेव व्याकृतप्रायम् ॥ ४ ॥

अतश्च

सिसृक्षुः स्वेच्छया देवि
ज्ञानशक्त्या क्रियात्मकः ।
प्रथमो ह्येष देवेशः
सर्वज्ञः सर्वगः शिवः ॥ ५ ॥
सर्वसर्वात्मको देव
आदिसृष्टिप्रवर्तकः ।

यच्छक्तिरूपं विश्वमासीत् शक्तेः शक्तिमदैकात्म्यात् स एष प्रथमः प्रधानमाद्यश्च, सर्वं सर्वं यस्य स सर्वसर्वः आत्मा स्वरूपं यस्य तादृक्, स्वयेच्छया तथैव ज्ञानशक्त्येति तद्रूप-

तामाश्रया क्रियात्मको गृहीतक्रियाशक्तिभूमिकः सन् अनाश्रितसदाशिवाद्याभासिन्या आदि-सृष्टेर्गर्भीकृतानन्तावान्तरसर्गसंहारप्रपञ्चायाः प्रवर्तक उल्लासकः ॥

एवमादिसृष्टिमुल्लास्य, तद्भूमावेव

ततोऽनु मन्त्रसृष्टिर्वै
शिवेन परमात्मना ॥ ६ ॥
नानाप्रकारा रचिता
पृथग्भेदव्यवस्थया ।
यथा तथैव देवेशः
सर्वसर्वात्मकः परः ॥ ७ ॥
साधारणो मन्त्रनाथः
सर्वेषामेव वाचकः ।
यदा सदा हि सर्वेषा-
मात्मभूतो ह्यलेपकः ॥ ८ ॥

तत इति तद्भित्तावेव, अन्विति स्वतन्त्र-प्रकाशात्मबोधप्राधान्यात्मना आनुरूप्येण । भेदव्यवस्थयेति अनुग्राह्यानुग्रहवैचित्र्याभासनाशयेन । शिवेन नानामन्त्रसृष्टिर्यथा रचिता,

तथैव मन्त्रस्रष्टेः पराद्वयव्याप्तिर्मा निमाङ्क्षी-दित्याशयेन सर्वसर्वात्मकः, परो विश्वमन्त्रपाल-नपूरणकृत्, साधारणो महासामान्यरूपः, अत एव सच्छब्द इव घटादीनां सर्वेषां वाचकः स्वाभिन्नमाहात्म्यामर्शनः, शिवेनैव परमात्मना रचितो निजमहाशक्त्यात्मोन्मीलितः, यदा चैवं तदा सर्वेषामात्मभूतो, हि इति यस्मादेवं तस्माद्द्वयमलेपको वेदवैष्णवगारुडसिद्धान्ता-दिमन्त्रैर्न लिप्यते नोपरज्यते न भेदव्याप्तिं गाह्यते लेपकाभिमतानां तेषां तच्चित्प्रकाश-सारमहामंत्रवीर्यात्मतां विना वस्तुत्वाभावात् ॥

अतश्च

मन्त्रकोट्यो ह्यसंख्याता
व्यक्ताव्यक्ता व्यवस्थिताः ।
सर्वास्ताः सिद्धिदस्तेन
आद्यन्तेन निरोधिताः ॥९॥
एतत्संपुटयोगेन
जप्ताः सिद्धिफलप्रदाः ।
तदर्थं तव सुश्रोणि
स्नेहेन प्रकटीकृतम् ॥१०॥

रहस्यं परमं सत्यं

असंख्याता इति परिवारापेक्षया । व्यक्ताव्यक्ताः सकलनिष्कलरूपाः । आद्यन्तेति 'सृष्टिं तु संपुटीकृत्य' (प० त्री० ३) इत्याम्नायनीत्या तदेव महामन्त्रवीर्यात्मचिद्धाम आदिभूत स्वभित्तौ मन्त्रचक्रमुन्मील्य चित्प्रकाशेनैवाच्छुरयति,—इत्ययमत्र वीर्यप्राधान्येन निरोधार्थो विवक्षितः, सपुटाकारस्तु मन्त्रपाठयुक्त्या ॥

एतच्च यत ईदृक् परं रहस्यमतः

नाख्येयं यस्य कस्यचित् ।

अनिवृत्तभेदवासनाकलङ्कस्य ॥

यतः

गुप्तः सुसिद्धिदो देवि
प्रकटः सिद्धिहा भवेत् ॥११॥

शोभना सिद्धिर्मुक्तिपर्यवसाना भुक्तिः ॥११॥

तस्मात्सुगुप्तः कर्तव्यः
संप्रदायो मुखागमः ।

मुखात्परशक्त्यात्मनो वक्त्रादागमः प्रसरणं यस्य सोऽयं व्याख्यातरहस्यात्मा, सम्यक्

तीव्रतमशक्तिपातं विचार्य तद्वते दीयते इति संप्रदायोऽयं सुष्ठु गुप्तः स्वविश्रान्तः कर्तव्य इति शिवम् ॥

आद्यन्तस्फुरणात्मवीर्यरुचिरश्रीमत्त्रराजोम्भितं
स्वस्मिन्धाम्नि विधाय शम्बरकुलं तत्तुल्यवीर्यं स्फुरत्
नानानुग्रहकर्मकेलिमभितो निर्वाहयच्छाङ्करं
नेत्रं नौमि समग्रशक्ति परमानन्दामृतैरुल्वणम् ॥

इति श्रीनेत्रोद्योते चतुर्दशोऽधिकारः ॥

अथ

श्रीनेत्रतन्त्रे

श्रीक्षेमराजकृतोद्द्योतोपेतं

पञ्चदशोऽधिकारः ।

सर्वसर्वात्मविलसत्स्फारसंवित्स्फुरारुणम् ।
रक्षाघ्नं सर्वरक्षाकृच्छार्वं नेत्रमुपास्महे ॥

एवंनिर्णीतमाहात्म्यस्य मन्त्रराजस्य रक्षाहेतुतामपि निर्णेतुं श्रीभगवानुवाच

अतः परं प्रवक्ष्यामि
सर्वरक्षाकरो यथा ।
मन्त्रो यथो महोग्रं च
धूपं रक्षोघ्नचोदितम् ॥ १ ॥

यथेति येन होमादिप्रकारेण, महोग्रमिति सर्वोपद्रवप्रशमनं धूपं, तथा रक्षोघ्नतया चोदितं रक्षोघ्नशब्दवाच्यं वस्तु प्रवक्ष्यामि । उपलक्षणं चैतत्पुष्पादेः ॥ १ ॥

यतोऽनेन मन्त्रेण

सप्तवाराभिजप्तस्तु
रक्षोघ्नो यस्य दीयते ।
यश्च तं
शिरःस्थं धारयेन्नित्यं
सर्वदोषैः स मुच्यते ॥ २ ॥

अथ रक्षोघ्नस्य नामानि निर्ब्रुवन् माहात्म्यं प्रदर्शयति

सर्वदैत्यक्षयार्थं तु
मदुक्तेनैव ब्रह्मणा ।
सेर्ष्याणां चैव सर्वेषा-
मभिचारो यतः कृतः ॥ ३ ॥
तदासौ सर्षपः प्रोक्तः
पाति रक्षति [illegible] ।

सेर्ष्याणा मात्सर्यपूर्णाना दानवादीना. सेर्ष्येभ्यः पाति रक्षति इति कृत्वा अक्षरसारूप्यात् सर्षप इत्यर्थः ॥

यदा रक्षांसि सर्वाणि
विद्रुतानि हतानि च ॥ ४ ॥

तदा देवि मया प्रोक्ता
रक्षोघ्नाः प्रथिता भुवि ।

रक्षांसि घ्नन्ति,—इति कृत्वा रक्षोघ्ना इति मया प्रोक्ता भुवि प्रथिता इत्यर्थः ॥

आहवेषु च सर्वेषु
दैत्यैः सह सुरोत्तमैः ॥ ५ ॥
नियुक्ता दुष्टहन्तारः
सिद्ध्यर्थं रिपुनाशने ।
तेषामर्थो यदा सिद्ध-
स्तेन सिद्धार्थका भुवि ॥६॥
ख्याता दर्पहरा देवि
भूतानां दुष्टचेतसाम् ।

रिपुनाश[illegible] सुरैः स्वात्मसिद्ध्यर्थं यतो दुष्टहन्तारो नियुक्ताः, एभ्यश्च तेषां सुराणां सिद्धोऽर्थः प्रयोजनं यदा, तदा सिद्धार्थकाः ख्याताः ॥

यदा सर्वेषु भूतेषु
भयत्रस्तेषु सर्वतः ॥ ७ ॥

नीराजनविधानेन
नामाङ्कं जुहुयात्प्रिये ।
वह्नौ संक्रुद्धमनसा
मन्त्री रक्षार्थमुद्यतः ॥ ८ ॥
तदा नीराजनं ख्यातं
सर्वश्रेयस्करं परम् ।

सर्वतो भयत्रस्तेष्वाध्यात्मिकादिदोषोपद्रुतेषु, नीराजनविधानेनेति वक्ष्यमाणेन, नीराजनमिति निःशेषेण राजनं दीपनं, एतत् सर्षपाख्यं वस्तु ख्यातं प्रथितम् ॥

यश्चायं रक्षोघ्नः, असौ
सितादिर्युगभेदेन
वर्ततेऽनुग्रहे [illegible]। ९ ॥

कृतादियुगभेदेन सितरक्तपीतकृष्णरूपैः बलवाननुग्रहे प्रवर्तते ॥ ९ ॥

तत्र
शुक्लः सर्वप्रदः ख्यातो
रक्तो राज्यप्रदायकः ।

पीतो रक्षाकरः प्रोक्तः
कृष्णः शत्रुविनाशकृत् ॥ १० ॥

एवं वर्णभेदाश्रयः कर्मभेदः पुराकल्पेऽभूत्, संप्रति तु

चतुर्युगेषु सवत्र
पीतकृष्णौ द्विरूपकौ ।
राजसर्षपगौराख्यौ
राजसर्षपो राजिका, गौरः पीतः ॥
द्विरूपोऽन्तर्हितः प्रिये ॥ ११ ॥

सितो लोहितश्चेति द्विरूपोऽद्यतु उत्तमत्वात् न प्रचरतीत्यर्थः ॥ ११ ॥

एतत्प्रसङ्गादुक्त्वा, प्रकृतमाह

यदा [illegible]त्यवशं यातः
सर्वभूतैरुपद्रुतः ।
तदा तु घृतसंयुक्तं
गोक्षीरसितशर्करा- ॥ १२ ॥
तिलैर्विमिश्रितं कृत्वा
जुहुयात्सर्वशान्तिदम् ।

यात इति साध्य इत्यर्थात् । कृत्वेति प्रकृतं सर्षपम् । हवनमत्र मूलेन ॥

तिलैः कृष्णैः समायुक्तं
राजसर्षपमुत्तमम् ॥१३॥
त्र्यक्तं वै जुहुयात्सद्यः
सर्वशान्तिफलप्रदम् ।
त्र्यक्तं त्रिमधुसिक्तम् ॥
अनेनैवाभिमन्त्र्यैत-
द्यस्य हस्ते प्रदीयते ॥१४॥
सौभाग्यमतुलं तस्य
जायते नात्र संशयः ।

अनेनेति मूलेन । एवकार ऊहप्रयोगाभावं ध्वनति । एतदिति राजसर्षपवस्तु ।

सप्तकृत्वोऽभिसंमन्त्र्य
मन्त्रेणानेन मन्त्रवित् ॥१५॥
मूर्ध्नि प्रपातयेद्यस्य
सर्वदोषैः स मुच्यते ।

मंत्रविद्वीर्यज्ञः, एतच्च सर्वत्र । प्रपातयेदिति सर्षपमेव ॥

पूर्वोद्दिष्टोपलक्षितवस्तुनिर्णयायाह

अभिमन्त्र्य.....
.....बासांसि चौषधम्॥१६
समालम्भेन.....
.....वाभिमन्त्रितम् ।
दीयते यस्य तस्य....
.....हिंसकः ॥१७॥

वा एवार्थे । तेऽस्य वनेभि.....हिंसां नैव कुर्वन्तीत्यर्थः ॥ १७ ॥

दिग्विदिक्षु जपेद्यस्य
रक्षार्थं प्रयतात्मनः ।
दिवा वा यदि वा रात्रौ
[redacted]पतो जाग्रतोऽपिवा ॥१८॥
अ[redacted]व. सर्वभूतैश्च
भुवि तिष्ठत्यसौ नरः ।

सर्षपमित्यर्थात् ॥

उपसंहरति

राजरक्षाविधानं तु
मयैतत्प्रकटीकृतम् ॥१९॥

तव स्नेहात्प्रशस्तं तु
रहस्यं सर्वसिद्धिदम् ।

प्रजानुकूले राजनि रक्षिते, विश्वं रक्षितं भवतीति प्राधान्याश्रयाद्राजशब्दः । तवेत्यनुजिघृक्षामय्याः ॥

अतश्च

नृपाणां नृपपत्नीनां
तत्सुतानां द्विजादिषु ॥२०॥
आचार्यः कुरुते यस्तु
सर्वानुग्रहकारकः ।
मन्त्रज्ञः साधको वाथ
स पूज्यः सर्वथा प्रभुः ॥२१॥
संमानैर्विविधैर्नित्यं
दानैर्विविधविस्तरैः ।

कुरुते इति उक्तवक्ष्यमाणदृष्ट्या रक्षां, मन्त्रज्ञः साधक इति कल्पोक्ताराधनया सिद्धमन्त्रः तस्याचार्यतुल्यत्वेन

'एषा वै धारणादीक्षा कर्तव्या योगिनात्र तु ।
मन्त्रसिद्धेन वा देवि कृता वै सुकृता भवेत् ॥' (९।८७)

इति श्रीस्वच्छन्दोक्तत्वात् सर्वथाचार्यः सन्तोष्य इति ॥

एतत् दृष्टान्तप्रमुखं स्फुटयति

यथा मंत्रान्तसंयुक्तः
स्वाहा होमे प्रशस्यते ॥२२॥
तथा सर्वेषु कार्येषु
दक्षितो मन्त्रवित्सदा ।
फलप्रदो भवेत्सद्यः
सर्वशान्तिप्रदः शुभः ॥२३॥

मन्त्रस्यान्ते संयुक्तः इत्युच्चरितः । स्वाहेति स्वाहाशब्दः । दक्षित इति दक्षिणया तोषितः फलं मुक्तिसिद्धी, एवमुत्तरत्र ॥ २३ ॥

किंच

सुखं यशश्च नागानां
पितृणां च स्वधा यथा ।
नमस्कारश्च देवानां
वौषट् शान्तौ प्रशस्यते ॥२४
मन्त्रज्ञानं तथा नित्यं
दानं संमानमुत्तमम् ।

फलप्रदं भवत्याशु ,
सर्वसिद्धिप्रदायकम् ॥२५॥

स्वधेति स्वधाशब्दः । स्पष्टमन्यत् ॥ २५ ॥

एतदेवोपपादयति

ज्ञानशक्तौ स्थिता मन्त्रा-
स्तज्ज्ञानं चेतसि स्थितम् ।
तच्चेतः पूजितं तुष्टं
सात्त्विकं तु भवेत्सदा ॥२६॥
सत्त्वस्थास्तु श्रियो नित्यं
लक्ष्मीस्तत्रैव वर्त्तते ।
रजस्तमोविनाशेन
मन्त्राः सत्त्वोदये स्थिताः ॥२७
सिद्धिप्रदा भवन्त्येषु
यताऽताव सुनिर्मलाः

मननत्राणधर्मकत्वात् मन्त्रा ज्ञानशक्तौ स्थितास्तद्वीर्यसारा इत्यर्थः । तच्च वीर्यात्म ज्ञानं चेतसि स्थितं वीर्यानुसन्धानं परं चित्तमाश्रितम् । तच्च चेतः पूजितमिति भक्तिभरेणारा-

धितम्, अतश्च भक्त्युद्रेकावलोकनोन्मिषद्विकासं सात्त्विकं जायते इति

"स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या ।
मायातृतीये ते एव पशोः सत्त्वं रजस्तमः ॥"(४।१।४)

इति प्रत्यभिज्ञोक्तनीत्योन्मज्जत्सत्त्वप्रकृतिभूतज्ञानशक्तिरूपतामाप्नोति । एवंभूते च सत्त्वे सर्वाः श्रियः महाभोगलक्ष्म्यः स्थिताः, मोक्षलक्ष्मीश्च तत्रैव तिष्ठति । अतश्च चाञ्चल्यसंकुचत्तात्मकरजस्तमोविनाशेन प्रोक्तविकासात्मकसत्त्वोदये मन्त्रा अतीव सुनिर्मलाः इति प्रांशज्ञानशक्त्यात्ममहावीर्याः आशु सदा सर्वसिद्धिदा भवन्तीति ॥

यत एवं

तस्[illegible]सर्व[illegible]यत्नेन
[illegible]याज्ञिषा पारमेश्वरी ॥२८॥
परिपाल्या प्रयत्नेन

सर्वप्रयत्नेन आज्ञेति निश्चिताज्ञेत्यर्थः । एषेति सर्वप्रकारमाचार्याराधनं कार्यमित्येवंरूपा ॥

तेन प्रयत्नेनैतां पालयतः

सिद्धिमुक्ती न दूरतः ।
शीघ्रं भवत इत्यर्थः ॥

आधिकारिकमर्थमुपसंहरन् रहस्यतामस्य दर्शयति

अनुत्तरविधानं तु
न दद्यात्परदीक्षिते ॥२९॥
स्वशिष्ये दीक्षिते दद्या-
दन्यथा न प्रसिद्ध्यति ।

परदीक्षितस्य द्वैतशिष्यत्वाददृयाननुप्रविष्टत्वादिति शिवम्

यदामर्शपरामर्शोन्मिषत्पूर्णप्रधा परम् ।
सौभाग्य तनुते [illegible] श्रं श्रं

इति श्रीनेत्रोद्योते पञ्चदशोऽधिकारः ॥

CORRIGENDA.

Page	Line	Read	For
४	६	विंदधाम्यहम्	विंधदाम्यहम्
१७	१	विशेषणेन	विशेषेणेन
१८	१	श्रौजसां	श्रोजसां
२५	१७	रूपि च	रूपिणम्
२९	१३	सहस्राणां	सहस्राणा
३१	७	वृताक्ष्याशाप्रकाशनस्य	दताकाशनस्य
३३	१३	सुराणां	सुराणा
४४	६	वरम्	वम्
५६	१२	सिद्धीनां	सिद्धीतां
६०	६	पर्ट	पटं
६१	८	उद्द्योते	उद्योते
७३	९	भिप्रायां	भिप्राया
७६	६	द्वाह्ये	द्वोह्य
८८	१०	वागीशीं	वीगाशीं
,,	१५	उद्द्योते	उद्योते
९२	२	दर्शयति	दशयति
१०१	९	त्रिर्नयनं	त्रिनयनं
१०२	३	विष्टराणि	विष्ठराणि
,,	६	विष्टराणि	विष्ठराणि
११०	२	कार्या	काया
११४	४	मूलेनैव	मूलनैव
,,	८	इति[illegible]स्व	तिश्रीस्व
१३१	५	[illegible]दास्य	तदास्थ
१४२	[illegible]	पूर्ण	[illegible]ण
१४५	[illegible]	चक्रा	वक्रा
१५१	९	मात्रं तु	मात्रं त
१९१	१२	सिद्धा	सिद्धा
१९२	९	मुक्त	मक्त
२०६	१९	चिन्तिता	चिन्तता
२११	१५	शृणु	श्रृणु
२२४	४	भूषितम्	भूषित
२३०	३	भुजां	भुजा
२३३	१	संस्थां	संस्था
२५४	१७	साधारविधि	साधार विधि
२५६	७	प्राणिनां	प्राणिना

Kashmir Series of Texts and Studies.
No. XLVI.

THE NETRA TANTRAM

WITH COMMENTARY

BY

KSHEMARĀJA.

EDITED BY

PANDIT MADHUSUDAN KAUL SHĀSTRĪ, M. A., M. O. L.,

VIDYĀVĀRIDHI,

Superintendent Research Department,

JAMMU AND KASHMIR STATE,

SRINAGAR.

Published under the Authority of the Government of

His Highness Mahārāja

Sir HARISINGH BAHĀDUR,

K. C. I. E., K. C. V. O.,

MAHĀRĀJĀ OF JAMMU AND KASHMIR STATE.

Volume I.

BOMBAY:

PRINTED AT THE TATVA VIVECHAKA PRESS.

1926.